दशकुमारचरितम्

(पूर्वपीठिकामात्रम्)

सं०—यमुनेश त्रिपाठी 'चातक'

रमेशचन्द्र जैन ग्रन्थमाला नं०-७

॥ श्रीः ॥

महाकविदण्डिविरचितं

दशकुमारचरितम्

(पूर्वपीठिकामात्रम्)

'प्रदीपिका' संस्कृत-हिन्दीव्याख्याविभूषितम्

व्याख्याकारः—

यमुनेश त्रिपाठी 'चातक'

साहित्य-दर्शनाचार्य

गुरुनानक निर्मल संस्कृत विद्यालय

विश्वेश्वर गंज, वाराणसी।

प्रकाशक

भारतीय विद्या प्रकाशन

वाराणसी दिल्ली

प्रकाशक :
भारतीय विद्या प्रकाशन
(१) पो० बा० नं० १०८, कचौड़ी गली, वाराणसी-१
(२) १. यू० बी०, जवाहर नगर, बंग्लो रोड, दिल्ली-७

प्रथम संस्करण : १९८२

मूल्य : रु० ६·००

मुद्रक :
अनुपम प्रेस
दुर्गाघाट, वाराणसी।

महाकविर्दण्डी

गीर्वाणवाणीगद्यामोदामोदितान्तःकरणेन केन साहित्यसुधाचमनरसिकेन विमलधिया सुधिया स्वकीयग्रन्थत्रयरत्नप्रकाशं प्रविकिरद्दण्डी महाकविः पौनः पुन्येन दृष्टिविषयातिथिः न कृतः ? कुशाग्रधीधौरेयेनानेन नैसर्गिकप्रतिभाभूषितेन केवलं छन्दःशास्त्रनिगडनिगडिता कविभारती सुविशदगद्यप्राङ्गणे क्रीडितुमवतारिता ! एतादृशञ्च कलाकुशलकरस्यावलम्बनं प्रदत्तं यत् सा सञ्चरन्ती भट्टबाणसदृशस्योद्भटविद्वद्भटस्यापिहृदयहरणे सक्षमा बभूव । काव्यादर्शेन आचार्यत्वमवन्तिसुन्दरी कथा दशकुमारचरिताभ्याञ्च लोकोत्तरं कवित्वं साहित्यपारावारपारीणानां समक्षे प्रत्यक्षीकारयन्नपि महाकविरयं नैजजीवनविषये कुत्राप्येकामपि पंक्ति नालिखदतः जन्मजनकजननीदेशकालादिविषयिणी विदुषां जिज्ञासा काल्पनिकमात्रमाधारं धारयन्ती महत्खेदमुपयाति ! परन्त्वत्र सा प्राच्यप्रतिभावतामात्मश्लाघाविरहिता परम्परैवास्ति कारणीभूतोत्तरदायिनी च ! भट्टबाणप्रभृतीन् कतिपयान् विहाय विद्वन्मूर्धन्यान् प्रायशः सर्वेऽपि संस्कृतसाहित्यसाहित्यकाराः स्वकीयसन्दर्भितवृत्त विलेखनाद्विरताः एव विलोक्यन्ते ! लोकोत्तरापि प्रथेयं विद्वज्जीवनविषयकानुसन्धानदत्तचेतसामुद्वेजजननी धन्या ! अस्तु, पौर्वापर्यग्रन्थानामन्तःसाक्ष्यमक्षीकृत्यै तस्मिन् महाकविदण्डिनो विषये प्रकटितानि समयादिविषयकानि कानिचिदनुसन्धानानि प्रस्तूयन्ते ।

केचिद्दण्डिविषयेऽनुसन्धानपरायणेतिहासज्ञाः कविनानेन स्वकीयग्रन्थे समुल्लिखितानि दाक्षिणात्यानां मलयानिलचोलकाञ्चीकावेर्यादिस्थानविशेषाणां नामान्याधारीकृत्यास्य कवेः निवासभूः दक्षिणभारते आसीदिति निर्धारयन्ति । पुनश्च वैदर्भी रीत्यनुसरणमपि दण्डिनं दाक्षिणात्यं निर्दिशति ।

इतरे भारतीयाः पाश्चात्याश्च काणेकीथमैक्समूलरबेवरमैक्डोनलजैकोवीप्रभृतयो विद्वान्सः दशकुमारचरिते चित्रितं भौगोलिक-राजनीतिक-सामाजिक-सन्दर्भचित्रणं चेतसि निधायैनं सप्तमशतीशासकसम्राट्हर्षवर्धनशासनात् पूर्वभारतेऽवतरितं निश्चिन्वन्ति । यतः तादृशी परिस्थितिः तदैवार्थात् षष्ठशताब्द्यामेवासीत् भारतवर्षस्य ।

अन्ये तु अवन्तिसुन्दरीकथाकाव्यादर्शयोः दण्डिना समुपवर्णितं कादम्बरीवृत्तमेकं

पद्यञ्चाधारीकृत्य तयोः बाणभट्टग्रन्थगतकादम्बरीशुकनाशोपदेशच्छायायाः प्रभावोऽस्तीति बाणस्य पूर्वपरावर्तिनमेनं प्रख्यापयन्ति । बहवः अवन्तिसुन्दरीमभिलक्ष्य दण्डिनं भारवेः प्रपौत्रम् व्याहरन्ति ! डॉ० बेलवेकरमहोदयस्य मतानुसारं सप्तमशताब्द्याः उत्तरार्धोऽस्ति दण्डिनः समयः ।

एवं सर्वेषामभीष्टाननिष्टानि समीक्ष्यानुधित्सूणां मतानि निर्णयात्मकतया न किञ्चिदपि वक्तुं शक्ताः अपि वयं षष्ठशताब्द्याः पूर्वमेव महाकवेरस्य स्थितिकालं स्थिरयेम । यतः दण्डिनः काव्यान्तरगताः परिस्थितयः तदैव बाहुल्येन पर्यवतिष्ठन्ते ।

आचार्यं दण्डिनः बाल्यकालोऽतिकष्टपूर्वकमेवातीतोऽभूत् । मातापितरौ सुमधुरकरच्छायामस्मादाकृष्य बाल्यकाले एव दिवं गतौ । अनाथताव्यथाव्यथितमानसः बालकः दण्डी भोजनाच्छादनादिकेभ्योऽपि समस्यामुद्वहन्नितस्ततः परिभ्रमन्नास्ते । परन्तु प्रकृतिः प्रतिभावतां तेजोनिधानभूतानां तेजस्विनां विपद्विघातैः वर्तमानं व्याघातीकृत्वापि सर्वविधं रक्षति स्वयमेवेति नियमाद् दण्डिनोऽपि व्यवस्था कथं कथमप्यभूत् । कष्टपूर्वकं परिश्रमेण च व्याकरण-साहित्य-दर्शनादि विविधविषयाणां सम्यगध्ययनं कृत्वाऽसौ ज्ञानगौरवगरिष्ठो वरिष्ठो बभूव ।

विद्यया विमण्डितोऽयं महाकविः शैवधर्मावलम्बिनः काञ्च्याः पल्लवनरेशरामवर्मणः सभापण्डितपदमलञ्चकार । तेषां महाराजानां राजकुमारं शिक्षायितुञ्च स्वकीयं प्रख्यातग्रन्थं काव्यादर्शम् व्यरचयदिति जनश्रुतिरपि संश्रूयते । एतस्य माता 'गौरी' पिता च वीरदत्तः आसीदित्यपि संश्रूयते । एवं वैयक्तिकजीवनविषयकं यत्किञ्चित् वृत्तं प्राप्यते । अनेन यज्ज्ञानं भवति महाकवेरस्य विषये तत्तु भवत्येव परमस्मादप्यधिकं परमानन्दविषयस्त्वस्माकं साहित्यरसलिप्सूनां कृते स्वयमेव यत् दण्डिनः प्रतिभाप्रसूतानि ग्रन्थरत्नानि तस्य शाश्वतिकां कीर्तिं दिक्षु प्रसारयन्तः विदुषां हृदयहारीभूतानि राजन्ते ।

---

१. अरत्नालोकसंहार्यमवार्यं सूर्यरश्मिभिः ।
दृष्टिरोधकरं यूनां यौवनप्रभवं तमः ॥ काव्यादर्श २/१९७ ।

केवलं च निसर्गत एवाभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्——कादम्बरी ।

अनेन कृताः एते त्रयः ग्रन्थाः समुपलब्धाः सन्ति[1]—अवन्तिसुन्दरीकथा, 'दशकुमारचरितम्', काव्यादर्शश्च। एतेषु काव्यादर्शः आचार्यकोटिकः ग्रन्थोऽस्ति। यस्मिन् काव्यस्य शास्त्रीयपक्षाणां विवेचनम् कृतमिति। द्वौ च ग्रन्थौ सुललितभाषा-शैलीसमसितौ शृङ्गाररसस्यन्दिनौ गद्यसाहित्याब्धौ पुण्डरीकयुगलायेते इति।

दाण्डिनः पदलालित्यम्

संस्कृतसाहित्ये प्रायः प्रत्येकमहाकविविषये सुधीसमीक्षकैः प्रोक्ताः काश्चिदु-क्तयः दरीदृश्यन्ते। याः सूत्रमिव सम्बन्धितकविवर्यस्य ग्रन्थगतं सुमहन्वैशिष्ट्यं प्रति-पादयन्ति! एकोऽतिप्रसिद्धः श्लोकः[2] दण्डिनोऽपि रचनावैशिष्ट्यं समुद्घाटयन् साहित्यरसिकानां जिह्वाग्रे वर्तते। यस्यानुसारं दण्डीकवेः रचनासु 'पदलालित्यम्' सर्वाधिकमनुभूयते विद्वद्भिरिति ज्ञायते। अलंकाराः गुणाः रसादयश्च सन्त्येव परन्तु पदशैय्या यादृशी दण्डिनः हृदयावर्जिका न तादृशी कालिदासादिसदृशाणामपि सुरभारतीशिरोभूषणभूतानामपि महाकवीनाम्। 'पदम्' यद्यपि काव्यस्य बाह्यभूत-मुपकरणम्। तेन रचनायाः बहिरेव राजते। तदपि प्रेक्षावतां प्राथमिकी प्रवृत्तिस्तु तमेव दृष्ट्वा जागर्ति। 'पदम्' सर्वैः नियोज्यते। पदं विना काव्यं कथम्? परन्तु मनोहरं पदं येन सद्यः समाकर्षितहृदयाः सहृदयाः पदात् पदमपि गन्तुं न पारयन्ति सविशेषमहत्वमण्डितं भवति। कस्यापि भावस्य प्रकाशनं विविधभङ्ग्या भवितुं शक्यते। यथा—'शुष्को वृक्षः तिष्ठत्यग्रे'। परन्तु इममेव भावं 'नीरसतरुरिह विल-सति पुरतः' इति वाक्यम् येन मार्दवेन सहृदयहृदये समुद्वेलयति तत्तु श्लाघ्यतरम्! सा च महिमा पदशय्यायाः। द्वयोः वाक्ययोः परवाक्ये पदलालित्यम् विद्यते न तु 'शुष्को वृक्षः' इति वाक्ये। एवमेव आचार्य दण्डिनः सम्पूर्णसाहित्यम्। द्वयोः एव रचनयोः वैदर्भीरीतिमनुसृत्य सर्जना जाता। भावानां समुपनिबन्धनं येषु पदेषु कृतं

---

१. त्रयोऽग्नयस्त्रयो देवाः त्रयो वेदास्त्रयो गुणाः।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः॥ १७४।
—राजशेखरः—शार्ङ्गधरपद्धतौ।

२. उपमा कालिदासस्य, भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥

कविना तानि वर्णादिसंयोजननैपुण्यवशादधिकाधिकं लालित्यं पुष्णन्ति । दिङ्मात्रमुदाहृयते—

ललनाजनं सृजता विधात्रा नूनमेषा घुणाक्षरन्यायेन निर्मिता, नो चेदब्जभूरेवंविधो निर्माणनिपुणो यदि स्यात्तर्हि तत्समानलावण्यामन्यां तरुणीं किन्न करोति ।

× × ×

अनवरतयागदक्षिणारक्षिताशिष्टविशिष्टविद्यासम्भारभासुरभूसुरनिकरः, विरचितारातिसंतापेन प्रतापेन सतततुलितवियन्मध्यहंसो राजहंसो नाम धनदर्पकन्दर्पसौंदर्यहृद्यनिरवद्यरूपो भूपो बभूव । (प्रथमोच्छ्वासः)

× × ×

तस्य वसुमती नाम सुमतिः लीलावती कुलशेखररमणी रमणी बभूव । विजितामरपुरे पुष्पपुरे निवसता साऽनन्तभोगलालिता वसुमती वसुमतीव मगधराजेन यथासुखमन्वभावि ।

× × ×

ब्रह्मवर्चसेन तुलितवेधसं पुरोधसं पुरस्कृत्य कृत्यविन्महीपतिः कुमारं सुकुमारं जातसंस्कारेण बालालङ्कारेण विराजमानं राजवाहननामानं व्यधत्त ।

एतेषूपर्युक्तेषु स्थलेषु यमकोत्प्रेक्षानुप्रासालङ्काराणां सौंदर्यं सुमधुरशब्दानां संगुम्फनं शिष्टता, संयमः प्रञ्जलता च हठादेव रसिकानां मानसं मदयति । अत्र नास्त्येव दृग्गोचरी सा क्लिष्टता या दीर्घसमाससंजाता संलक्ष्यते भट्टबाणकवीनां कादम्बर्यादिषु ।

नैवास्ति सा श्लेषालंकारसन्निवेशसमुत्पन्ना श्लिष्टता यया सुबन्धुकवेः रचना प्रपूर्णा विदुषामपि बौद्धिकं श्रममपेक्षते । सरलशब्दविन्यासाः पदसमूहाश्चानुकर्वन्ति, दण्डिनं सेवकवत् । महाकविनानेन नैव पाण्डित्यप्रदर्शनाय साहित्यं विरचितम् नैव चमत्कृतिमुत्पाद्य चमत्कर्त्तुं चेतांसि ज्ञानिनामपि । एतेन सामान्यजनजीवनमभिलक्ष्य संस्कृतं दैनन्दिनव्यवहारालापसंलापमुद्वहेदिति विचारविचुम्बितमानसेन व्यावहारिकमेव गद्यस्वरूपं विनिर्मितम् । कश्चिदपि दण्डिनः साहित्यस्य चेदनुदिवसमनुवृत्तिं कुर्यादसंशयं सः धाराप्रवाहसंस्कृतप्रभाषणे निपुणः भविष्यिदिति । यद्यपि सर्वं साधु सरलं सुमधुरमेव प्रणीतमनेन, तदपि कुत्रचित् कविपरम्परानुसारं चमत्कार-

प्रदर्शनमपि कृतमेव। यथा—शयानायाः अम्बालिकायाः सरसेऽपि वर्णने ओष्ठ्यवर्णानां प्रयोगाभावः। परन्त्वेतादृशं कौतुकमत्यल्पमेवास्ति। पुनश्च 'एकोहि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः' इति।

एवं स्वकीयनैसर्गिकप्रतिभायाः ऋणं संस्कृतगद्यसाहित्ये निधाय महाकविर्दण्डी नूनमेव चिरकालपर्यंतमस्माकं महच्छ्रद्धास्पदमिति नात्यतिशयोक्तिः। अन्ततश्चैतावन्मात्रमेवं व्याहृत्य विरराम: 'कवयस्त्वयि दण्डिनीति'।

विद्वद्विधेयः
त्रिपाठियमुनेश 'चातकः'

भूमिका

काव्य और उसके भेद—

'पश्य देवस्य काव्यम्' वेद के इस वाक्य के अनुसार 'काव्य' शब्द का परिज्ञान, मानव-मस्तिष्क में अनादि काल से ही अपना स्थान बनाये हुए प्रतीत होता है। यह सारी प्रकृति एक काव्य है। जिसका रचेता सर्वशक्तिमान् परमेश्वर है। सृष्टि में रस है, भाव है, सुख-दुःख की अनुभूति के विषय हैं, उल्लास है, आनन्द है, आमोद-प्रमोद है, सौंदर्य है, क्रम है, छन्द है, क्या नहीं है? कहने का तात्पर्य यह कि आगे चलकर मनीषियों ने काव्य के जितने तत्वों की मीमांसा की वह सब कुछ प्रकृतिरूपी विशाल महाकाव्य में किसी न किसी रूप से विद्यमान था। धन्य है विश्वकाव्य का प्रणेता, जिसके एक-एक अक्षर का अर्थ लगाने में तत्वचिन्तक जीवन खपा देते हैं, फिर भी रहस्य की गहरायी एवं विशदता ज्योंकि त्यों बनी रहती है। अतः 'काव्य' का श्री गणेश ईश्वर से होने के कारण 'कवि' स्वयं में उसका अंश अथवा तद्रूप है और उसकी रचना सृष्टि जैसी सरस, गूढ़, गहन एवं व्यापक। इस प्रकार उभय कवि एवं काव्यों में साम्य होते हुए भी काव्य-तत्वार्थ समीक्षकों ने मानव कवि को, जिसकी रचना का आधार 'शब्द और अर्थ' है; उस शाश्वत कवि से महत्तर सिद्ध किया क्योंकि पारतन्त्र्यादि दोष 'मानव कवि'

की कृति में नहीं होते। कवि सर्वतन्त्रस्वतन्त्र होता है। कल्पना एवं भाव के संयोग से मधुर काव्य रसाभिव्यञ्जन ही उसकी साधना का सर्वस्व है। सुख अथवा दुःख की संवेदना से उसके नवनीत कोमल हृदय का द्रवित होकर शब्दार्थों के माध्यम से अभिव्यक्त हो उठना ही कविता अथवा उसकी सृष्टि है। इस आधार पर न ही केवल छन्दोवद्ध रचना करनेवाले ही अपितु गद्यादि के माध्यम से भी अपने भावों की सरस और लोकोत्तर वर्णनाभिव्यक्ति करने में निपुण मानव कवि हैं—ऐसी संस्कृत साहित्य की अपनी मान्यता है।

इस प्रकार संस्कृत साहित्य में काव्य के तीन प्रभेद किये गये हैं—

१—पद्य काव्य। २—गद्य काव्य। ३—चम्पू काव्य।

प्रसंगानुसार हम गद्य काव्य पर ही विचार करते हैं। द्यग के सम्बन्ध में प्राचीनों का अत्यन्त उदात्त निर्घोष है—'गद्यं कवीनां निकषं वदन्ति।' अर्थात् गद्य कवियों की कसौटी है। इस उक्ति के आधार पर गद्य के विषय में कई रहस्यों का उन्मीलन स्वयमेव हो जाता है। चूँकि 'गद्य लेखन' इतना दुरूह है इस लिए यह निश्चित है कि वाङ्मय की उत्पत्ति के समय से ही उदात्त प्रतिभाओं ने इस कसौटी पर अपने को कसने का प्रयत्न किया होगा। इस परिकल्पना के शमन के लिए विश्व का सर्व प्रथम साहित्य वेद जब आँखों के समक्ष आता है, तब हमें वहाँ उल्लिखित गद्यों को देखकर यह निर्धारित करने में कोई कठिनाई नहीं रह जाती कि गद्य-लेखन पद्य के साथ ही साथ होता रहा है। इस वैदिक काल में कृष्ण यजुर्वेद, ब्राह्मण तथा उपनिषदों के अधिकांश भाग गद्य में ही लिखे हुए है। पुनः यह क्रम महाभारत, निरुक्त एवं महाभाष्य आदि में भी दिखलायी पड़ता है। फिर भी गद्य की यह चरमोन्नति नहीं मानी जा सकती। पद्य की अपेक्षा गद्य का क्षेत्र अत्यन्त संकुचित रहा। इन ग्रंथों तथा तत्कालीन आख्यायिकाओं एवं नाटकों आदि में जो गद्य मिलते हैं वे भी पद्य की तरह प्रकर्षमय नहीं दिखलायी पड़ते। 'गद्य-काव्य' की उत्कर्ष की पराकाष्ठा तो तब मिली जब महाकवि बाण, दण्डी एवं सुबन्धु आदि जगत् प्रसिद्ध गद्यकारों की प्रतिभा ने अपनी कला अर्पित की। इन महापुरुषों की कृतियों के बाद से साहित्य, व्याकरण, दर्शन आदि ग्रंथों में गद्य कृतियों की बाहुल्येन रचना हुई। संक्षेप में गद्य के विकास की रूप रेखा यही है।

गद्य-विकास के क्रम के आधार पर प्राचीन गद्यकारों में प्रमुख हैं—दण्डी, सुबन्धु और बाण भट्ट।

इन गद्यकारों की कृतियों के आधार पर संस्कृत गद्य साहित्य को मुख्यतः दो विभागों में विभक्त किया गया है— १—कथा और २—आख्यायिका।

कथा की परिभाषा देते हुए आचार्यों ने इन विशेषताओं का उल्लेख किया है—

१—कथा कविकल्पित होती है।

२—वक्ता के रूप में स्वयं नायक अथवा अन्य कोई रहता है।

३—कथा में उछ्वास और अध्याय आदि नहीं होते।

४—कथा में कन्याहरण, विप्रलम्भ, संग्राम, सूर्योदय, चन्द्रोदय आदि विषयों का सविस्तार वर्णन रहता है।

५—इसमें लेखक किसी विशेष अभिप्राय से कुछ ऐसे शब्दों का प्रयोग करता है; जिनके द्वारा कथा का आख्यायिका से भेद स्पष्ट हो सके।

आख्यायिका कथा से भिन्न होती है और उसके तत्व ये हैं—

१—आख्यायिका का कथानक ऐतिहासिक होता है।

२—आख्यायिका एक आत्मकथा के रूप में होती है। जिसमें नायक स्वयं वक्ता होता है।

३—इसमें उछ्वास होते हैं तथा 'वक्त्र', 'अपवक्त्र' छन्दों का समावेश होता है।

४—सूर्योदय, चन्द्रोदय, कन्याहरण, संग्राम आदि विषयों का सन्निवेश नहीं होता।

५—इसमें किसी भेदक शब्द का प्रयोग जान-बूझकर नहीं किया जाता।[१]

संस्कृत साहित्य के कथा एवं आख्यायिका के रचनाकारों ने इन नियमों का अत्यन्त सावधानी के साथ पालन किया है। फिर भी तात्विक दृष्टि से विचार करने पर दण्डी का ही कथन सत्य मानना पड़ता है कि कथा और आख्यायिका में कोई महत्व पूर्ण भेद नहीं। ये दोनों ही गद्य-काव्य की ललित संज्ञायें हैं।[२] इस आधार पर महाकवि दण्डी का 'दशकुमारचरित' आख्यायिका ही सिद्ध होता है।

१—'आख्यायिकोपलब्धार्थां' 'प्रबन्धकल्पनाकथा' अमरकोश १।५।६।

२—काव्यादर्श १।२३।३०।

अचादार्य दण्डी

अविर्भाव समय--

परम प्रतिभासम्पन्न आचार्य दण्डी के कृतित्व से संस्कृत गद्य साहित्य आलोकित है, फिर भी इस कृतिकार ने अपने आविर्भाव से भारत वसुन्धरा को कब धन्य किया था—यह आज तक इतिहासवेत्ताओं के तर्क एवं खोज का विषय बना हुआ है। विद्वानों ने पूर्वापर ग्रन्थकारों के ग्रन्थों से अन्तःसाक्ष्य का आधार लेकर अपने-अपने अध्ययन के अनुसार समय निर्धारण का यत्न किया है। फिर भी इस खोद-विनोद में इतने मत मतान्तर उपस्थित हो गये हैं कि अन्तिम निर्णय ले लेना आसान नहीं। तिथि-निर्धारण के सम्बन्ध में यह व्यवधान न ही दण्डी, अपितु संस्कृत साहित्य के लगभग प्रत्येक रचनाकार के साथ जुड़ा हुआ है। जिसका कारण सुरभारती के निःस्पृह समाराधकों की आत्मप्रशंसा से दूर रहने की प्रवृत्ति ही है। वह एक समय था, जब कृतिकार अपनी कृति को ही अपना शाश्वत एवं विश्वव्यापी परिचय मानते थे। लौकिक जन्म स्थान की सीमावद्धता उन्हें कत्तई स्वीकार नहीं थी। वास्तव में यदि कृति सीमातीत और कालातीत होती है तो कृतिकार क्यों नहीं। इस परिप्रेक्ष्य में हम आज के युग को बधायी देंगे कि एक पंक्ति लिखकर भी रचनाकार हजारों पंक्तियों में अपने वंशवृक्षादि का सुस्पष्ट परिचय रचना में सन्निविष्ट कर देता है। अस्तु।

देश-काल एवं जन्म-तिथि निर्धारण की वर्तमान इतिहासज्ञ परम्परा के अनुसार हम महाकवि दण्डी के सम्बन्ध में भी हुई कुछ विद्वद्गवेषणाओं को प्रस्तुत करते हैं—

कुछ विद्वानों का मत है कि दण्डी विदर्भ देशोत्पन्न दाक्षिणात्य ब्राह्मण थे। अपने इस कथन की पुष्टि के लिए ये अन्वेषक दण्डी की कृति 'काव्यादर्श' में आये दक्षिण भारत के मलयानिल[1], काञ्ची[2], कावेरी[3] और चोती[4] आदि स्थान

१—काव्यादर्श २।१७४। २—काव्यादर्श ३।११४।
३—काव्यादर्श ३।१६६। ४—काव्यादर्श ३।१६६।

विशेष के नामों को आधार रूप में उपस्थित करते हैं। इसके अतिरिक्त दण्डी का वैदर्भीरीति का अनुसरण भी एक प्रमाण है।

पाश्चात्य विद्वान् मैक्समूलर, बेवर, मैक्डोनल तथा जैकोबी आदि ने दण्डी का देशकाल, उनकी कृति 'दशकुमारचरित' में वर्णित भौगोलिक एवं राजनीतिक वातावरण का साम्य सम्राट् हर्षवर्धन के राज्यकाल से पूर्व के वातावरण से बिठाकर, सातवीं शती के पूर्व निश्चित किया है।

महाशय काणे ने अपनी सा० द० की प्रस्तावना में पर्याप्त प्रमाण उपस्थित करके यह सिद्ध करनेका प्रयत्न किया है कि आचार्य दण्डी भामह के पूर्ववर्ती थे। इन्होंने भामह का काल ६०० ई० के पश्चात् माना है। किन्तु अधिकांश विद्वानों ने काणे के इस तिथि-निर्धारण को अस्वीकृत करके भामह का समय ५०० ई० के समीप अथवा प्रथम माना है।

डॉ० बार्नेट[1] का मत है कि सिंहली भाषा के अलंकार ग्रन्थ 'सिव-वस-लंकर' की रचना 'काव्यादर्श' का आधार लेकर की गई है। इस ग्रन्थ के प्रणेता राजा सेन प्रथम ८४६-८६६ ई० के मध्य थे। ८१४ ई० में प्रणीत कन्नड़ भाषा के अलंकार ग्रन्थ 'कविराजमार्ग' पर भी काव्यादर्श की छाया पड़ी है। अतः आचार्य दण्डी का स्थितिकाल ८०० ई० के पूर्व ही मानना चाहिए।

कुछ लोगों के अनुसार 'काव्यादर्श' के कुछ श्लोकों में महाकवि कालिदास का प्रभाव परिलक्षित होता है।[2] अतः दण्डी कालिदास के परवर्ती हैं। 'काव्यादर्श' में 'सेतुबन्ध' नामक प्राकृत काव्य का उल्लेख है। इस काव्य के रचयिता राजा प्रवर सेन पाँचवीं शताब्दी में थे। अतः दण्डी का स्थिति काल ५०० से ८०० ई० के मध्य प्रतीत होता है।

डॉ० बेलवेलकर ने दण्डी का समय सातवीं शताब्दी का उत्तरार्ध स्वीकार किया है।[3]

१—J. R. S. 1906 P. 841.

२—मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति—कालिदास शा०

लक्ष्म लक्ष्मीं तनोतीति प्रतीतिः सुभगं वचः—दण्डी।

३—Notes on pp. 176-77.

कुछ विद्वान् 'अवन्ति सुन्दरी' कथा का आधार लेकर दण्डी को भारवि का प्रपौत्र मानते हैं। और उन्हीं का समय इनका भी निर्धारित करते हैं।

परन्तु समस्त मतों की समीक्षा तथा दण्डी के ग्रन्थों का अनुशीलन करने पर इनका स्थिति काल ६०० के लगभग ही मानना अधिक उपयुक्त प्रतीत होता है।

जीवनविषयिणी कुछ चरचा—

यद्यपि महाकवि दण्डी के जीवन के सम्बन्ध में कोई प्रामाणिक वृत्त प्राप्त नहीं होता; फिर भी यदि 'अवन्ति सुन्दरी कथा' को इनकी कृति माना जाय तो उसके आधार पर इनके जीवन से सम्बन्धित कुछ तथ्यों की झलक मिलती है। इस कथा के अनुसार आचार्य दण्डी महाकवि भारवि के प्रपौत्र, मनोरथ के पौत्र तथा वीरदत्त के पुत्र थे। वीरदत्त अपने चार भाइयों में सबसे छोटे थे। वे न्याय शास्त्र के प्रकाण्ड पंडित थे। दण्डी की माता का नाम 'गौरी' था।[1]

महाकवि दण्डी के ऊपर से बाल्यावस्था में ही माता-पिता की शीतलकरच्छाया समाप्त हो गयी थी। फिर भी अपने पूर्व संस्कारों के कारण इन्होंने सारी आपत्तियों को झेलकर विद्या अर्जित की और पारंगत विद्वान् हुए। इनके विषय में ऐसी जनश्रुति है कि ये काञ्ची के 'शैव-धर्मावलम्वी' राजा पल्लवनरेश श्री राम वर्मा के सभापण्डित के पद पर सुशोभित थें। इन्होंने महाराज की आज्ञानुसार राजकुमार को शिक्षित करने के लिए अपने प्रख्यात 'काव्यशास्त्र' 'काव्यादर्श' की रचना की थी।

१—मनोरथाह्वयस्तेषां मध्यमो वंशवर्द्धनः।
ततस्तनूजाश्चत्वारः स्रष्टुर्वेदा इवाभवन् ॥
श्रीवीरदत्त इत्येषां मध्यमो वंशवर्द्धनः।
यवीनस्य च श्लाघ्या गौरीनामाभवत् प्रिया ॥
ततः कथंचित् सा गौरी द्विजाधिपशिरोमणेः।
कुमारं दण्डिनामानं व्यक्तशक्तिमजीजनत् ॥

—अवन्तिसुन्दरी

कृतियाँ —

आज तक की हुई गवेषणा के आधार पर महाकवि दण्डी की तीन कृतियाँ ही प्रमाणिक मानी गई हैं—

१—काव्यादर्श, २—दशकुमारचरित और ३—अवन्तिसुन्दरी कथा।

इनमें काव्यादर्श आचार्य कोटि का लक्षण ग्रन्थ है। विद्वानों ने अनेक प्रमाणों के आधार पर सिद्ध किया है कि साहित्य के प्राचीन लक्षण ग्रन्थों की परम्परा में आचार्य भामह के काव्यालंकार के बाद 'काव्यादर्श' ही प्रौढ़ रचना है। अतः उस क्रम में दूसरे काव्य लक्षण ग्रन्थ प्रणेता आचार्य दण्डी ही सिद्ध होते हैं। इस ग्रन्थ में तीन परिच्छेद हैं। जिनमें प्रथम परिच्छेद में काव्य परिभाषा, काव्यभेद, महाकाव्य के लक्षण, गद्यकाव्य के भेदोपभेद, कथा, आख्यायिका, मिश्रकाव्य, भाषा के भेद-प्रभेद, मार्ग, अनुप्रास, गुण और काव्योत्पत्ति के हेतुओं का विवेचन किया गया है।

द्वितीय परिच्छेद में ३५ अलंकारों का निरूपण है। तृतीय परिच्छेद में प्रहेलिका, दोष, यमक और चित्रकाव्य के विषय में विचार किया गया है।

'अवन्ति सुन्दरी कथा' और 'दशकुमारचरित' गद्य ग्रन्थ हैं। कुछ विद्वानों के मत से अवन्ति सुन्दरी इनकी कृति नहीं मानी जाती है। पर, शैली इत्यादि का विचार करने पर ये तीनों ही ग्रन्थ आचार्य दण्डी रचित ही प्रतीत होते हैं। इसके विषय में कविवर राजेशेखर की शार्ङ्गधर पद्धति का श्लोक भी प्रमाणभूत है—

त्रयोऽग्नयस्त्रयो देवाः त्रयो वेदास्त्रयो गुणाः।
त्रयो दण्डिप्रबन्धश्च त्रिषु लोकेषु विश्रुताः॥ १७७॥

दशकुमार-चरितः एक समीक्षाः—

दशकुमार चरित कविवर दण्डी की ललित-पदावली में संगुम्फित गद्य कृति है। कथा और आख्यायिका के लक्षणों का उपसंगमन करने पर यह आख्यायिका के निकट अधिक ठहरती है। इसमें तीन भाग हैं। जिन्हें पीठिका के नाम से अभिहित किया गया है। यथा—पूर्वपीठिका, चरित और उत्तरपीठिका। पूर्वपीठिका

में पाँच उच्छ्वास हैं, चरितभाग में सात और उत्तरपीठिका में केवल एक उच्छ्वास, यहीं ग्रन्थ की परिसमाप्ति भी है। इन तीनों भागों का विवरण इस प्रकार है—

पूर्वपीठिका:—

प्रथम उच्छ्वास:—इसका नाम 'कुमारोत्पत्ति' है। जिसमें कथा की भूमिका और दश कुमारों की उत्पत्ति का वर्णन किया गया है। ये दशकुमार हैं—

१—राजवाहन—मगधनरेश राजहंस का पुत्र।

२—सोमदत्त—राजहंस के अमात्य सितवर्मा के कनिष्ठ पुत्र सत्यवर्मा का पुत्र।

३—पुष्पोद्भव—पद्मोद्भव के पुत्र रत्नोद्भव का पुत्र।

४—अपहारवर्मा—मिथिलानरेश प्रहारवर्मा का पुत्र।

५—उपहारवर्मा—मिथिलानरेश का द्वितीय पुत्र।

६—अर्थपाल—धर्मपाल के अंतिम पुत्र कामपाल का पुत्र।

७—प्रमति—सितवर्मा के पुत्र सुमति का पुत्र।

८—मित्रगुप्त—धर्मपाल के ज्येष्ठ पुत्र सुमन्त्र का पुत्र।

९—मन्त्रगुप्त—धर्मपाल के मझले लड़के सुमित्र का पुत्र।

१०—विश्रुत—पद्मोद्भव के ज्येष्ठ पुत्र सश्रुत का पुत्र।

तीनों भागों की कथा का क्रम इस प्रकार है—

पूर्वपीठिका—प्रथमोच्छ्वास—पुष्पपुरी, राजहंस, वसुमती एवं मन्त्रियों का युद्ध तथा कुमारोत्पत्ति का वर्णन।

द्वितीय उच्छ्वास—कुमारों सहित राजवाहन की दिग्विजय यात्रा।

तृतीय उच्छ्वास—सोमदत्त चरित्र।

चतुर्थ उच्छ्वास—पुष्पोद्भव-चरित्र।

पञ्चम उच्छ्वास—राजवाहन-परिणय एवं उसके चरित का आरम्भ।

चरित भाग—

प्रथम उच्छ्वास—राजवाहन चरित्र की समाप्ति।

द्वितीय उच्छ्वास— अपहारवर्मा का चरित्र ।
तृतीय उच्छ्वास—उपहारवर्मा का चरित्र ।
चतुर्थ उच्छ्वास—अर्थपाल का चरित्र ।
पञ्चम उच्छ्वास—प्रेम चरित्र ।
षष्ठ उच्छ्वास — मित्रगुप्त चरित्र ।
सप्तम उच्छ्वास—मन्त्रगुप्त चरित्र ।
अष्टम उच्छ्वास —विश्रुत चरित्र ।

उत्तरपीठिका—

इस भाग में विश्रुत चरित्र का शेषांश और पूरे ग्रन्थ का उपसंहार किया गया है ।

वर्ण्य-विषय—

यदि साहित्य के आधुनिक परिवेश में रखकर देखा जाय तो दण्डी कवि का दशकुमार चरित एक अनूठी औपन्यासिक रचना है । वर्ण्य विषय की दृष्टि से यह बड़ा ही विलक्षण है । यों तो इसमें दशकुमारों की जीवन कथा जन्म से लेकर प्रौढ़ावस्थापर्यन्त वर्णित है । पर इसके साथ-ही-साथ कवि की दृष्टि से तात्कालीन समाज का वातावरण भी छूट नहीं पाया है । दण्डी ने अपने समय की समस्त जन-भावना, रीति-नीति, आचार-व्यवहार, पद्धति-परम्परा, छल-छद्म, दया-करुणा, प्रेम-विलास, धूर्तता आदि सबका यथावसर सफल सन्निवेश किया है । दसों कुमार समयानुकूल अपनी-अपनी यात्रा का अत्यन्त ही मार्मिक वर्णन करते हैं । इस क्रम में छल-कपट, मार-काट तथा चोरी-जारी की घटनाओं को सुनकर लगता है कि यह ग्रन्थ 'धूर्तों का रोमांस' है । बीच-बीच में व्यंग्य और विनोद का बड़ा ही मनोहर पुट है । साहस की सत्ता सर्वोपरि सिद्ध की गई है । साहस के सामने औचित्य-अनौचित्य का भी ख्याल नहीं रखा गया है—यह वर्णन समाज पर करारा व्यंग्य करने के लिए ही है । समाज को विकृत करने वाले दम्भी, तपस्वी, कपटी, संन्यासी, ब्राह्मण, धूर्त, कपटी, कुटनी व्यभिचारिणी स्त्रियाँ तथा वेश्यायें, 'दशकुमारचरित' में सफलतापूर्वक चित्रित हैं । कवि ने इनके जीवन के बीभत्स

पक्ष को उभाड़कर समाज का खूब भण्डाफोड़ किया है। पात्र अत्यन्त सजीव हैं। पात्रों का कार्यकलाप उनके स्वरूप के अनुरूप होता दीखता है। यदि उच्चवर्ग की उच्चता का चित्र है तो निम्नवर्ग की कठोर जीवनी की झाँकी भी। पात्र शिष्ट हास्य करते हैं, उनका परिहास अधिक भद्दा नहीं। वर्णन करने का ढंग कवि का अपना है, जिसकी वजह से पाठक कहीं विलास-विकास से उन्मत्त हृदय, कहीं सौंदर्य-सौरभ से वेसुधान्तःकरण और कहीं मधुर स्मिति की लोल लहरियों से तरंगायित चित्त हुए बिना नहीं रहता। ग्रन्थ में चौर-विद्या एवं राजनीतिशास्त्र की शिक्षा पदे-पदे दी गई है। इसके साथ-ही-साथ 'कामशास्त्र' का भी बड़े ही कुशलतापूर्वक सन्निवेश किया गया है। काम-विलास के इस अतिरञ्जनीय वर्णन से पुस्तक में कुछ अश्लीलता का भी दोष आ गया है, पर यह दोष साहित्यिक को मान्य नहीं, नीतिशास्त्र के पंडित भले ही माने! लोकव्यवहार का भी सफल चित्रण है।

अलंकारों की दृष्टि से 'दशकुमारचरित' में 'अनुप्रास' और 'यमक' के ही शोभाविशेष के दर्शन होते हैं। ये अलंकार कवि के बिना किसी प्रयास के ही बैठे हैं। कवि ने अलंकार गढ़ने की कहीं भी कोशिश नहीं की है। इसीलिए श्लेषादि 'चमत्कार' प्रदर्शनकारी अलंकारों का अभाव सा है। हाँ कहीं-कहीं, उपमा, उत्प्रेक्षा और रूपक की समायोजना भी अवश्य ही चित्त को मोह लेती है।

रस का परिपाक भी स्थल विशेष पर पद्य काव्य जैसा ही मानसाह्लादक हुआ है। शृङ्गार रस की प्रधानता है। युद्ध आदि तथा साहस के कार्यों के प्रसंग में 'वीर' की भी अच्छी अभिव्यञ्जना हुई है।

भाषा-शैली की दृष्टि से 'दशकुमारचरित' में व्याकरण के नियमों का पूर्णतया पालन किया गया है। 'लिट्' और 'लुङ्' लकारों के प्रयोग पाणिनीय नियमों के ही अनुवर्ती हैं। भाषा में अनावश्यक आडम्बर नहीं है। अप्रचलित एवं ग्राम्य तथा दुरूह शब्दों का शायद ही कहीं प्रयोग हुआ हो। भाषा प्रसाद एवं माधुर्य गुणयुक्त है। बाण के सदृश सामासिक अरण्य का जाल नहीं बिछाया गया है। जिससे सरसता में व्याघात नहीं होता। 'रीति' वैदर्भी है। 'शब्द-चयन' अत्यन्त

ही मधुर जो कि मन को छू जाता है। महाकवि दण्डी की वर्णन शैली की पर्यालोचना करने पर वे वस्तुतः 'वैदर्भी' गद्य मार्ग के आचार्य सिद्ध होते हैं। शैली में नैसर्गिक प्रवाहमयता, स्वच्छता, उच्छलता एवं लोकोक्तियों तथा मुहावरों का यथास्थान सटीक सन्निवेश अपनी स्वकीयता है। वाक्य छोटे-छोटे, ओजस्वी, ललित एवं सुव्यक्त हैं। रस का पूर्ण परिपाक, अर्थ की स्पष्टता, ललित-शब्द-गुम्फन, मनोरम एवं उदात्त कल्पना—दण्डी के गद्य के मौलिक गुण हैं। इनकी भाषा सुबन्धु के समान प्रत्यक्षर श्लेषमयता तथा बाण के सदृश दुर्गम समास-श्लिष्टता से मुक्त साहित्यिक गद्य का आदर्श नहीं, अपितु नित्य व्यवहार में आने वाले गद्य का नमूना पेश करती है।

दण्डी का पदलालित्य

संस्कृत-साहित्य-जगत् में हर कवि की अपनी एक-न-एक मौलिक विशेषता सुनने में आती है, जिसके द्वारा वह अपने अन्य पूर्वापर कवि-समूह को उस क्षेत्र में अतिक्रान्त करके एक सीमा के रूप में चिर वर्तमान रहता है। इस क्रम में महाकवि दण्डी के सम्बन्ध में भी समीक्षकों की कुछ अनूठी उक्तियाँ सुनने में आती हैं:जैसे—'कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः' 'कवयस्त्वापि दण्डिनि !' तथा 'दण्डिनः पदलालित्यम् !'

ये उक्तियाँ सचमुच ही आचार्य दण्डी के कृतित्व की सर्वतोभावेन सूत्रात्मक समीक्षा हैं। रसिक हृदय साहित्य के सुधी समीक्षकों ने कवि के सन्दर्भ में जो ये गुणपरक डिण्डिम निर्घोष किये हैं—वह निश्चित ही उनकी रचनाओं का चूडान्त गम्भीर अनुशीलन करने के बाद ही। अस्तु, महाकवि के सन्दर्भ में कथित उपर्युक्त कतिपय उक्तियों पर विचार किया जाता है।

साहित्य 'शब्द और अर्थ' की सरसाभिव्यक्ति है। 'शब्द' के बिना अर्थ की कोई सत्ता नहीं, और 'शब्द' अर्थ से शून्य होकर वाग्व्यवहार का माध्यम बनने में किसी प्रकार सक्षम नहीं। हर अक्षर एवं उनके आपस में मिलकर 'शब्द' सृजन का कोई न कोई संकेतार्थ नियत किया गया है। इस अक्षर या शब्द से यही अर्थ [illegible] यही उसका वाच्यार्थ या संकेतार्थ है। यह संकेत किसी मानव

व्यक्ति का बनाया हुआ नहीं, अपितु अक्षर ब्रह्म ने स्वयं ही नियत किया है। इस प्रकार शब्दार्थ जहाँ है वहाँ साहित्य है। हम अपने जीवन के हर क्षण में साहित्य का व्यवहार करते हैं। पर हर व्यक्ति को हम कवि अथवा साहित्यकार नहीं कहते' कारण, 'साहित्यकार' के साथ जुड़ा हुआ साहित्य एक विशेष अर्थ रखता है। 'साहित्य एक विशेष प्रकार के वर्णन की कला में निहित होता है। वहाँ, कल्पना, भाव वक्रोक्ति आदि का समन्वय अत्यावश्यक है। एक ही भाव को कहने के लिए कई लोग कई पदों का सहारा ले सकते हैं। पर, ये पद, (वाक्य या शब्दसमूह) जिसकी प्रतिभा में जितने ही रसानुगुण होकर संघटित हुए वह उतना ही अधिक हृदयावर्जन करने में क्षम होगा। साहित्य में पदों का अत्यन्त महत्व है। अर्थानुसन्धान या रसोद्बोध तो पद-श्रवण के बाद की वस्तु है। सर्वप्रथम पाठक या श्रोता का आकर्षण पदों के द्वारा ही होता है। तभी संस्कृत साहित्य के मर्मज्ञ समीक्षकों ने 'पद-शय्या' की मुक्त-कण्ठ से प्रशंसा भी है।—"पदस्य स्थापिते स्थैर्ये हन्त! सिद्धा सरस्वती[१], 'काचिदपरैव पदानुपूर्वी[२], पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते[३], 'सर्वथा पदमप्येकं न निगाद्यमवद्यवत्'[४], 'इष्टार्थव्यवच्छिन्ना पदावली'[५]।

अर्थात् काव्य की आत्मा यद्यपि रस ही है—इसमें कोई तर्क अथवा विचिकित्सा नहीं। फिर भी वह रस जिन विभावादिकों द्वारा अभिव्यक्त होता है; उनका स्वरूप निर्माण पदों के द्वारा ही होता है। ये पद हर रस में भिन्न-भिन्न गुणों से सम्पृक्त होते हैं। ललित पद शय्या केवल शृङ्गार, करुण और शान्त में ही गुण है। वह वीरादि उत्तेजना और उद्दीप्तिप्रधान वर्णनों के परिप्रेक्ष्य में दोप ही कही जायगी।

१—काव्यालङ्कार सूत्रवृत्ति—१।२

२—काव्यालङ्कार सूत्रवृत्ति—१।२।२१

३—वक्रोक्ति जीवित—प्रथम उन्मेष १७

४—काव्यालङ्कार—१।११

५—काव्यादर्श—१।१०

'दण्डिनः पदलालित्यम्' यह चरण जिस छन्द का अंश है, वह पूरा छन्द इस प्रकार है—

उपमा कालिदासस्य, भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं, माघे सन्ति त्रयो गुणाः ॥

किन्तु इसका तात्पर्य यह नहीं कि महाकवि कालिदास में उपमा के सिवा अर्थ-गाम्भीर्य और पदलालित्य नहीं है। भारवि में मात्र अर्थगौरव ही है तथा दण्डी में केवल पदलालित्य ! इन सभी महाकवियों की रचनाओं में अर्थगुरुता, उपमा, संयोजननिपुणता और पदलालित्य यत्र-तत्र सर्वत्र प्राप्त होता है। पर किसी एक गुण का चरम विकास कविविशेष की ही रचना में देखने को मिलता है, यह एक सर्वमान तथ्य है—जिसमें उस कवि की प्रतिभा एवं रचना-प्रकृति ही प्रमुख कारण है।

आचार्य दण्डी अलङ्कारवादी कवि रहे हैं। उनके वर्णन का क्षेत्र मुख्य रूप से शृङ्गार और करुण जैसे कोमल रस ही रहे हैं। अतः उस क्षेत्र में उन्होंने जैसी पद-योजना की है, वह वास्तव में अन्य महाकवियों में सर्वत्र प्राप्त नहीं होती। इस प्रसङ्ग में कुछ उदाहरण द्रष्टव्य हैं :—

'ललनाजनं सृजता विधात्रा नूनमेषा घुणाक्षरन्यायेन निर्मिता, नो चेदब्जभूरेवं-विधो निर्माणनिपुणो यदि स्यात् तर्हि तत्समानलावण्यामन्यां तरुणीं किन्न करोति'

अवन्तिसुन्दरी के सौन्दर्य-वर्णन में क्या ही पदसंयोजन है। छोटे-छोटे समासों में यमक और अनुप्रास की मनोहर छटा देखिए :—

"तस्य वसुमती, नाम सुमतिः लीलावती कुलशेखररमणी रमणी बभूव। विजितामरपुरे पुष्पपरे निवसता साऽनन्तभोगलालिता वसुमती वसुमतीव मगध-राजेन यथासुखमन्वभावि।"

शब्दशिल्प-सौष्ठव के लिए—

ब्रह्मवर्चसेन तुलितवेधसं पुरोधसं पुरस्कृत्य कृत्यविन्महीपतिः कुमारं सुकुमारं जातसंस्कारेण बालालङ्कारेण विराजमानं राजवाहननामानं व्यधत्त।

तत्र वीरभटपटलीतरङ्गतुङ्गः, [illegible]-

साहित्याः; मया सविनयं सत्कृता स्वक्षी यक्षी साप्यदृश्यतामयासीत् ।"

माधुर्य गुणों के सन्दर्भ में—

'अयुग्मशरःशरशयने शाययिष्यति' 'असत्येनास्य नास्यं संसृज्यते !

ओजपूर्ण भाषा का एक नमूना और देखिए—

'स्वदेशो देशान्तरमिति नेयं गणना विदग्धस्य पुरुषस्य, आत्मानमात्मनाऽ-नवसाद्यैवोद्धरन्ति सन्तः' 'न ह्यलमतिनिपुणोऽपि पुरुषो नियतिलिखितां लेखामति-क्रमितुम् ।"

अलङ्कार सम्प्रदाय के आचार्य होने के कारण दण्डी ने यत्र-तत्र चमत्कार-प्रदर्शन जान-बूझ कर भी किया है। जैसे—सोती हुई 'अम्बालिका के वर्णन प्रसङ्ग में ओष्ठ्य वर्णों का बिल्कुल प्रयोग न करना। तो भी कविवर दण्डी ने सर्वत्र अपने मारल्य, टारल्य एवं लालित्य गुणों की ही सुधा उडेली है। अस्तु, संस्कृत गद्य की इस गरिमामयी प्रतिभा को हम 'मथुराविजय' महाकाव्य की कवियित्री गंगादेवी के शब्दों में ही अपने हृदय का अनुराग अर्पित कर विश्राम लेते हैं :—

आचार्य दण्डिनो वाचामाचान्तामृतसंपदाम् ।
विकासो वेधसः पत्न्या विलासमणिदर्पणम् ।।

आभार-प्रकाश

अपने इस कार्य के अन्तःप्रेरक प्रभु को कोटिशः नमन्-समर्पण के बाद श्रद्धेय गुरुवर श्री पं० ज्वालाप्रसाद गौड़, न्यायाचार्य-पोष्टाचार्य की बाह्य प्रेरणा के प्रति चिर कृतज्ञता ज्ञापन करता हूँ। भारतीय विद्या प्रकाशन कचौड़ी गली, वाराणसी के प्रति भी आभारी होना अपना कर्तव्य समझता हूँ, जिसके श्रम-साधन से यह ग्रन्थ प्रकाशित हुआ। साथ ही मुद्रक एव उनके सहयोगियों को धन्यवाद देता हूँ।

कई टीकाओं के होते हुए भी, यदि 'प्रदीपिका' टीका से कुछ उपकार हुआ तो मैं अपना परिश्रम सफल समझूंगा।

परासी, मीरजापुर
गुरुपूर्णिमा
२०३९ वै०

यमुनेश त्रिपाठी 'चातक'

॥ श्रीः ॥

दशकुमारचरितम्

पूर्वपीठिका

प्रथमोच्छ्वासः

ब्रह्माण्डच्छत्रदण्डः शतधृतिभवनाम्भोरुहो नालदण्डः
क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः ।

प्रदीपिका–संस्कृत टीका

वन्दे विप्रप्रणामोपहितपदयुगं योगिनामप्यगम्यं
योगीन्द्रं योगयुक्तं विबुधकुलविभाभूषिताख्यं महेशम् ।
दातारं भोगयोगोभयभवविभवस्याशु शब्दार्थसाध्यं
सर्वं शर्वं शिवाङ्कं शिवमनुदिवसं विश्ववासैकवृक्षम् ॥ १ ॥

लालित्यं खलु दण्डिनः प्रतिपदं प्रोक्तं पदज्ञातृभिः
गद्यं वै निकषं विवेचककुलैश्चोक्तं कवीनां सताम् ।
आत्मा चापि रसः नितान्तकठिनं काव्यस्य संगुम्फनं
धन्यास्ते कवयन्ति ये तदपि ते श्लाघ्याश्च ये भावकाः ॥ २ ॥

इत्थं काव्यमहोलोके, काव्यास्वादनतत्पराः !
निस्तारस्तु कथं तत्र, मे पश्यन्तु प्रदीपिकाम् ॥ ३ ॥

'प्रारिप्सितपरिसमाप्तिकामो मङ्गलमाचरेत्' इति शिष्टादेशमनुस्मरन् महाकविः दण्डी वस्तुनिर्देशात्मकमादौ मङ्गलश्लोकं लिखन्नाहः—

ब्रह्माण्डच्छत्रदण्डः.....................कालदण्डः ॥

प्रदीपिका—हिंदी टीका

"प्रारम्भ किये जाने वाले कार्य की समाप्ति की कामना वाले व्यक्ति

ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः ॥

प्रसङ्गः—अत्र महाकविना मङ्गलमाचरतोच्यते—

व्याख्या—ब्रह्माण्डम् = जगत्, तदेव छत्रम् = आतपत्रम्, तस्य दण्डः = आधारयष्टिः, शतधृतेः = ब्रह्मणः भवनस्य = उत्पत्तिस्थानस्य, अम्भोरुहस्य = कमलस्य नालदण्डः = वृन्तस्तम्भः, क्षोणी = क्षितिः एव नौः = तरणिः तस्याः कूपदण्डः = गुणवृक्षः (नौकामध्यस्थरज्जुबन्धनकाष्ठम्) क्षरन्ती = प्रवहन्ती, या अमराणां=देवानां सरित् = आकाशगङ्गा सैव पट्टिका = पताका तस्याः केतुदण्डः = ध्वजस्तम्भः, ज्योतिषां = ग्रहनक्षत्रादीनाम् चक्रम् = समूह एव रथाङ्गम् तस्य अक्षदण्डः = नाभिरूपकाष्ठदण्डः, त्रिभुवनम् = त्रयाणां भुवनानां लोकानां समाहारः त्रिभुवनम् तस्य विजयस्तम्भः = विजयसूचकस्तम्भः, विबुधद्वेषिणाम् = रक्षसाम् कालदण्डः = यमदण्डरूपः, त्रिविक्रमः = त्रयो विक्रमाः पादप्रक्षेपा यस्य सः त्रिविक्रमस्य अयं त्रैविक्रमः = वामनावताररूपधारिविष्णुसम्बन्धी, अङ्घ्रिः चरणः दण्ड इव अङ्घ्रिदण्डः = चरणदण्डः, ते = तुभ्यम्, श्रेयः = कल्याणम्, वितरतु = दिशतु ।

अलङ्कारः—परम्परितनिरङ्गरूपकोपमासंसृष्टिः ।

रसः—शान्तः

वृत्तम्—स्रग्धरा । 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' इति लक्षणम् ।

विशेषः—पद्यमिदं पौराणिकमुपाख्यानमनुसृत्य विरचितम् । गद्यभागः प्रारभ्यते:—

को मङ्गल करना चाहिए'' इस शिष्ट आदेश का ध्यान करते हुए महाकवि दण्डी ग्रन्थारम्भ करने के पूर्व मङ्गल करते हुए कहते हैं—भगवान् वामन का वह पद-कमल दण्ड, पाठकों का कल्याण करे, जो ब्रह्माण्डरूपी छाते के दण्ड के समान है, जो बह्मा के उत्पत्ति-स्थान कमल के नाल के समान है, जो पृथ्वी रूपी नौका के मस्तूल के समान है, जो नक्षत्रमण्डल रूप रथचक्र की धुरी के समान है जो त्रैलोक्य विजय के स्तम्भ के समान है और असुरों के लिये कालदण्ड के समान है ॥ १ ॥

अस्ति समस्तनगरीनिकषायमाणा शश्वदगण्यपण्यविस्तारितमणिगणादिवस्तुजातव्याख्यातरत्नाकरमाहात्म्या मगधदेशशेखरीभूता पुष्पपुरी नाम नगरी। (१)

तत्र वीरभटपटलोत्तरङ्गतुरङ्गकुञ्जरमकरभीषणसकलरिपुगणकटकजलनिधि-

अस्ति··· ··· ··· ··· ··· ··· ··· ···नामनगरी ॥ १ ॥

प्रसङ्गः—महाकविना दण्डिना पुष्पपुरमिति नगर्याः वर्णनं क्रियते।

व्याख्या—पुष्पपुरी नाम नगरी अस्तीत्यन्वयः।

निकषः = सुवर्णपरीक्षणपाषाणः इव आचरतीति निकषायमाणा, समस्तानां = सकलानाम्, नगरीणाम् = पुरीणाम् निकषायमाणा = सर्वश्रेष्ठभूता, शश्वत् = निरन्तरम्, अगण्यैः=असंख्यैः, पण्यैः=विक्रेतुं योग्यैः वस्तुभिः, विस्तारितैः=प्रसारितैः, मणिगणादिवस्तुजातैः = मुक्तादिरत्नद्रव्यसमूहैः, व्याख्यातम् = प्रत्यक्षीकृतम्, रत्नाकरस्य = समुद्रस्य, महिमा = सामर्थ्यम् यया सा तथोक्ता, मगधस्य = कोकटेत्यपरनाम्ना प्रसिद्धस्य देशविशेषस्य शेखरीभूता = शिरोभूषणरूपा, पुष्पपुरी = पुष्पवत् सुन्दरी पुरी पुष्पपुरीति कुसुमपुरम्, इति वा नाम्ना प्रसिद्धा नगरी = पुरी, अस्ति = विद्यते। सैव नगरी साम्प्रतम् पटनेति कथ्यते।

विशेषः—अत्र शब्दसौष्ठवं उपमालङ्कारश्च द्रष्टव्यः।

तत्र···· ··· ··· ···· ··· ···· ··· ···· ···बभूव ॥ २ ॥

प्रसङ्गः—पुष्पपुराधीशस्य वर्णनं वितन्यते कविना।

व्याख्या—तत्र राजहंसो नाम भूपो बभूवेति दूरान्वयः। तत्र = तस्यां पुर्याम्। वीराणां = पराक्रमपूर्णानाम् भटानाम् = युद्धकुशलानाम् पटलेन = समवायेन, उत्तरङ्गाः = उन्नताः, तुरङ्गाः = अश्वाः, कुञ्जराः = हस्तिनः ते एव मकराः = नक्राः जलाशयनिवासिनः जन्तुविशेषाः ('मगर, घड़ियाल, इति भाषायाम्) तैः भीषणम् = भयानकम्, सकलानां = सम्पूर्णानाम्, रिपुगणानाम् = शत्रुव्यूहानाम्, कटकम् = सैन्यम्, जलनिधिः=पाथोधिः इव, तस्य मथने=विलोडने;

संसार में अत्यन्त सुन्दर, अनेक रत्नादि वस्तुओं से परिपूर्ण मगधदेश में एक नगरी थी, जिसका नाम 'पुष्पपुर' था ॥ १ ॥

उस नगरी में राजहंस नाम के राजा थे। उनके भुजदण्ड समर्थ शत्रुसमूह

मथनमन्दरायमाणसमुद्दण्डभुजदण्डः, पुरन्दरपुराङ्गणवनविहरणपरायणतरुण-गणिकागणजेगीयमानयातिमानया शरदिन्दुकुन्दघनसारनीहारहारमृणालमरालसुर-गजनीरक्षीरगिरिशाट्टहासकैलासकाशनीकाशमूर्त्या रचितदिगन्तरालपूर्त्या कीर्त्याऽभितः सुरभितः स्वर्लोकशिखरोरुरुचिररत्नरत्नाकरवेलामेखलायितधरणीरमणी-सौभाग्यभोगभाग्यवान्, अनवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासम्भार-

---

मन्दरायमाणम् = मन्दराचल इवाचरन्, मन्थनदण्डस्वरूपः, समुद्दण्डः = समुत्थितः, भुजः = बाहुः दण्ड इव यस्य सः, पुरन्दरस्य = इन्द्रस्य, पुरं = निवासस्थानम्, अमरावती, तस्य अङ्गणवने = नन्दनवने, विहारणे = भ्रमणे, परायणानाम् = निरताणाम्, तरुणीनाम् = रमणीनाम्, गणिकानां = मेनकाद्यप्सरसाम्, गणैः = संघैः, जेगीयमानया = निरन्तरं गीतया, अति = बहु, मानम् = परिमाणम् यस्याः सा तया अतिमानया = महत्या, शरदिन्दुः = शरच्चन्द्रः, कुन्दम् = तन्नामकं पुष्पविशेषश्च, घनसारः = कर्पूरश्च, नीहारः = तुषारश्च, हारः = मौक्तिकमाला, मृणालं = विसश्च, मरालः = हंसश्च, सुरगजः = ऐरावतश्च, नीरं = जलम्, क्षीरं = पयश्च, गिरिशस्य = शिवस्य, अट्टहासः = प्रोत्फुल्लहास्यञ्च, कैलासः=तुहिनालयश्च, काशः=काशकुसुमञ्च, तैः नीकाशा सदृशी, मूर्तिः = स्वरूपम् यस्याः सा तया=अतीवनिर्मलया, रचिता = निर्मिता, दिगन्तरालानां = दिगवकाशानाम्, पूर्तिः = पूर्णता यया सा तया = चतुर्दिग्व्यापिन्या, कीर्त्या = यशसा, अभितः = सर्वत्र, सुरभितः = सुगन्धितः, मनोज्ञः = प्रियः, स्वः = स्वर्गः, लोकः= निवासः येषां ते स्वर्लोकाः = देवगणाः, तेषां = देवानाम्, शिखरेषु = चूडासु, उरूणि = विशालानि, रुचिराणि = मनोहराणि, रत्नानि = मणयः यस्य तादृशस्य रत्नाकरस्य = पयोधेः, वेलया = तटभूम्या, मेखलाकाञ्ची, तयेवाचरिता मेखलायिता=परिवेष्टिता धरणी=पृथ्वी एव रमणी = स्त्री, तस्याः सौभाग्यस्य, सौन्दर्यमदस्य भोगे = सेवने, भाग्यवान् = सफलः साब्धिवसुन्धरायाः शासकः इति फलितार्थः । अनवतरम्=सततम्, यो यागः = यज्ञाचरणम्, तस्य दक्षिणाभिः = प्रदत्त

को मथने के लिए मन्दराचल जैसे थे । उनकी सर्वव्यापिनी कीर्ति का गान अप्सरायें भी किया करती थीं । वह कीर्ति, चन्द्रमा, कुन्दपुष्प आदि समस्त सफेद रंग की

भासुरभूसुर निकरः, विरचितारातिसंतापेन प्रतापेन सतततुलितवियन्मध्यहंसः, राजहंसो नाम घनदर्पकन्दर्पसौन्दर्यसोदर्यहृद्यनिरवद्यरूपो भूपो बभूव। (२)

तस्य वसुमती नाम सुमती लीलावतीकुलशेखरमणीरमणी बभूव। (३)

रोषरूक्षेण निटिलाक्षेण भस्मीकृतचेतने मकरकेतने तदा भयेनानवद्या वनि-

---

पारिश्रमिकद्रव्यैः, रक्षितः = पालितः, शिष्टानाम् = सदाचरणशीलानाम्, विशिष्टेन = विपुलेन, विद्याविस्तारेण = विद्याविकासेन, भासुराणाम् = देदीप्यमानानाम्, भूसुराणाम् = पण्डितानाम् निकरः = समूहः, येन सः तथाभूतः, विरचितः= विनिर्मितः, अरातीनाम् = अरीणाम्, सन्तापः = कष्टम् येन सः तथाभूतः, तेन प्रतापेन = प्रोर्जिततेजसा, सततम् = निरन्तरम्, तुलितः = समीकृतः, वियन्मध्यहंसः = मध्याह्नसूर्यः, राजहंसो नाम = राजहंसाभिधः, घनः = अधिकः, दर्पः = अहंकारः यस्य सः घनदर्पः, घनदर्पश्चासौ कन्दर्पः घनदर्पकन्दर्पः = रूपाभिमानी कामः तस्य यत् सौन्दर्यम् = चारुत्वम् तस्य सोदर्यम् समानम्, हृद्यम् = मनोहारि, निरवद्यम् = अनिन्द्यम्, रूपम् = स्वरूपम् यस्य सः तादृशः, भूपः = नृपः, बभूव = आसीत् ॥ ३ ॥

विशेषः—अत्र गद्यखण्डे बहुव्रीहिकर्मधारयतत्पुरुषाणां समासानां, ललितपदशय्यायाः उपमारूपकयोश्च छटा स्पृहणीया।

तस्य··· ··· ··· ··· ··· ··· ··· ···बभूव ॥ ३ ॥

प्रसङ्गः—राजहंसस्य राज्ञी वसुमती वर्ण्यते।

व्याख्या—तस्य = राजहंसनाम्नः भूपतेः, वसुमती नाम = वसुमतीसंज्ञका, सुमतिः = सुबुद्धिः, लीलावतीनाम् = विलासवतीनाम् स्त्रीणाम्, कुलस्य = समूहस्य, शेखरमणिः = शिरोभूषणम्, श्रेष्ठा, रमणी = पत्नी, बभूव = आसीत् ॥३॥

रोषरूक्षेण···· ··· ··· ··· ···· ··· ···समभूवन्निव ॥ ४ ॥

वस्तुओं के समान सर्वत्र व्याप्त थी। वे राजा राजहंस समुद्रपरिवेष्टित पृथ्वी का शासन करते थे और विद्वानों, याज्ञिकों का सम्मान। इसके साथ ही साथ सौन्दर्य में कामदेव जैसे और प्रताप में मध्याह्नकालीन सूर्य जैसे थे ॥ २ ॥

उनकी अत्यन्त बुद्धिमती एवं परम सुन्दरी पत्नी का नाम 'वसुमती' था ॥३॥

तेति मत्वा तस्य रोलम्बावली केशजालम्, प्रेमाकरो रजनीकरो विजितारविन्द वदनम्, जयध्वजायमानो मीनो जायायुतोऽक्षियुगलम्, सकलसैनिकाङ्कवीरो मलयसमीरो निःश्वासः, पथिकहृद्दलनकरवालः प्रवालश्चाधारविम्बम्, जयशङ्खो बन्धुरा

प्रसङ्गः—वसुमत्याः आपादमस्तकं सौन्दर्यं वर्ण्यते।

व्याख्या—रोषेण = तपोभङ्गोद्भूताक्रोशेन, रुक्षः = निष्ठुरः तेन, तथाभूतेन कोपाविष्टेन, निटिले = ललाटे अक्षि यस्य सः तेन निटिलेक्षणेन = शिवेन, भस्मीकृता = दग्धीकृता, चेतना = चित्तस्फुरणा यस्य स तस्मिन् भस्मीकृतचेतने = विनष्टे मकरकेतने = मीनध्वजे, तदा = तस्मिन् समये, भयेन = त्रासेन, अनवद्या = दोषहीना, वनिता = स्त्री, अतः सैव समाश्रयणीया, इति निश्चित्य तस्य = मदनस्य, रोलम्बानां = मधुपानाम्, आवली = पंक्तिः रोलम्बावली = भ्रमरपंक्तिः. कामदेवस्य सहचरी मौर्वीरूपा तस्याः = वसुमत्याः, केशजालम् = कचकलापः समभूदिव। प्रेम्णः = अनुरागस्य, आकरः = आस्पदम्, प्रेमाकरः = अनुरागास्पदम्, रजनीकरः = रजनीं रात्रिं करोति रजनीकरः = शशाङ्कः, मन्मथसखा उद्दीपनविभाववत्वात् कामभावनायाः। विजितारविन्दं = विजितं तिरस्कृतम् सौन्दर्येण अरविन्दं अम्बुजं येन तत्, वदनं = आननम्, जयध्वजायमानो = जयध्वज इव आचरतीति, विजयकेतुस्तम्भसदृशः, जायदा अर्धाङ्गिन्या युतः मीनः = झषः, तस्याः अक्षियुगलम् = नयनद्वयम्, सकलेषु = सम्पूर्णेषु सैनिकेषु = सेनानीषु मध्ये अङ्कवीरः = प्रधानभटः, मलयसमीरः = दक्षिणदिग्वातः तस्याः निःश्वासः = प्राणवायुः पथिकानाम् = अध्वगानाम्, हृदयस्य दलने = प्रोन्मथेन भेदने वा, करवालः = असिरूपः, प्रवालः = सद्योद्भूत पल्लवः, तस्या अधरविम्बम् = अधरोष्ठौ समभूताम्, जयशङ्खः = कामदेवस्य विजयोद्घोषकः वाद्यविशेषः, बन्धुरा = उन्नता-

उस अनिन्द्य सुन्दरी वसुमती के प्रत्येक अंग में, मानो कामदेव के भस्म हो जाने पर, उसके समस्त कामोद्दीपक साधनों ने आकर, उसे निर्दोष समझ कर, आश्रय ले लिया था। जैसे, भ्रमर रूपी प्रत्यंचा केशों मे, चन्द्रमा मुख में, ध्वजचिन्ह मत्स्य आँखों में, मलयमारुत निःश्वास में, पल्लव होठों में, शंख कण्ठ में, कलश चक्रवाकसदृश परस्पर सटे स्तनों में, धनुष-प्रत्यंचा भुजाओं में, काम के विलास, अर्ध-

लावण्यधरा कन्धरा, पूर्णकुम्भौ चक्रवाकानुकारौ, पयोधरौ ज्यायमाने मार्दवासमाने विलसते च बाहू, इषदुत्फुल्ललीलावतंसकह्लारकोरकौ गङ्गावर्तसनाभिर्नाभिः, दूरीकृतयोगीमनोरथो जैत्ररथोऽतिघनं जघनम्, जयस्तम्भभूते सौन्दर्यभूते विघ्नितयतिजनारम्भे रम्भे चोरुयुगम्, आतपत्रसहस्रपत्रं पादद्वयम् अस्त्रभूतानि प्रसूनानि तानीतराण्यङ्गानि च समभूवन्निव। (४)

वनता, लावण्यं धरतीति लावण्यधरा = सौन्दर्यशालिनी, कन्धरा = ग्रीवा, पूर्णकुम्भौ = जलेन भृतौ कलशौ (विजययात्रायाम् मङ्गलप्रतीकौ), चक्रवाकं = पक्षिविशेषं अनुकुरुते इति चक्रवाकानुकारौ, पयोधरौ = स्तनौ (समभूताम्), ज्यायमाने ज्या = धनुर्गुणः इव आचरत इति ज्यायमाने मौर्वीसदृशौ; मार्दवासमाने = अतिकोमले, विसलते = मृणालदण्डौ तस्याः बाहू = भुजौ, ईषत्फुल्लः = किञ्चित्फुल्लः, लीलावतंसः = विलासभूषणभूतः, कह्लारकोरकः = सुरभितकुड्मलः, गङ्गावर्तः = सुरसरिसलिलभङ्गः तस्य सनाभिः = सदृशी नाभिः, दूरीकृतयोगिमनोरथः = अपनीतः योगिनां तपोऽभिलाषः येन सः, जैत्ररथकामस्य जयनशीलो रथः कामस्य, अतिघनं = स्थूलसमाश्लिष्टम्, जघनं = मध्यदेशपुरोभागः, जयस्तम्भभूते = विजयस्तम्भ स्वरूपे, सौन्दर्यभूते = हृदयहारित्वमधिगते, विघ्नितयतिजनारम्भे = विघ्नयुक्तः कृतः यतिजनानां योगिनां आरम्भः उद्यमः याभ्यां ते, रम्भे=कदल्यौ, उरुद्वयं = सक्थियुगलम्, आतपत्रं = छत्रं, तद्वत् कामस्य सहस्रपत्रं = कमलम्, तस्याः पादद्वयं = चरणद्वयम्, तानि = विख्यातानि अस्त्रभूतानि = बाणभूतानि, प्रसूनानि = कुसुमानि अरविन्दादीनि, इतराणि = तद्भिन्नानि तस्या अङ्गानि = अवयवाः (उदरादीनि), समभूवन्निव = जातानीव ॥ ४ ॥

विशेषः—अनुप्रासयमकोत्प्रेक्षायाश्च सौन्दर्यम् द्रष्टव्यम्। कवेः बहुज्ञता श्लाघ्या। कोमला पदशय्या रसश्च शृंगारः ॥ ४ ॥

विकसित कमलकली गङ्गावर्तसदृश नाभि में, जैत्ररथ ने, जो योगियों के ध्यानाभिलाष को दूर कर देता है—उसके परस्पर सटे हुए जघनों में, कामदेव के राजछत्र के तुल्य कमल ने दोनो चरणों में निवास बनाया तथा इसके अतिरिक्त धरती के शेष फूलों ने (जिनका इस प्रकरण में नाम नहीं लिया गया अशोक आदि)

विजितामरपुरे पुष्पपुरे निवसता सानन्तभोगलालिता वसुमती वसुमतीव मगधराजेन यथासुखमन्वभावि । (५)

तस्य राज्ञः परमविधेया धर्मपालपद्मोद्भवसितवर्मनामधेया धीरधिषणावधी-

---

विजितामरपुरे ... ... यथासुखमन्वभावि ॥ ५ ॥

प्रसङ्गः—राज्ञः राजहंसस्य भोगविलासो वर्ण्यते ।

व्याख्या—विजितम् = ऐश्वर्यलक्ष्म्या तिरस्कृतम्, अमरपुरं = स्वर्गम् येन तत् तस्मिन्, पुष्पपुरे = कुसुमपुरे, निवसता = निवासं कुर्वता, सानन्तभोगलालिता = नास्ति अन्तो यस्मिन् स अनन्तः, अनन्तश्चासौ भोगः अनन्तभोगः, अनन्तभोगेन लालिता, वसुमतीव = वसुन्धरेव, वसुमती = साम्राज्ञी, अनन्तस्य = वासुकेः भोगेन = फणेन शिरसा लालिता = धृता, अनन्तभोगलालिता मगधराजेन = मगधदेशाधिपेन (राजहंसेन) यथासुखम् = सुखमनतिक्रम्य सुखसहितम् अन्वभावि = समुपभुक्ता । अलङ्कारः—यमकम्, उपमा च ।

तस्य राज्ञः··· ....त्रयोऽभूवन् ॥ ६ ॥

प्रसङ्गः—राज्ञः मन्त्रिवर्गः वर्ण्यते ।

व्याख्याः—तस्य = पूर्ववर्णितस्य राज्ञः = भूपस्य मगधेशराजहंसस्य, परमविधेया = अतिविनीताः धर्मपालश्च पद्मोभवश्च सितवर्माचेति नामधेयं येषां ते धर्मपालपद्मोद्भवसितवर्मनामानः; धीरधिषणावधीरितविबुधाचार्यविचार्यकार्यसाहित्याः=धीराभिः=तीक्ष्णाभिः धिषणाभिः=मेधाभिः अवधीरितानि=तिरस्कृतानि,

---

वसुमती के अवर्णित अङ्गों में आश्रय ग्रहण किया । कहने का तात्पर्य—वसुमती परम सुन्दरी थी । उसका अङ्ग-प्रत्यङ्ग सौन्दर्य के उपमानों को तिरस्कृत करने वाला था । यहाँ उपमागर्भित उत्प्रेक्षा द्रष्टव्य है ॥ ४ ॥

स्वर्ग के सौन्दर्य को जीतने वाली उस समृद्ध नगरी में मगधेश्वर 'राजहंस' ने शेष शीर्ष पर धारण की हुई पृथ्वी के समान रानी वसुमती के साथ बहुत दिनों तक रतिसुख भोगा ॥ ५ ॥

उस राजा राजहंस के कुलपरम्परागत—धर्मपाल, पद्ममोद्भव और सितवर्मा नामक तीन मन्त्री थे । जिनकी वैचारिक शक्ति, गम्भीर बुद्धि और विनय,

रितविबुधाचार्यविचार्यकार्यसाहित्याः कुलामात्यास्त्रयोऽभूवन् । (६)

तेषां सितवर्मणः सुमती-सत्यवर्माणौ, धर्मपालस्य सुमन्त्र-सुमित्र-कामपालाः पद्मोद्भवस्य सुश्रुत-रत्नोद्भवाविति तनयाः समभूवन् । (७)

तेषु धर्मशीलः सत्यवर्मा संसारासारतां बुद्ध्वा तीर्थयात्राभिलाषी देशान्तरमगमत् । (८)

विबुधाचार्यस्य = बृहस्पतेः, विचार्याणां = चिंत्यविषयाणां, साहित्याः = समूहाः यैस्ते, कुलामात्याः = वंशपरम्परासमागतमंत्रिणः, त्रयोऽभूवन्=त्रिसंख्यापरिमिताः आसन् ॥ ६ ॥

समासः—धर्मपालेत्यादिपदे द्वन्द्वः धीरादिषु च बहुव्रीहिः ॥

तेषाम्··· ···· ··· ··· ···· ·· ··· ····समभूवन् ॥ ७ ॥

प्रसङ्गः—राज्ञः अमात्यानां पुत्राः वर्ण्यन्ते ।

व्याख्या—तेषाम् = अमात्यानाम् मध्ये, सितवर्मणः तन्नामकस्य मन्त्रिणः, सुमतिसत्यवर्माणौ = सुमतिश्च सत्यवर्मा च, धर्मपालस्य = तन्नाम्ना मन्त्रिणः । सुमन्त्रश्च, सुमित्रश्च, कामपालश्च, पद्मोभवस्य = तन्नाम्नः मन्त्रिणः सुश्रुतश्च रत्नोद्भवश्च तनया=पुत्राः, समभूवन् = जाताः ॥ ७ ॥

तेषु···· ··· ··· ··· ··· ··· ··· ···अगमत् ॥ ८ ॥

प्रसङ्गः—सः एव ।

व्याख्या—तेषु = अमात्यपुत्रेषु, धर्मशीलः = धर्मनिष्ठः, सत्यवर्मा, संसारस्य = जगतः, असारतां = क्षणिकताम्, बुद्ध्वा = अनुभूय, तीर्थयात्राभिलाषी = तीर्थाटनेच्छुकः, देशान्तरं = इतरं देशं, अगमत् = अगच्छत् ॥ ८ ॥

देवगुरु बृहस्पति को भी जीतने वाली थी ॥ ६ ॥

उनमें सितवर्मा को सुमति और सत्यवर्मा, धर्मपाल को सुमन्त्र, सुमित्र तथा कामपाल, एवं पद्मोद्भव को सुश्रुत और रत्नोद्भव नामक पुत्र हुए ॥ ७ ॥

उन सातों मन्त्रिपुत्रों मे धर्मशील और सत्यवर्मा संसार को मिथ्या मानकर विरक्तभाव से तीर्थाटन मे चल पड़े ॥ ८ ॥

विटनटवारनारीपरायणो दुर्विनीतः कामपालो जनकाग्रजन्मनोः शासनमतिक्रम्य भुवं बभ्राम। (९)

रत्नोद्भवोऽपि वाणिज्यनिपुणतया पारावारतरणमकरोत्। (१०)

इतरे मन्त्रिसूनवः पुरन्दरपुरातिथिषु पितृषु यथापूर्वमन्वतिष्ठन्। (११)

विटनट ... ... बभ्राम ॥ ९ ॥

प्रसङ्गः—अमात्यपुत्राणां कार्याणि वर्ण्यन्ते।

व्याख्या—विटः = धूर्तः, नटः=शैलूषः, वारनारी = गणिका तासु परायणः = आसक्तचेताः; दुर्विनीतः = दुष्टः, कामपालः, जनकाग्रजन्मनः = पितु ज्येष्ठभ्रातुः, शासनं = आज्ञाम् अतिक्रम्य = उल्लङ्घ्य, भुवं = धरणीम्, बभ्राम = संचचार ॥ ९ ॥

रत्नोद्भवः ... ... अकरोत् ॥ १० ॥

प्रसङ्गः—अमात्यपुत्राणां कार्यकलापाः वर्ण्यन्ते।

व्याख्या—रत्नोद्भवः=पद्मोभवस्य द्वितीयः सुतः, अपि, वाणिज्यनिपुणतया=व्यापारदाक्षिण्येन, पारावारस्य = सागरस्य, तरणं = लङ्घनम् अकरोत्= अकार्षीत् ॥ १० ॥

इतरे ... ... अन्वतिष्ठन् ॥ ११ ॥

प्रसङ्गः—सः एव।

व्याख्या—इतरे = शेषाः अमात्यपुत्राः, पुरन्दरस्य = इन्द्रस्य पुरं = नगरम्, स्वर्गं तस्य अतिथिषु, मृतेषु, पितृषु = जनकेषु, यथापूर्वम् = वंशपरम्परानुसारम्; अन्वतिष्ठन् = मन्त्रित्वमकुर्वन् ॥ ११ ॥

कामपाल बड़े भाइयों एवं पिता का कहना न मानकर नटों, धूर्तों और वेश्याओं के चक्कर मे आकर इधर-उधर घूमने लगा ॥ ९ ॥

रत्नोद्भव व्यापार की दक्षता प्राप्त करके समुद्र पार द्वीपान्तर मे चला गया ॥ १० ॥

और दूसरे मन्त्रिपुत्र (सुमति, सुमन्त्र सुमित्र और सुश्रुत) अपने-अपने पिता की मृत्यु के बाद उनके पदों पर कार्य करने लगे ॥ ११ ॥

ततः कदाचिन्नानानाविधमहदायुधनैपुण्यरचितागण्यजन्यराजन्यमौलिपालिनिहितनिशितसायको मगधनाथको मालवेश्वरं प्रत्यग्रसङ्ग्रामघस्मरं समुत्कटमानसारं मानसारं प्रति सहेलं न्यक्कृतजलधिनिर्घोषाहङ्कारेण भेरीझङ्कारेण हठिकाकर्णनाक्रान्तभयचण्डिमानं दिग्दन्तावलवलयं विघूर्णन्निजभरनमन्मेदिनी-

---

ततः .... निर्ययौ ॥ १२ ॥

प्रसङ्गः—राजहंसस्य मालवेश्वरं प्रति युद्धप्रयाणं वर्ण्यते ।

व्याख्या—ततः = किञ्चिद्दिनान्तरम्, कदाचित् = एकदा, नानाविधानां = बहुप्रकाराणाम्, महतां = विशालानाम्, आयुधानां = अस्त्राणाम् नैपुण्येन = परिचालनपाटवेन, रचितेषु = निर्मितेषु, अगण्येषु = बहुषु, जन्येषु = युद्धेषु, राजन्यानां क्षत्रियाणाम्, मौलिपालिषु = किरीटप्रान्तेषु, निहिताः = रक्षिताः, निशिताः = तीक्ष्णाः, सायकाः = विशिखाः, येन सः मगधनायकः = राजहंसः, मालवेश्वरं = मालवपतिम्, प्रत्यग्रे = नूतने, संग्रामे = युद्धे, घस्मरं = शत्रुविजयिनम्; समुत्कटः = अत्यधिकः, मानः = दर्पः एव सारः सारांशः यस्य सः तम्, मानसारं = तन्नामकं राजानम् प्रति = अभिलक्ष्य, सहेलं = अनायासम्, न्यक्कृतः = तिरस्कृतः जलधेः = सागरस्य, निर्घोषाहंकारः = गर्जनाभिमानः येन सः तेन, भेर्याः = युद्धपटहस्य, झङ्कारः = घोषः तेन भेरीझङ्कारेण, युद्धपटहघोषेण; हठिकस्य = अकस्मादागतस्य शब्दस्य आकर्णनात् = श्रवणात्, आक्रान्तः = प्राप्तः, भयस्य, चण्डिमा = आधिक्यम् यस्य सः तथाभूतम्; दिग्दन्तावलाः = दिग्गजाः, तेषां वलयं = मण्डलम्; विघूर्णयन् = विकम्पयन्, निजस्य = स्वस्य; भरेण = भारेण, नमयन्त्याः = अधोगच्छन्त्याः, मेदिन्याः = धरित्र्याः, भरेण = भारेण, आक्रान्तं = प्रपीडितम्,

---

कुछ दिनों के बाद एक बार, विविध हथियार संचालन में निपुण, अनेकबार हुए युद्ध में शत्रु राजाओं के मुकुटों में तीक्ष्ण बाणों का संधान करने वाले मगधनरेश राजहंस संग्राम-विजय से घमण्ड में भरकर मालवेश्वर मानसर के ऊपर अत्यधिक कुपित होकर युद्ध करने के लिए चतुरंगिणी सेना लेकर निकल पड़े। सेना इतनी भयानक थी कि उसके समुद्रगर्जन को भी दबाने वाले नगाड़े के शब्दों

भरेणायस्तुभुजगराजमस्तकबलेन चतुरङ्गबलेन संयुतः सङ्ग्रामाभिलाषेण रोषेण महताऽविष्टो निर्ययौ। (१२)

मालवनाथोऽप्यनेकानेकपयूथसनाथो विग्रहः सविग्रह इव साग्रहोऽभिमुखीभूय भूयो निर्जगाम। (१३)

तयोरथ रथतुरगखुरक्षुण्णक्षोणीसमुद्भूते करिघटाकटस्रवन्मदधाराधौतमूले

भुजगराजस्य = वासुकेः, मस्तकवलं = शिरःशक्तिम् येन तथोक्तेन चतुरङ्गवलेन = चतुर्विधसैन्येन; संयुतः = युक्तः, संग्रामस्य = युद्धस्य, अभिलाषः = मनोरथः, तेन तादृशेन, रोषेण = आक्रोशेन, आविष्टः = आपूरितः सन् निर्ययौ = निर्जगाम ॥१२॥

विशेषः—अवतरणेऽस्मिन् अनुप्रासच्छटा हृदयहारिणी यमकरूपकयोश्चापि सौन्दर्यम् मनोहरम्।

मालव ... ... निर्जगाम ॥ १३ ॥

प्रसङ्गः—मालवनाथस्य युद्धस्य प्रत्युद्गमनं वर्ण्यते।

व्याख्या—मालवनाथः = मानसारः, अपि, अनेकानेकयूथपसनाथः = बहुहस्तियुक्तः, विग्रहः = संग्रामः, सविग्रहः सदेहः, मूर्तिमान् इव साग्रहः = साभिलाषः, भूयः = पुनरपि, अभिमुखीभूय = सम्मुखी भूत्वा, निर्जगाम = निर्ययौ ॥१३॥

तयोः ... . जन्यमजनि ॥ १४ ॥

प्रसङ्गः—मगधेशमालवेशयोर्मध्ये भीषणः संग्रामोऽभिवर्ण्यते।

व्याख्या—अथ = प्रयाणानन्तरम्, तयोः = मगधेशमालवेशयोः, रथैः = स्यन्दनसमूहैः, तुरगाणां = अश्वानाम्, खुरैः = शफैः क्षुण्णायाः = मर्दितायाः,

---

की सुनकर दिग्गज काप जा रहे थे। उसके भार से पृथ्वी को धारण करने वाले शेषनाग भी व्यथित हो रहे थे ॥ १२ ॥

(उधर) मालवेश्वर मानसार भी, जो मानो साक्षात् शरीरधारी संग्राम हो हजारों हाथियों से सुसज्जित सेना लेकर उनसे लड़ने के लिए अपने नगर से साग्रह निकल पड़ा ॥ १३ ॥

इसके बाद उन दोनों में घमासान युद्ध छिड़ गया। उस युद्ध में रथों के पहियों और घोड़ों के टापों से रौंदी गई धरती से उड़ती हुई धूलि हाथियों

नव्यवल्लभवरणागतदिव्यकन्याजनजवनिकापटमण्डप इव वियत्तलव्याकुले धूलीपटले दिविषद्ध्वनि धिक्कृतान्यध्वनिपटहध्वानबधिरिताशेषदिगन्तरालं शस्त्राशस्त्रि हस्ताहस्ति परस्पराभिहतसैन्यं जन्यमजनि । (१४)

तत्र मगधराजः प्रक्षीणसकलसैन्यमण्डलं मालवराजं जीवग्राहमभिगृह्य

क्षोण्याः = धरायाः, समुद्भूते = उत्थिते (धूलीपटले), करिघटानां = गजसमूहानाम्, कटेभ्यः = मस्तकेभ्यः, स्रवन्त्या = क्षरन्त्या, मदधारया = दानवारिप्रवाहेण, धौतं = प्रक्षालितम्, मूलं = प्रधानप्रदेशः यस्य स तस्मिन् तथाभूते, नव्यवल्लभानां = नववधूनां, वरणाय = विवाहाय, आगतानां = प्राप्तानाम्, दिव्यकन्याजनानां = अप्सरसां जवनिकया = आच्छादनेन युक्तः, पटमण्डपः = पटवासः, तस्मिन्निव वियत्तलव्याकुलेः = गगनाच्छादिते धूलिपटले = रजोवृन्दे, दिविषदध्वनि = दिवि स्वर्गे सीदन्ति ये ते दिविषदः = देवाः तेषामध्वनि = आकाशे दिक्कृतः = न्यक्कृतः अन्येषां ध्वनिः = नादः यैः तैः पटहध्वनिः = ढक्कानिनादैः, बधिरितानि = विकलीकृतानि, अशेषाणि = समस्तानि, दिगन्तरालानि = दिङ्मण्डलानि येन तत्, शस्त्रैः शस्त्रैश्च परस्परं प्रहृत्य कृतं युद्धमिति शस्त्राशस्त्रि, तद्वदेव = हस्ताहस्ति, परस्परेण = अन्योन्येन, अभिहतं = समाक्रान्तं, सैन्यं यस्मिन् तत् परस्पराभिहतसैन्यम्, जन्यं = युद्धम्, अजनि = प्रारब्धम् ॥ १४ ॥

विशेषः—नादसौन्दर्यम् द्रष्टव्यम् । माधुर्यगुणयुक्ता च भाषा ।

तत्र ... ... प्रतिष्ठापयामास ॥ १५ ॥

प्रसङ्ग—सः एव ।

व्याख्या—तत्र = संग्रामे, मगधराजः = मगधभूपः राजहंसः, प्रक्षीणसकलसैन्यमण्डलं = निःशेषितसमस्तसेनासमूहं, मालवराजं = मानसारम्, जीवग्राहम् =

के कपोलों से प्रवाहित मदजल से भींगकर, नये-नये पतियों को वरण करने के लिए युद्धभूमि में आयी हुई अप्सराओं के लिए, परदे का काम करने लगी। अर्थात् आकाश में धूल ही धूल छा गई। चारों दिशाओं में युद्धवाद्यों की आवाज गूँज उठी। योद्धा शस्त्रों से शस्त्र और हाथों से हाथ टकराते हुए युद्ध करने लगे ॥ १४ ॥

उस भयानक युद्ध में राजहंस ने मानसार की सारी सेना मार डाली और उसे

कृपालुतया पुनरपि स्वराज्ये प्रतिष्ठापयामास। (१५)

ततः स रत्नाकरमेखलामिलामनन्यशासनां शासदनपत्यतया नारायणं सकललोकैककारणं निरन्तरमर्चयामास। (१६)

अथ कदाचित्तदग्रमहिषी 'देवि ! देवेन कल्पवल्लीफलमाप्नुहि' इति प्रभातसमये सुस्वप्नमवलोकितवती। (१७)

जीवितम्, अभिगृह्य = अधीनीकृत्य कृपालुतया = दयालुतया, पुनरपि = भूयः, अपि स्वराज्ये = तद्राजधान्याम्, प्रतिष्ठापयामास = संस्थापितवान् ॥ १५ ॥

ततः ··· ··· ··· ···· ··· ···· ···· अर्चयामास ॥ १६ ॥

प्रसङ्ग—राजहंसस्य एकातपत्रं राज्यं वर्ण्यते।

व्याख्या—ततः = तदन्तरम्, सः = राजहंसः, रत्नाकरमेखला = समुद्ररशनाम्, इलां = धरणीम्, अनन्यशासनां नास्ति अन्यस्य नृपस्य शासनं यस्यां तां, शासत् = पालयन्, अनपत्यतया = सन्तानाभावात्, सकललोकैककारणं = समस्तजनैकहेतुम्, नारायणम् = भगवन्तम् विष्णुम् अहर्निशं = दिवानिशम्, अर्चयामास = पूजयामास ॥ १६ ॥

अथ···· ··· ··· ··· ···· ··· ···अवलोकितवती ॥ १७ ॥

व्याख्या—अथ = तदनन्तरम् कदाचित् = एकदा, तदग्रमहिषी = तस्य राजहंसस्य महाराज्ञी, वसुमती, देवि = भद्रे ! देवेन = भूपेन सह कल्पवल्लीफलं = कल्पलताफलम्, अवाप्नुहि = लभस्व, इति, प्रभातसमये = प्रातःकाले, सुस्वप्नं = शयने दृश्यम्, अवलोकितवती = दृष्टवती ॥ १७ ॥

बन्दी बनाकर पुनः सिंहासन पर बिठा दिया ॥ १५ ॥

उसके पश्चात् मगध आकर राजा राजहंस ससागरा वसुधा का शासन करते हुए निःसन्तान होने के कारण संसार के आदि कारण भगवान् विष्णु की निरन्तर पूजा करने लगे ॥ १६ ॥

कुछ दिनों के वाद उनकी महारानी ने एक दिन प्रातः काल एक स्वप्न देखा जिसमें किसी ने आकर कहा—'हे देवि ! तुम अपने महाराज से कल्पवृक्ष का फल प्राप्त करो ॥ १७ ॥

सा तदा दयितमनोरथपुष्पभूतं गर्भमधत्त । (१८)

राजापि सम्पन्न्यक्कृताखण्डलः सुहृन्नृपमण्डलं समाहूय निजसम्पन्मनोरथानुरूपं देव्याः सीमन्तोत्सवं व्यधत्त । (१९)

एकदा हितैः सुहृन्मन्त्रिपुरोहितैः सभायां सिंहासनासीनो गुणैरहीनो ललाट-

---

सा ... . अधत्त ॥ १८ ॥

प्रसङ्ग—वसुमत्याः गर्भधारणं कथ्यते ।

व्याख्या—सा = अग्रमहिषी, तदा = तस्मिन्काले, दयितमनोरथपुष्पभूतम् = वल्लभस्य पुत्रप्राप्तिरूपस्याभिलापस्य कुसुममिव, गर्भम् = उदरस्थशिशुबीजम्, अधत्त = दधार ॥ १८ ॥

राजापि ... ... व्यधत्त ॥ १९ ॥

प्रसङ्ग—गर्भधारणानन्तरं राज्ञा सम्पाद्यमानः संस्कारः कथ्यते ।

व्याख्या—राजापि—राजहंसोऽपि, सम्पन्न्यक्कृताखण्डलः = समृद्ध्या तिरस्कृतेन्द्रः, सुहृन्नृपमण्डलं = मित्रभूतनृपसमूहम्, समाहूय = आकार्य, निजसम्पन्मनोरथानुरूपं = आत्माभिलाषस्य तुल्यम्, सीमन्तोत्सवं = संस्कारविशेषम्, व्यधत्त = चकार ॥ १९ ॥

एकदा ....इति ॥ २० ॥

प्रसङ्गः—गुप्तचरस्य आगमनम् वर्ण्यते ।

व्याख्या—एकदा = एकस्मिन् समये, हितैः = हितसाधकैः, सुहृन्मन्त्रिपुरोहितैः = प्रियपात्रैः सह सभायां = समितौ, सिंहासनासीनः = राजासने स्थितः, गुणैः = सम्राड्गुणैः शौर्यादिभिः, अहीनः = अन्यूनः (राजहंसः) ललाटतटन्यस्ताञ्जलिना

तब उस महारानी ने पति के मनोरथ फल के पुष्पतुल्य गर्भ को धारण किया ॥ १८ ॥

अपनी सम्पत्ति से इन्द्र को भी तिरस्कृत करने वाले महाराज ने मित्र राजागणों को बुलाकर रानी का सीमन्तोत्सव संपन्न किया ॥ १९ ॥

एक दिन महाराजा जब अपनी सभा में मंत्रियों, पुरोहितों आदि के सहित विराजमान थे तभी द्वारपाल ने आकर साष्टाङ्ग प्रणाम करके निवेदन किया—

तदन्यस्ताञ्जलिना द्वारपालेन व्यज्ञापि-'देव ! देवसन्दर्शनलालसमानसः कोऽपि देवेन विरच्यार्चनार्हो यतिर्द्वारदेशमध्यास्ते' इति। (२०)

तदनुज्ञातेन तेन संयमी नृपसमीपमनायि। (२१)

भूपतिरायान्तं तं विलोक्य सम्यग्ज्ञाततदीयगूढचारभावो निखिलमनुचर-

---

= भालप्रदेशे बद्धपाणिद्वयेन द्वारपालेन = द्वाः स्थेन, न्यवेदि—व्यज्ञापि, देव ! नाथ ! देवसन्दर्शनलालसमानसः = भवतोऽवलोकनाभिलाषी कोऽपि = कश्चित्, देवेन = भवता, विरच्यां = कर्त्तव्यां, अर्चनां = पूजामातिथ्यसत्कारम् अर्हति इति एतादृशः यतिः = संन्यासी, द्वारदेशं = बहिः, अध्यास्ते = वर्तते ॥ २० ॥

विशेषः—यमकसौन्दर्यम् स्पृहणीयमत्र गद्यांशे।

तदनुज्ञातेन ... ... अनायि ॥ २१ ॥

प्रसङ्गः—गुप्तचरस्य यतेः उपस्थितिः वर्ण्यते।

व्याख्या—तदनुज्ञातेन = राजहंसानुमतेन, तेन = द्वारपालेन, सः = पूर्वसंसूचितः, (संन्यासी) संयमी = तपस्वी, नृपसमीपम् = भूपसंनिकटम्, अनायि= प्रापितः ॥ २१ ॥

भूपतिरायान्तम् .... इति ॥ २२ ॥

प्रसङ्ग—गुप्तचरराज्ञोः सम्मेलनं वर्ण्यते।

व्याख्या—भूपतिः = महाराजराजहंसः, आयान्तं = आगच्छन्तम् तं = यतिनम्, विलोक्य = वीक्ष्य, सम्यग्ज्ञाततदीयगूढचारभावः—सम्यक् = सुष्ठु, ज्ञातः = अवगतः, तदीयः = यतिनः गूढः = गोपनीयः, चारभावः = पस्पशभावः येन सः तथोक्तः राजा, निखिलं = सकलम्, अनुचरनिकरम् = सेवकसमूहम्, विसृज्य =

महाराज एक पूजनीय संन्यासी द्वार पर उपस्थित है ॥ २० ॥

राजा की आज्ञा के अनुसार द्वारपाल ने उस संन्यासी को राजसभा में उपस्थित किया ॥ २१ ॥

राजा ने उस संन्यासी को आता देखकर, उसका गुप्तचर स्वरूप समझ लिया और वहाँ से सभी नौकरों को हटा दिया। मंत्रियों के साथ प्रणाम करते हुए संन्यासी से हँसकर पूछा—"यतिवर ! इस प्रच्छन्न वेश में देशान्तर में भ्रमण

निकरं विसृज्य मन्त्रिजनसमेतः प्रणतमेनं मन्दहासमभाषत—'ननु तापस ! देशं सापदेशं भ्रमन्भवांस्तत्र तत्र भवदभिज्ञातं कथयतु' इति। (२२)

तेनाभाषि भूभ्रमणबलिना प्राञ्जलिना—'देव ! शिरसि देवस्याज्ञामादायैनं निर्दोषं वेषं स्वीकृत्य मालवेन्द्रनगरं प्रविश्य तत्र गूढतरं वर्तमानस्तस्य राज्ञः समस्तमुदन्तजातं विदित्वा प्रत्यागमम्। (२३)

उत्सृज्य, मन्त्रिजनसमेतः = सचिवेन सहितः, नृपः प्रणतं = विनम्रम्, एनं = यतिम्, मन्दहासं = ईषद्धसन्, अभाषत = अवदत्, ननु तापस ! = भो तपस्विन्, देश = स्थान्-स्थानम्, सापदेशं = सकपटम्, भ्रमन् = परिभ्रमत्, तत्र-तत्र = स्थानेषु, भवदभिज्ञातं = स्वताऽवगतम् (वृत्तम्) कथयतु = वर्णयतु ।। २२ ।।

विशेषः—अत्र कौतूहलमुत्पाद्य कविना कथाविस्तारोपक्रमः कृतः।

तेनाभाषि ... ... प्रत्यागमम् ।। २३ ।।

प्रसङ्गः—गुप्तचरेण यतिना प्राप्तं वृत्तं राजानं प्रति कथ्यते।

व्याख्या—भूभ्रमणबलिना = पृथ्वीपर्यटनसमर्थेन, प्राञ्जलिना = बद्धाञ्जलिना, तेन = सन्यासिना, अभाषि = निगदितम्, देव ! महाराज ! देवस्य = भवतः, आज्ञां = आदेशम्, शिरसि = मस्तके आदाय = धृत्वा, एनं = प्रत्यक्षम्, दोषरहितं = निर्दोषम्, वेषं = स्वरूपम्, स्वीकृत्य = निर्माय, मालवेन्द्रनगरं = मानसारपुरम् प्रविश्य = गत्वा, तत्र = तस्मिन् नगरे, गूढ़तरं = प्रच्छन्नतरम्, वर्तमानः = विराजमानः, तस्य राज्ञः = तत्रस्थ भूपतेः मानसारस्य, समस्तं = सकलम्, उदन्तजातं = समाचारम्, विदित्वा = ज्ञात्वा, प्रत्यागमम् = प्रतिनिवृत्तः, अहमिति आक्षेप्यः ।।

करते हुए आपने जो कुछ देखा-सुना हो, उसे प्रकट करें ।। २२ ।।

पृथ्वी भ्रमण में समर्थ उस संन्यासी ने हाथ जोड़कर कहना प्रारम्भ किया—महाराज ! आपकी आज्ञा से इस निर्दोष वेश को धारण करके मालवेश मानसार के राज्य में गया। वहाँ गुप्तरूप से निवास करता हुआ उस राजा का समस्त समाचार जानकर लौटा हूँ ।। २३ ।।

मानी मानसारः स्वसैनिकायुष्मत्तान्तराये संपराये भवतः पराजयमनुभूय वैलक्ष्यलक्ष्यहृदयो वीतदयो महाकालनिवासिन कालीविलासिनमनश्वरं महेश्वरं समाराध्य तपः प्रभावसन्तुष्टादस्मादेकवीरारातिघ्नीं भयदां गदां लब्ध्वाऽत्मानमप्रतिभटं मन्यमानो महाभिमानो भवन्तमभियोक्तुमुद्युङ्क्ते। ततः परं देव एव प्रमाणम्' इति। (२४)

मानी ... . प्रमाणम् इति ॥ २४ ॥

प्रसङ्गः—गुप्तचरः मानसारस्य समाचारं राजहंसं श्रावयति।

व्याख्या—मानी = स्वाभिमानी, मानसारः=मालवपतिः, स्वसैनिकानाम् = निजवीराणाम्, आयुष्यमत्तान्तराये = संहारकारिणि, सम्पराये = संग्रामे, भवतः = त्वत्तः पराजयं = पराभवम्, अनुभूय = अनुमान्य, वैलक्ष्यलक्ष्यहृदयः = लज्जितः, वीतदयः = निर्दयः, महाकालनिवासिनं = उज्जयिनीनिवासिनम्, कालीविलासिनं = उमावल्लभम्, अनश्वरं = विनाशरहितम्, महेश्वरं = शंकरम्, समाराध्य = समर्च्य, तपःप्रभावात् संतुष्टात् = तपस्याबलेन प्रीतात्, अस्मात् = महाकालेश्वरात्, एकवीरारातिघ्नीम् = एकं = प्रमुखम्, वीरं = बलिनम्, वीरम् = रिपुम्, हन्तीति तां तथाभूताम्, भयदां = भयप्रदाम्, गदां = अस्त्रविशेषम् लब्ध्वा = प्राप्त्वा, आत्मानं = निजम्, अप्रतिभटं = विगतप्रतिद्वन्द्विनम्, मन्यमानः महाभिमानी = महाहङ्कारः, भवन्तं = श्रीमन्तम्, अभियोक्तुं = आक्रमितुम्, उद्युङ्क्ते = उद्यतो भवति, अतः परं = अस्मादतिरिक्तम् देवः = भवानेव, प्रमाणम् = करणीयनिर्णायकः इति = एवम् ॥ २४ ॥

परम घमण्डी मानसार सैन्यसंहारक युद्ध में आपसे पराजित होकर शर्मिन्दा हो गया। उससे उसे कुछ ग्लानि हुई और महाकाल शङ्कर की आराधना करने लगा। आराधना से प्रसन्न होकर भगवान् शिव ने उसे वीर शत्रु के सेनापति को मारने वाली एक गदा दी है। उस गदा के कारण अभिमान में चूर्ण होकर वह आप पर चढ़ाई करने की तैयारी कर रहा है। अब क्या करना चाहिए, आप स्वयं सोचें ॥ २४ ॥

तदालोच्य निश्चिततत्कृत्यैरमात्यै राजा विज्ञापितोऽभूत्—देव, निरुपायेन देवसहायेन योद्धुमरातिरायाति। तस्मादस्माकं युद्धं सांप्रतमसाम्प्रतम्। सहसा दुर्गसंश्रयः कार्यः' इति। (२५)

तैर्बहुधा विज्ञापितोऽप्यखर्वेण गर्वेण विराजमानो राजा तद्वाक्यमकृत्यमित्यनादृत्य प्रतियोद्धुमना बभूव।

तदा ....कार्यः इति ॥ २५ ॥

प्रसङ्गः—गुप्तचरस्य कथनं श्रुत्वा मंत्रिणामुक्तिः कथ्यते।

व्याख्या—तत् = गुप्तचरेणोक्तम्, आलोच्य = विमृश्य, निश्चिततत्कृत्यैः = निश्चितं निर्णीतं तत् शत्रुविषयकं कृत्यं करणीयं यैस्ते तैः तथोक्तैः, अमात्यैः = मन्त्रिभिः, राजा = राजहंसः, विज्ञापितः = आवेदितः अभूत् = बभूव। देव ! = राजन्, निरुपायेन = उपायरहितेन, देवसहायेन = देवः ईश्वरः एव सहायः सहयोगी तेन तथाविधेन देवबलेन, अरातिः = रिपुः, योद्धुं = प्रहर्तुम्, आगच्छति = आयाति, तस्मात् हेतोः; अस्माकं = मगधदेशसैनिकानाम्, युद्धं = संग्रामः, साम्प्रतं = अधुना, असाम्प्रतम् = अनुचितम्, सहसा = अकस्मात्, दुर्गसंश्रयः = दुर्गप्रवेशः, कार्यः = आवश्यकः ॥ २५ ॥

तैर्बहुधा.... ....बभूव ॥ २६ ॥

प्रसङ्गः—मन्त्रिणां कथनं श्रुत्वा राज्ञः मनःस्थितिः वर्ण्यते।

व्याख्या—तैः = अमात्यैः, बहुधा = अनेकविधया, विज्ञापितोऽपि = निवेदितोऽपि, अखर्वेण = अत्यधिकेन, गर्वेण = दर्पेण, विराजमानः = ऊर्जितः, राजा = राजहंसः; तद्वाक्यं = मंत्रिणां कथनं, अकृत्यं = समाचरितुमयुक्तम् इति, अनादृत्य = तिरस्कृत्य, प्रतियोद्धुमना = संग्रामाभिलाषी बभूव = अभूत् ॥ २६ ॥

— उस गुप्तचर के कथन पर पूर्णतया विचार करके, विवेकशील मंत्रियों ने राजा राजहंस से कहा—"महाराज ! पराजित होने पर शत्रु भगवान् की शरण-सहायता से लड़ने के लिये आ रहा है। इसलिए, हमें इस समय उसके साथ युद्ध न करके दुर्गसंश्रयण करना चाहिए ॥ २५ ॥

मन्त्रियों के अत्यन्त निवेदन करने पर भी राजहंस अभिमानवश उनकी अवज्ञा करके, युद्ध करने के लिए प्रस्तुत हो गया ॥ २६ ॥

शितिकण्ठदत्तशक्तिसारो मानसारो योद्धुमनसामग्रीभूय सामग्रीसमेतोऽक्लेशं मगधदेशं प्रविवेश । (२७)

तदा तदाकर्ण्य मन्त्रिणो भूमहेन्द्रं मगधेन्द्रं कथंचिदनुनीयरिपुभिरसाध्ये विन्ध्याटवीमध्येऽवरोधान्मूलबलरक्षितान्निवेशयामासुः । (२८)

राजहंसस्तु प्रशस्तवीतदैन्यसैन्यसमेतस्तीव्रगत्या निर्गत्याधिकरुषं द्विषं

शितिकण्ठ··· ··· ··· ···· ···· ··· ··· प्रविवेश ॥ २७ ॥

प्रसङ्गः—मानसारस्य मगधमभिलक्ष्य युद्धायागमनं वर्ण्यते ।

व्याख्या—शितिकण्ठदत्तशक्तिसारः = शितिकण्ठेन शङ्करेण दत्ता शक्तिः एव सारः सामर्थ्यम् यस्य सः तथोक्तः मानसारः = मालवेशः योद्धुमनसां = युद्धाभिलाषिणाम्, अग्रीभूय = प्रमुखीभूय, सामग्रीसमेतः = शस्त्रादिसुसज्जितः, अक्लेशं = अनायासम् यथा स्यात्तथा, मगधदेशं = राजहंसनगरं प्रविवेश = प्राप्तः ॥ २७ ॥

तदा ··· ··· ··· ···· ··· ··· ···निवेशयामासुः ॥ २८ ॥

प्रसङ्गः— ससैन्ये मानसारे आगते सति राजहंसेन किं कृतमिति वर्ण्यते ।

व्याख्या—तदा = तस्य प्रवेशानन्तरम्, तत् = प्रवेशसूचनाम्, आकर्ण्य = ज्ञात्वा, मन्त्रिणः = अमात्याः, भूमहेन्द्रं = राजानम्, मगधेन्द्रम् = राजहंसम्, कथंचित् = यत्नपूर्वकम्, अनुनीय = मानयित्वा, रिपुभिः = अरिभिः असाध्ये = दुष्प्रवेश्ये, विन्ध्याटवीमध्ये = विन्ध्यकाननान्तराले, अवरोधान् = राजरमणीः, मूलबलरक्षितान् = मूलबलेन = कुलक्रमागतविश्वस्तसैन्यैः रक्षितान् गुप्तान् कृत्वा, निवेशयामासुः = संस्थापयामासुः ॥ २८ ॥

राजहंसः··· ···· ··· ··· ··· ··· ···· ···रुरोध ॥ २९ ॥

प्रसङ्गः—राजहंसस्य युद्धाय गमनं वर्ण्यते ।

भगवान् शिव से शक्ति प्राप्त करने के कारण मानी मानसार युद्धाग्रणी हुआ, समस्त युद्धसामग्री से युक्त होकर, अनायास ही मगध पर चढ़ आया ॥ २७ ॥

मानसर की चढ़ाई का समाचार सुनकर, मन्त्रियों ने इन्द्रतुल्य बली राजा राजहंस को समझाकर, रानियों को अन्तःपुर की सेना की देख-रेख में विन्ध्याचल के सघन जंगल में भिजवा दिया ॥ २८ ॥

रुरोध । (२९)

परस्परबद्धवैरयोरेतयोः शूरयोस्तदा तदावलोकनकुतूहलागतगगनचराश्चर्यकारणे रणे वर्तमाने जयाकाङ्क्षी मालवदेशरक्षी विविधायुधस्थैर्यचर्याञ्चितसमरतुलितामरेश्वरस्य मगधेश्वरस्य तस्योपरि पुरा पुरारातिदत्तां गदां प्राहिणोत् । (३०)

व्याख्या—राजहंसः = मगधेशस्तु, प्रशस्तवीतदैन्यसैन्यसमेतः = प्रशस्तैः श्लाघ्यैः वीतदैन्यैः = भयरहितैः सैन्यैः = सेनाभिः समेतः = सहितः, तीव्रगत्या = महता जवेन, निर्गत्य = निःसृत्य, अधिकरुषं = अधिका रुट् क्रोधः यस्य सः तं तथाविधं द्विषं = रिपुम् मानसारम् रुरोध = न्यवारयत् ॥ २९ ॥

परस्परम् .... प्राहिणोत् ॥ ३० ॥

प्रसङ्गः—मानसारराजहंसयोः परस्परं युद्धं वर्ण्यते ।

व्याख्या–परस्परं = बद्धं वैरं शत्रुत्वं ययोस्तौ तयोः परस्परबद्धवैरयोः, तयोः = राजहंसमानसारयोः, शूरयोः = वीरयोः, तदा = संग्रामकाले, तस्य = संग्रामस्य, आलोकने = दर्शने, यत् कौतूहलं = कौतुकम् तेन आगतानां = संप्राप्तानाम् गगनचराणां = देवानाम्, आश्चर्यकारणे = विस्मयहेतौ जयाकांक्षी = विजयाभिलाषी, मालवदेशरक्षी = मालवदेशशासकः मानसारः, विविधानां = अनेकप्रकाराणाम्, आयुधानां = युद्धसामग्रीणाम्, स्थैर्यचर्यया = प्रयोगकौशलेन अञ्चिते = समान्विते समरे = संग्रामे तुलितः = समीकृतः, अमरेश्वरः = देवेन्द्रः येन सः तस्य तादृशस्य मगधेश्वरस्य = राजहंसस्य उपरि पुरा = प्राक्, पुरारातिदत्तां = शिवप्रदत्ताम्, गदाम् = अस्त्रविशेषम्, प्राहिणोत् = प्राहरत् ॥ ३० ॥

और राजहंस ने परम वीर सैनिकों से सुसज्जित सेना लेकर अत्यन्त शीघ्रतापूर्वक किले से निकल कर क्रुद्ध मानसर की सेना को घेर लिया ॥ २९ ॥

एक दूसरे के शत्रु बने उन दोनों (राजहंस और मानसार) वीरों के युद्ध को देखने के लिए आकाश में स्थित देवताओं को विस्मय होने लगा । लड़ते-लड़ते अन्त में जयाभिलाषी मानसार ने, इन्द्रतुल्य पराक्रमी राजहंस पर शङ्कर-प्रदत्त गदा चला दी ॥ ३० ॥

निशितशरनिकरशकलीकृतापि सा पशुपतिशासनस्यावन्ध्यतया सूतं निहत्य रथस्थं राजानं मूर्छितमकार्षीत् । (३१)

ततो वीतप्रग्रहा अक्षतविग्रहा वाहा रथमादाय दैवगत्यान्तःपुरशरण्यं महारण्यं प्राविशन् । (३२)

मालवनाथो जयलक्ष्मीसनाथो मगधराज्यं प्राज्यं समाक्रम्य पुष्पपुरमप्य-

---

निशित ... ... मूर्च्छितमकार्षीत् ॥ ३१ ॥

प्रसङ्गः—मानसारशस्त्रैः आहतस्य राजहंसस्य दशा वर्ण्यते ।

व्याख्या—निशितेन = तीक्ष्णेन, शरनिकरेण = सायकसमूहेन, शकलीकृता = विखण्डिताऽपि, सा = गदा, पशुपतेः = शङ्करस्य शासनस्य = आज्ञायाः अवन्ध्यतया = अव्यर्थतया सूत्तं = सारथिनम्, निहत्य = व्यापाद्य, रथस्थं = रथोपरि विराजमानम्, राजानम् = राजहंसम्, विसंज्ञितं = संज्ञाशून्यम्, अकार्षीत् = अकरोत् ॥ ३१ ॥

ततो .... प्राविशन् ॥ ३२ ॥

प्रसङ्गः—आहतराजहंसस्म युद्धक्षेत्रात् अश्वानां पलायनं वर्ण्यते ।

व्याख्या—ततः = सूतनिधनानन्तरम्, वीतप्रग्रहाः = मुक्तरश्मयः ('बेलगाम' इति भाषायाम्) अक्षतविग्रहाः = सुरक्षितदेहाः, वाहाः = घोटकाः, रथं = स्यन्दनम्, आदाय = विकृष्य दैवगत्या = भाग्यसंयोगेन, अन्तःपुरशरण्यं = शरणे साधु शरण्यम् अन्तःपुरस्य शरण्यम् = अवरोधरक्षणस्थानम्, महारण्यं = विन्ध्यवनम्, प्राविशन् = प्रविष्टाः ॥ ३२ ॥

मालवनाथः .... अध्यतिष्ठत् ॥ ३३ ॥

प्रसङ्गः—मानसारस्य पुष्पपुरे अधिकारः वर्ण्यते ।

व्याख्या—मालवनाथः = मानसारः, जयलक्ष्मीसनाथः = विजयश्रीसहितः

राजहंस के तीक्ष्ण बाणों से खण्डित होकर भी उस गदा ने, शङ्कर के वरदान के कारण सारथी को मारकर रथस्थ राजा को मूर्च्छित कर दिया ॥ ३१ ॥

सारथी के मरने पर भी बाल-बाल बचे बेलगाम घोड़े भाग्यवश रथ को उसी वन में ले गये जिसमें रानियों ने शरण ली थी ॥ ३२ ॥

तिष्ठत् । (३३)

तत्र हेतिततिहतिश्रान्ता अमात्या दैवगत्यानुत्क्रान्तजीविताशान्तवात-लब्धसंज्ञाः कथंचिदाश्वस्य राजानं समन्तादन्वीक्ष्यानवलोकितवन्तो दैन्यवन्तो देवीमवापुः । (३४)

वसुमती तु तेभ्यो निखिलसैन्यक्षतिं राज्ञोऽदृश्यत्वं चाकर्ण्योद्विग्नाशोक-

---

प्राज्यं = विशालम्, मगधराज्यम् = राजहंसराज्यम्, समाक्रम्य = सकुशलं क्रान्त्वा, पुष्पपुरं = पाटलिपुत्रम्, अध्यतिष्ठत् = न्यवसत् ।। ३३ ।।

तत्र ... ... अवापुः ।। ३४ ।।

प्रसङ्गः—राजहंसस्य मंत्रिणां दशा वर्ण्यते ।

व्याख्या—तत्र = विन्ध्यवनान्तरे, हेतिततिहतिश्रान्ताः = हेतीनां अस्त्राणां ततिभिः समूहैः हत्या प्रहारेण श्रान्ताः शिथिलाः, अमात्याः = मन्त्रिणः, दैवगत्या= प्रारब्धसंयोगेन, अनुत्क्रान्तजीविताः = न उत्क्रान्तं निर्गतं जीवितं जीवनं येषां ते जीवितसंयुक्ताः, निशान्ते = प्रभाते यो वायुः पवनः तेन निशान्तवातेन, लब्ध-संज्ञाः = प्राप्तचेतनाः, कथंचिदाश्वस्य = स्वतः मनोबलेन आश्वासनं प्राप्य राजानं राजहंसम्, समन्तात् = चतुर्दिक्षु, अनवलोकितवन्तः = अदृष्टवन्तः, दैन्यवन्तः = भृशं दुःखिताः, देवीम् राजराज्ञीं वसुमतीम् अवापुः = प्रापुः ।। ३४ ।।

वसुमती .... व्यधत्त ।। ३५ ।।

प्रसङ्गः—राजहंसस्य युद्धे पराजयं तस्य च अदर्शनं श्रुत्वा वसुमत्याचरणं वर्ण्यते ।

व्याख्या—वसुमती = राजमहिषी, तेभ्यः = अमात्येभ्यः, निखिलसैन्यक्षतिम्=

(इधर) विजयश्री से युक्त मालवेश मानसार विशाल मगध राज्य को जीत-कर पुष्पपुर लौट गये ।। ३३ ।।

संग्राम में शस्त्रास्त्रों के प्रहार से श्रान्त मन्त्री भाग्यवश जीवित रहते हुए, प्रातःसमीर से कुछ स्वस्थ होकर, राजा को चारों ओर ढूंढते बिलखते हुए अत्यन्त खिन्नावस्था में, महारानी के पास (वन में) पहुँचे ।। ३४ ।।

महारानी वसुमती ने, मंत्रियों से, समस्त सैन्य-विनाश और राजा का न

सागरमग्ना रमणानुगमने मतिं व्यधत्त । (३५)

'कल्याणि, भूरमणमरणमनिश्चितम् । किञ्च दैवज्ञकथितो मथितोद्धतारातिः सार्वभौमोऽभिरामो भविता सुकुमारः कुमारस्त्वदुदरे वसति । तस्मादद्य तव मरणमनुचितम्' इति भूषितभाषितैरमात्यपुरोहितैरनुनीयमानया तया क्षणं क्षण हीनया तूष्णीमस्थायि । (३६)

= सम्पूर्णसेनाविनाशम्, राज्ञः = भूपतेः च, अदृश्यत्वं = अप्राप्तिम् आकर्ण्य= श्रुत्वा उद्विग्ना = संव्यथिता, शोकसागरनिमग्ना = पत्युः विरहविषादे ब्रूडिता सती, रमणानुगमने = पत्यनुसरणे, मतिं = बुद्धिम्, व्यधत्त = निश्चितवती ॥ ३५ ॥

कल्याणि .... तूष्णीमस्थायि ॥ ३६ ॥

प्रसङ्गः—रमणानुगमनं कर्तुं समुद्यतां वसुमतिं प्रति मंत्रिणां कथनं वर्ण्यते ।

व्याख्या—कल्याणि ! —मंगलमयि, भूरमणमरणम् = भूपतेः मरणं= मृत्युः, अनिश्चितम् = संशयग्रस्तम्, किञ्च = अपि च, दैवज्ञकथितैः = ज्योतिषिकैः व्याहृतः = आदिष्टः; माथितोद्धतारातिः = मथितः = विनष्टीकृतः उद्धतः प्रचण्डः शत्रुः रिपुः येन सः तथोक्तः सार्वभौमः = शाश्वच्चक्रवर्ती, अभिरामः = सुन्दरः, सुकुमारः = मसृणः, कुमारः = अर्भकः, त्वदुदरे = तव गर्भे, वसति = विद्यते, तस्मात् = गर्भधारणात्, अद्य = साम्प्रतम्, तव = भवत्याः, मरणं मृत्युः, अनुचितं = अनर्थकम्, इति = इत्थम्. भूषितभाषितं = मधुरं भाषणं येषां ते तादृशैः, अमात्यपुरोहितैः = सचिवपुरोहितैः, अनुनीयमानया = प्रार्थ्यमानया तया = राजमहिष्या, क्षणं = मुहूर्तम्, क्षणहीनया = क्षणेन उत्सवेन हीना रहिता = उत्सवरहितया, तूष्णीम् = मौनम्, अस्थायि = स्थितम् ॥ ३६ ॥

मिलना सुनकर अत्यन्त विकल होती हुई, सती होने का विचार किया ॥ ३५ ॥

(सती धर्म-पालन के लिए उद्यत रानी को देखकर मंत्री समझाने लगे)—हे देवी !, महाराज की मृत्यु का अभी कोई निश्चय नहीं है । ज्योतिर्विदों के कथनानुसार आपके गर्भ में शत्रुजयी पुत्र विराजमान है । अतः आपका प्राणत्याग उचित नहीं । महारानी मन्त्रियों और अमात्यों के इस प्रकार समझाने पर मौन होकर बैठ गई ॥ ३६ ॥

अथार्धरात्रे निद्रानिलीननेत्रे परिजने विजने शोकपारावारमपारमुत्तर्तु-मशक्नुवती सेनानिवेशदेशं निःशब्दलेशं शनैरतिक्रम्य यस्मिन् रथस्य संसक्ततया तदानयनपलायनश्रान्ता गन्तुमक्षमाः क्षमापतिरथ्याः पथ्याकुलाः पूर्वमतिष्ठं-स्तस्य निकटवटतरोः शाखायां क्षुतिरेखायामिव क्वचिदुत्तरीयार्द्धेन बन्धनं मृति-साधनं विरच्य मर्तुकामाभिरामा वाङ्माधुरीविरसीकृतकल-कण्ठ-कण्ठा साश्रुकण्ठा

अथार्धरात्रे ... ... भवतु इति ॥ ३७ ॥

प्रसङ्ग—वसुमत्याः रात्रौ शिविरात् निर्गत्य वनगमनं वर्ण्यते ।

व्याख्या—अथ = अनन्तरम्, अर्धरात्रे = निशीथे, निद्रानिलीनत्रे = निद्रया सुषुप्त्या निलीने परिमीलिते नेत्रे लोचने यस्य सः तस्मिन्, प्रसुप्ते, परिजने = सेवके, विजने = शून्ये, शोकपारावारं = शोकसिन्धुम्, अपारं = दुर्ल्लंघ्यम्, उत्तर्तुं = अतिक्रमितुम्, अशक्नुवती = असमर्था सती, सेनानिवेशदेशं = सैन्य-शिविरम्, निःशब्दलेशं = नास्ति शब्दस्य लेशः लवोऽपि यस्मिंस्तत् यथा स्यांत्तथा विगतपदध्वनिम् शनैः = मन्दम्, अतिक्रम्य = निःसृत्य, यस्मिन् = वटवृक्षे, रथस्य = स्यन्दनस्य, संसक्ततया = संल्लग्नतया, तदानयनपलायनश्रान्ता = तस्य = राज्ञः राजहंसस्य आनयने पलायनकालिके वहने श्रान्ताः क्लान्ताः अतएव गन्तुमक्षमा = चलितुमसमर्थाः क्षमापतिरथ्याः = राजहंसरथवाहकाः, अश्वाः, पथि मार्गे, व्याकुलाः = दूरतः चलनात् श्रान्ताः, पूर्वं = प्राक्, अतिष्ठन् = स्थिता आसन्, तस्य निकटवटतरोः = पार्श्वस्थ वटवृक्षस्य, शाखायां = शिफायाम्; मृतिरेखायां = मृत्युचिन्हरूपायाम्, क्वचित् = कुत्रचित्, उत्तरीयार्द्धेन = अञ्चलेन, बन्धनं = पाशम्, मृतिसाधनं = मरणोपायम्, विरच्य = विधाय, मर्त्तुकामा = मरणाभिलाषिणी, अभिरामा = अपूर्व सुन्दरी, वाचां = वाणीनाम् माधुर्यमार्दवेन विरसीकृतः = अधरीकृतः कलकण्ठस्य = पिकस्य कण्ठः स्वरः यया सा तथोक्ता,

---

इसके बाद, अर्धरात्रि में, शोकाकुल महारानी सेवकों के सो जाने पर, चुपके पाँव चलती हुई शिविर को पार करके उस स्थान पर पहुँच गयी, जहाँ राजा को लिये हुए घोड़े, रथ के पहियों के कीचड़ में फँस जाने के कारण असमर्थ होकर रुके पड़े थे। परम सुन्दरी रानी उसी रथ के निकट मृत्यु की रेखा सी प्रतीत

व्यलपत्—'लावण्योपमितपुष्पसायक, भूनायक, भवानेव भाविन्यपि जन्मनि वल्लभो भवतु' इति। (३७)

तदाकर्ण्य नीहारकरकिरणनिकरसंपर्कलब्धावबोधो मागधोऽगाधरुधिरविक्षरणनष्टचेष्टो देवीवाक्यमेव निश्चिन्वानस्तन्वानः प्रियवचनानि शनैस्ता-

---

साश्रुकण्ठा = अश्रुभिः सह वर्तते अतिसाश्रुः साश्रुः कण्ठों यस्याः सा गद्गदकण्ठा, व्यलपत् = क्रन्दितवती, लावण्योपमितपुष्पसायकः = लावण्येन = शरीरसौष्ठवेन उपमितः तुलितः पुष्पसायकः कामदेवः येन सः तत्सबुद्धौ, भूनायक = भूपते भवान् एव = श्रीमान् एव भाविनि = आगामिनि, जन्मनि = जनने, वल्लभः = पतिः, भवतु = जायताम्, इति = इत्थम् ॥ ३७ ॥

विशेषः—अत्र विप्रलम्भश्रृङ्गारः रूपकालङ्कारश्च द्रष्टव्यौ।

ललिता च पदशय्या।

तदाकर्ण्य ··· ··· ··· ··· ···· आह्वयत् ॥ ३८ ॥

प्रसङ्गः—मरणोद्यतायाः वसुमत्याः विलापं श्रुत्वा समीपस्थराज्ञः निर्णयः वर्ण्यते।

व्याख्या—तत् = विलापम्, आकर्ण्य = श्रुत्वा, नीहारकस्य = चन्द्रमसः किरणानां = रश्मीनां यो निकरः समूहः तस्य सम्पर्केण संसर्गेण लब्धः प्राप्तः अवबोधः चैतन्यं येन सः तथाभूतः, मागधः = मगधस्य मगधेशः, अगाधरुधिरविक्षरणनष्टचेष्टः = अगाधस्य अत्यधिकस्य रुधिरस्य रक्तस्य विक्षरणेन निःसरणेन नष्टा गता चेष्टा चैतन्यम् यस्य सः, देवीवाक्यम् = वसुमतीवचनम् एव (अयं

होने वाली एक वट वृक्ष की शाखा में अपनी चादर बाँधकर फाँसी लगाने के लिए तैयार हो गईं। उस समय वे अपने कोकिलकण्ठ को तिरस्कृत करनेवाले कण्ठ से विलाप करती हुई कहने लगीं—हे कामदेव के सदृश सुन्दर महाराज! अगले जन्म में (भी) आप ही मेरे पति हों ॥ ३७ ॥

वसुमति के विलापयुक्त कथन को सुनकर अत्यधिक रक्त निकल जाने से मूच्छित,. (किन्तु, इस समय चन्द्रमा की शीतल रश्मियों से कुछ सचेत होते हुए राजहंस ने समझ लिया कि यह करुण क्रन्दन मेरी रानी वसुमती का ही है। पुनः

माह्वयत् । (३८)

सा ससंभ्रममागत्यामन्दहृदयानन्दसंफुल्लवदनारविन्दा तमुपोषिताभ्यामिवानिमिषिताभ्यां लोचनाभ्यां पिबन्ती विकस्वरेण स्वरेण पुरोहितामात्यजनमुच्चैराहूय तेभ्यस्तमदर्शयत् । (३९)

राजा निटिलतटचुम्बितनिजचरणाम्बुजैः प्रशंसितदैवमाहात्म्यैरमात्यै-

---

विलापः) इति निश्चिन्वानः = निश्चयं कुर्वन्, प्रियवचनानि = मधुरालापान्, तन्वानः = विस्तारयन्, शनैः = मन्दम्, तां = राजमहिषीम्, आह्वयत् = आकारयत् ॥ ३८ ॥

विशेषः—अत्र क-र-ध-ट-न वर्णानां साम्ये चमत्कारादनुप्रासः ॥

सा ... . अदर्शयत् ॥ ३९ ॥

प्रसङ्गः—राजः वसुमत्याः अमात्यानाञ्च परस्परं सम्मेलनं वर्ण्यते ।

व्याख्या—ससम्भ्रमं = शीघ्रमेव, आगत्य = समीपं गत्वा, अमन्देन = अल्पाधिकेन, हृदयानन्देन = मानसाह्लादेन, सम्फुल्लं = विकसितम्, वदनारविन्दं = मुखपद्मम्, यस्याः सा, सा = महिषी वसुमती, तं = राजहंसम्, उपोषिताभ्यां = अत्युत्कण्ठिताभ्यामिव, अनिमिषिताभ्यां = निर्निमेषाभ्याम् लोचनाभ्यां = दृग्भ्याम्, पिबन्ती = प्रेम्णा विलोकयन्ती विकस्वरेण = उच्चस्वरेण, पुरोहितामात्यजनं = सचिवपुरोहितम् । उच्चैः आहूय = आकार्य, तेभ्यः = सचिवपुरोहितेभ्यः, तं = मगधेश्वरम्, अदर्शयत् = दर्शितवती ॥ ३९ ॥

विशेषः—हर्षव्यञ्जना । रूपकालङ्कारः । विकासी तु विकस्वरः इत्यमरः ।

राजा ... ... अनयत् इति ॥ ४० ॥

प्रसङ्गः—अमात्याः सहानुभूतिपूर्वकं राजानं वदन्ति ।

उन्होंने अत्यन्त मधुर आवाज में उन्हें बुलाया ॥ ३८ ॥

राजा की आवाज पहचान कर रानी दौड़ती उनके पास पहुँची । उन्हें देखकर उसका मुखकमल खिल गया और कुछ देर तक अनिमेष नेत्रों से देखती रही । पुनः मन्त्रियों एवं पुरोहितों को बुलाकर उनके दर्शन कराये ॥ ३९ ॥

मन्त्रियों ने विनम्रतापूर्वक सिर झुकाकर कहा—"महाराज ! अश्व समूह ने

रभाणि—'देव, रथ्यचयः सारथ्यपगमे रथं रभसादरण्यमनयत्' इति । (४०)

'तत्र निहतसैनिकग्रामे संग्रामे मालवपतिनाराधितपुरारातिना प्रहितया गदया दयाहीनेन ताडितो मूर्छामागत्यात्र वने निशान्तपवनेन बोधितोऽभवम्' इति महीपतिरकथयत् । (४१)

व्याख्या—राजा = राजहंसः निटिलतलेन = मस्तकेन चुम्बितं = संस्पृष्टम्, निजचरणाम्बुजं = स्वपादपद्मम् यैस्तैः, प्रशंसितदैवमाहात्म्यैः = प्रशंसितं शंसितं दैवस्य भाग्यस्य माहात्म्यं गौरवम् यैस्तैः अमात्यैः मन्त्रिभिः अभाणि = अवादि—'देव, महाराज !, रथ्यचयः = अश्वसमूहः, सारथ्यपगमे = सूतस्य विनाशे सति, रथं = स्यन्दनम्, रभसात् = वेगात्, अरण्यं = अटवीम्, अनयत् = नीतवान् ॥४०॥

विशेषः—चरणाम्बुजैरित्यत्रोपमा, रथ्यचयः, सारथ्यः इत्यत्र च यमकं विलोकनीयम् ॥

तत्र ... ... अकथयत् ॥ ४१ ॥

प्रसङ्गः—प्रस्तुतमिदं गद्यखण्डं महाकवि दण्डिविरचित'दशकुमारचरिताख्य-ग्रन्थस्य पूर्वपीठिकायाः प्रथमोच्छ्वासादवतारितमस्ति । अत्र युद्धस्थलात् गुप्तरूपेण निर्गतः राजहंसः युद्धघटनां वर्णयन्नाह—

व्याख्या—तत्र = संघर्षे, निहतसैनिकग्रामे = निहतः निःशेषेण विनष्टः सैनिकानां योद्धानां ग्रामः समुदायः यस्मिन् तस्मिन् संग्रामे = युद्धे, आराधितपुरारातिना = समुपासितशङ्करेण, दयाहीनेन निष्ठुरेण, मालवपतिना = मानसारेण, प्रतिहतया = प्रक्षिप्तया, गदया, ताडितः = प्रघातितः, अहम्, मूर्च्छाम् = संज्ञाशून्यताम्, आगत्य = प्राप्य, अत्रवने = विन्ध्यवने, निशान्तपवनेन = प्राभातिकसमीरेण, बोधितः = सचेतनः, अभवम् = जातः, इति = इत्यम्, महीपतिः = नृपः राजहंसः, अकथयत् = उक्तवान् ॥ ४१ ॥

सारथी के मरणोपरान्त, रथ को शीघ्रतापूर्वक वन में लाया ॥ ४० ॥

मन्त्रियों का कथन सुनने के बाद राजा ने कहा—"युद्ध मे समस्त सेना के समाप्त हो जाने पर, मानसार ने निर्दयतापूर्वक शङ्कर से प्राप्त गदा मुझपर चला दी । उसके प्रहार से बेहोश हुआ मैं इस वन मे आकर प्रातःकालीन समीर से संस्पृष्ट होने पर चेतनासम्पन्न हुआ हूँ ॥ ४१ ॥

ततो विरचितमहेन मन्त्रिनिवहेन विरचितदैवानुकूल्येन कालेन शिविर-मानीयापनीताशेषशल्यो विकसित-निजाननारविन्दो राजा सहसा विरोपितव्रणो-ऽकारि। (४२)

विरोधिदैवधिक्कृतपुरुषकारो दैन्यव्याप्ताकारो मगधाधिपतिरधिकाधि-

---

ततो .... व्रणोऽकारि ॥ ४२ ॥

प्रसङ्गः—राजानं प्राप्य मन्त्रिणामुल्लासं वर्णयति कविः।

व्याख्या -ततः = राज्ञः वृत्तान्तश्रवणानन्तरम्, विरचितमहेन विरचितः कृतः महः उत्सवो येन तेन, मन्त्रिनिवहेन = अमात्यसमूहेन, विरचितदैवानुकूल्येन = विरचितं = सम्पादितम्, दैवस्य = भाग्यस्य आनुकूल्यं = आनुरूप्यम् येन तादृशेन, कालेन = समयेन शिविरं = सैन्यनिवासस्थानम्, आनीय = उपस्थाप्य, अपनीता-शेषशल्यः = अपनीतं शरीराद्दूरीकृतं अशेषं समस्तं शल्यं = शङ्कुः यस्य सः, विकसितनिजाननारविन्दः = प्रसन्नमुखकमलः, राजा = नृपः, सहसा = झटिति विरोपितव्रणः = शोषितक्षताङ्गभागः, अकारि = कृतः ॥ ४२ ॥

विशेषः—राजामन्त्रिणोः सेव्यसेवकभावः परस्परं सद्भावः मन्त्रिणां कर्त्तव्यम् च विलोकनीयम् ॥

विरोधि ... ...समबोधि ॥ ४३ ॥

प्रसङ्गः—विफलपुरुषार्थं खिन्नमानस राजानं प्रति राजमहिष्याः कर्त्तव्यं वर्ण्यते कविना—

व्याख्या—विरोधिना = विपरीतेन, दैवेन = भाग्येन, धिक्कृतः = तिरस्कृतः; पुरुषकारः = पौरुषम् यस्य सः तथोक्तः, दैन्येन = पराजयदुःखेन व्याप्तः आक्रान्तः आकारः स्वरूपम् यस्य सः तादृशः, मगधाधिपतिः = राजहंसः, अधिकाधिः =

राजा को पाने के बाद मन्त्रियों ने बहुत बड़ा उत्सव मनाया। उनके स्वस्थ होने के लिए देव-पूजन किया तथा शिविर में लाकर जड़ी-बूटियों के प्रयोग से घावों को ठीक किया। अब राजा का मुखारविन्द, पूर्ण स्वास्थ्य लाभ करके, खिल उठा ॥ ४२ ॥

पश्चात्, भाग्य की क्रूरता के कारण अपराजित होने से खिन्नहृदय राजा को

रमात्यसंमत्या मृदुभाषितया तया वसुमत्या मत्या कलितया च समबोधि । (४३)

'देव, सकलस्य भूपालकुलस्य मध्ये तेजोवरिष्ठो गरिष्ठो भवानद्य विन्ध्यवनमध्यं निवसतीति जलबुद्बुदसमाना विराजमाना सम्पत्तडिल्लतेव सहसैवोदेति नश्यति च। तन्निखिलं दैवायत्तमेवावधार्य कार्यम् । (४४)

किञ्च पुरा हरिश्चन्द्ररामचन्द्रमुख्या असंख्या महीन्द्रा ऐश्वर्योपमितमहेन्द्रा

अधिकः अतिशयेन अधिकः आधिः मानसी व्यथा यस्य सः अमात्यसंमत्या = सचिवानुमोदनेन, मृदुभाषितया = कोमलालापिन्यां, तया वसुमत्या = राजमहिष्या मत्या = बुद्धया, कलितया = युक्तया, समबोधि = विज्ञापितः ।। ४३ ।।

देव ... ... कार्यम् ।। ४४ ।।

प्रसङ्गः—पूर्वोक्तः एव ।

व्याख्या—देव = स्वामिन् !, सकलस्य = समस्तस्य, भूपालकुलस्य = नृपसमूहस्य, मध्ये, तेजो वरिष्ठः = अत्यन्तप्रतापी, गरिष्ठः = महान् भवान् = श्रीमान्, अद्य = इदानीम्, विन्ध्यवनमध्यं = विन्ध्याटवीमध्यम्, तिष्ठति = वर्तते (राज्यभ्रष्टः) इति जलबुद्बुदसमाना = सलिलस्य विकारेण तुल्या, विराजमाना = शोभमाना, सम्पत् = राज्यश्रीः, तडिल्लतेव = विद्युल्लतेव, सहसा=अकस्मात्, उदेति = प्राप्यते, नश्यति=विनाश्यं च याति, तत् = तस्मात्, निखिलं = सकलम्, सर्वम् वा, दैवायत्तम् = प्रारब्धाधीनम्, एव अवधार्य = निश्चित्य, कार्यं = कर्त्तव्यम् ।। ४४ ।।

विशेषः—अत्र भारतीयसंस्कृतेः दैववादः समर्थितः ।

किञ्च ... ... तावत् इति ।। ४५ ।।

मन्त्रियों ने बहुत समझाया । उन्हें सान्त्वना देते हुए मृदुभाषिणी बुद्धिमती वसुमती ने कहा—।। ४३ ।।

प्राणेश्वर ! समस्त राजाओं में पराक्रम के लिये प्रसिद्ध और परम तेजस्वी आप इस समय विन्ध्यवन में निवास कर रहे हैं । इससे यह सिद्ध होता है कि पानी के बुल्ले की भाँति ऐश्वर्य विद्युत् रेखा की तरह सहसा उदित होकर विलीन हो जाती है। अतः सब कुछ ईश्वराधीन समझ कर ही कार्य करना चाहिए ।। ४४ ।।

दैवतन्त्रं दुःखयन्त्रं सम्यगनुभूय पश्चादनेककालं निजराज्यमकुर्वन्। तद्वदेव भवान्भविष्यति। कंचन कालं विरचितदैवसमाधिर्विगलिताधिस्तिष्ठतु तावत् इति। (४५)

ततः सकलसैन्यसमन्वितो राजहंसस्तपोविभ्राजमानं वामदेवनामानं तपोधनं

प्रसङ्गः—खिन्नमानसं राजानं राजहंसं शान्त्वयन् वसुमती आह—

व्याख्या—किञ्च = अपरञ्च, पुरा = प्राचीनयुगे, त्रेतायुगे, हरिश्चन्द्ररामचन्द्रमुख्याः = हरिश्चन्द्ररामचन्द्रो मुख्यौ प्रधानौ येषां ते तथोक्ताः असंख्याः = अनेकाः महीन्द्राः = चक्रवर्तिनः नृपाः, ऐश्वर्योपमितमहेन्द्राः = सम्पत्त्या तुलितः देवराज इन्द्रः यैस्ते तथोक्ताः, दैवतन्त्रं = प्रारब्धायत्तम्, दुःखयन्त्रम् = विपच्चक्रम् सम्यक् अनुभूय = उपभुज्य, पश्चात् = तदनन्तरम्, बहुकालं = दीर्घसमयम्, निजराज्यं = स्वकीय राज्यस्य शासनम्, कृतवन्तः = अकुर्वन्। तद्वदेव = तथैव, भवान् = श्रीमान् भविष्यति, स्वकीयं राज्यं पुनः प्राप्स्यति। कंचनकालं = किञ्चित् समयम्, विरचितदेवसमाधिः—विरचितः साधितः दैवसमाधिः = ईश्वरोद्देश्यकं ध्यानं येन सः तथोक्तः, विगलिताधिः = विनष्टमानसिकविषादः, तिष्ठतु = प्रतीक्षताम्, तावत् = सुसमयागमनपर्यन्तम् ॥ ४५ ॥

विशेषः—ईश्वरानुरक्ति प्रति दुःखकारणमिति व्यज्यते ॥

ततः ... ... जगाम ॥ ४६ ॥

प्रसङ्गः—भूपतेः प्रयत्नं वर्ण्यते।

व्याख्या—ततः वसुमत्याः आश्वासनानन्तरम्, सकलसैन्यसमन्वितः = समस्तसेनासहितः, राजहंसः = मगधनरेशः, तपोविभ्राजमानं = तपसा विशेषेण देदीप्यमानम् तपोधनम् = तप एव धनं यस्य सः तथोक्तं तापसम्, वामदेवं = वामदेव-

---

महाराज! इतिहास में मिलता है कि पुराने समय में इन्द्र के सदृश सम्पत्तिशाली हरिश्चन्द्र आदि असंख्य राजाओं ने दैववशात् घनघोर दुःख झेले और फिर राज्य किये, वैसे ही आप भी करेंगे। कुछ समय तक धैर्यपूर्वक देवोपसना करें। घबराने की आवश्यकता नहीं है ॥ ४५ ॥

वसुमती के द्वारा आश्वस्त किये जाने के बाद राजा राजहंस अपने मनोरथ की

निजाभिलाषावाप्तिसाधनं जगाम। (४६)

तं प्रणम्य तेन कृतातिथ्यस्तस्मै कथितकथ्यस्तदाश्रमे दूरीकृतश्रमे कञ्चन कालमुषित्वा निजराज्याभिलाषी मितभाषी सोमकुलावतंसो राजहंसो मुनिमभाषत—'भगवन्, मानसारः प्रबलेन दैवबलेन मां निर्जित्य मद्भोग्यं राज्यमनुभवति। तद्वदहमप्युग्रं तपो विरच्य तमरातिमुन्मूलयिष्यामि लोकशरण्येन

नामानम् महर्षिम्, निजाभिलाषावाप्तिसाधनं = स्वकीयमनोरथस्य सम्पादकम्, उपायभूतम् (प्रति) जगाम = अगच्छत् ॥ ४६ ॥

तं ... ... प्राप्नवम् ॥ ४७ ॥

प्रसङ्गः—राजा राजहंसस्य वामदेवमहर्षेः आश्रमगमनं मनोरथनिवेदनञ्च वर्णयति कविः।

व्याख्या—वामदेवमहर्षिम्, प्रणम्य = नत्वा, तेन = महर्षिणा कृतातिथ्यः = कृतं विहितं आतिथ्यं सत्कारः यस्य सः, राजहंसः तस्मै = महर्षये, कथितकथ्यः = कथितं निगदितं कथ्यं उद्देश्यं येन सः, तस्य = वामदेवस्य, आश्रमे = उटजे, दूरीकृतश्रमे = दूरीकृतः अपाकृतः श्रमः परिश्रमः यत्र तस्मिन् कंचनकालम् = किञ्चित् समयम्, उषित्वा = व्यतीत्य, निजराज्याभिलाषी = स्वराज्यकामः, मितभाषी = स्तोकवक्ता, सोमकुलस्य = चन्द्रवंशस्य, अवतंसः = भूषणम्, राजहंसः मुनिं वामदेवं अभाषत = उक्तवान्—'भगवन् ! = स्वामिन्, मानसारः = मालवनरेशः; प्रबलेन = उत्कृष्टेन, दैवबलेन = भाग्येन, मां = राजहंसम्, निर्जित्य =विजित्य, मद्भोग्यं = राजहंस्य भोक्तुंयोग्यम् राज्यं = शासनम् अनुभवति = करोति। तद्वत् = मानसारसमाचरितवत्, उग्रं = प्रघोरम् तपः = ईशाराधनम्, विरच्य = कृत्वा, तं = मानसारम्, अरातिं = रिपुम्, उन्मूलयिष्यामि = उद्वेष्यामि, लोकशरण्येनं = लोकानां जगन्निवासिनां शरणे = संरक्षणे समर्थेन, भव-

---

पूर्ति के लिए परम तपस्वी वामदेव ऋषि के पास गये॥ ४६॥

वामदेव मुनि के आश्रम पर जाकर चन्द्रवंशीय राजा राजहंस ने उन्हें प्रणाम करके अतिथि सत्कार स्वीकार किया और कुछ समय तक बैठने के बाद कहा—

भगवन् ! मानसार ने दैवशक्ति के बल पर मुझे जीतकर मेरे राज्य पर

सवत्कारुण्येनेति नियमवन्तं भवन्तं प्राप्नवम्' इति । (४७)

ततस्त्रिकालज्ञस्तपोधनो राजानमवोचत्—'सखे ! शरीरकार्श्यकारिणा तपसालम् । वसुमतीगर्भस्थः सकलरिपुकुलमर्दनो राजनन्दनो नूनं सम्भविष्यति, कञ्चन कालं तूष्णीमास्स्व' इति । (४८)

गगनचारिण्यापि वाण्या 'सत्यमेतत्' इति तदेवावाचि । राजापि मुनिवाक्य मङ्गीकृत्यातिष्ठत् । (४९)

त्कारुण्येन = श्रीमतः दयया, ईति, अस्माद्धेतोः, नियमवन्तं = तपोऽनुष्ठातारम्, भवन्तं = श्रीमन्तम् त्वां वा, प्राप्नवम् = उपागच्छम् ॥ ४७ ॥

विशेषः—राजहंसस्य विनयशीलता श्लाघ्या । कार्यसिद्ध्यर्थञ्च भारतीय संस्कृतेः प्राणभूतोऽस्ति तप उपायः ॥

ततः ... . तूष्णीमास्स्व इति ॥ ४८ ॥

प्रसङ्गः—राज्ञः राजहंसस्य निवेदनं श्रुत्वा महर्षिः वामदेवो वदति—

व्याख्या—ततः = राज्ञः निवेदनानन्तरम्; त्रिकालज्ञः—सर्वज्ञः भविष्यद्रष्टा वा, तपोधनः = तपःसर्वस्व, महर्षिः वामदेवः, राजानम्, अवोचत् = उक्तवान् । 'सखे ! = राजन् ! शरीरकार्श्यकारिणा = कायःक्लेशकारिणा, तपसा = तपस्यया, अलम् = नास्ति किमपि प्रयोजनम्, वसुमतीगर्भस्थः = वसुमत्याः उदरे वर्तमानः, सकलरिपुदमनः = समस्तशत्रुकुलसंहारकः, राजनन्दनः = राजकुमारः, नूनं = निश्चितम् संभविष्यति = उत्पत्स्यते, कञ्चनकालं तूष्णीं = धैर्यम्, आस्स्व = धारय युद्धस्पृहां त्यज ॥ ४८ ॥

विशेषः—अत्र कवेः दण्डिनः सौकुमार्यसंरक्षणप्रवृत्तिः व्यज्यते ॥

गगनचारिण्या .... अतिष्ठत् ॥ ४९ ॥

अधिकार कर लिया है। अतः मैं भी चाहता हूँ कि आपके द्वारा निर्दिष्ट तप का अनुष्ठान करके उसे पराजित कर दूँ ॥ ४७ ॥

इसके बाद त्रिकालज्ञ महर्षि ने राजा से कहा—राजन् ! शरीरशोषक तपस्या का कोई काम नहीं है। वसुमती के गर्भ में स्थित बालक समस्त शत्रुओं का संहारक होगा। कुछ दिनों तक धैर्य रखो ॥ ४८ ॥

ततः सम्पूर्णगर्भदिवसा वसुमती सुमुहूर्ते सकललक्षणलक्षितं सुतमसूत। ब्रह्म-वर्चसेन तुलितवेधसं पुरोधसं पुरस्कृत्य कृत्यविन्महीपतिः कुमारं सुकुमारं जात-संस्कारेण बालालङ्कारेण च विराजमानं राजवाहननामानं व्यधत्त। (५०)

प्रसङ्गः—महर्षेः वाक्यप्रामाण्यम् विच्छित्तिव्याजेन समर्थ्यते।

व्याख्या—गगनचारिण्या = आकाशवाण्या अपि, 'एतत् = महर्षिणोक्तम्, सत्यं = नृतम्, निश्चितम् वा, इति, तदेव = वामदेवोक्तमेव, अवाचि = कथितम्, राजा = राजहंसः अपि, मुनिवाक्यं = वामदेवस्य कथनम्, अङ्गीकृत्य = उरीकृत्य, अतिष्ठत् = तस्थौ ॥ ४९ ॥

ततः ... ... व्यधत्त ॥ ५७ ॥

प्रसङ्गः—राजहंसस्य पुत्रोत्पत्तिः वर्ण्यते—

व्याख्या—ततः = राज्ञः तपसः विरत्यनन्तरम्ः गते सति काले, सम्पूर्ण-गर्भदिवसा = पूरितगर्भसमया, वसुमती = राजमहिषी, सुमुहूर्ते = प्रशस्तलग्ने, सकललक्षणलक्षितं = शुभराजचिह्नयुक्तम्, सुतं = पुत्रम्, असूत = प्रासोष्ट, ब्रह्म-वर्चसेन = ब्रह्मणः विधेः वर्चः तेजः तेन, तुलितवेधसं = तुलितः समीकृतः वेधा ब्रह्मा येन सः तम्, पुरोधसं = पुरोहितम्; पुरस्कृत्य = सभाजयित्वा, कृत्यवित् = स्मृतिनिरूपितकर्मवेत्ता, महीपतिः = भूपतिः, राजहंसः, सुकुमारं = सुकोमलम्, कुमारं = नवजातशिशुम् स्वपुत्रम्, जातसंस्कारेण = जातकर्मसंस्कारेण, बाला-लङ्कारेण = बालोचिताभूषणेन, च, विराजमानं = शोभमानम्, राजवाहननामानं राजवाहन इति नाम संज्ञा यस्य स तं राजवाहनसंज्ञकम् व्यधत्त = कृतवान् ॥५०॥

विशेषः—कवेः धर्मशास्त्रज्ञानं धर्मनिष्ठा च ज्ञातव्ये ॥

उसी समय यह आकाशवाणी भी हुई—'मुनि सत्य कहते हैं' और राजा भी मुनि के कथन पर विश्वास करके मौन हो गए ॥ ४९ ॥

कुछ दिनों के बाद गर्भ पूर्ण होने पर (९वें मास में) रानी वसुमती ने शुभ लग्न में सर्वलक्षणसम्पन्न पुत्र को जन्म दिया। कृत्यवेत्ता राजा ने ब्रह्मा के तुल्य अपने पुरोहितों के साक्ष्य में उस नवजात शिशु के जातकर्मादि संस्कार करके आभूषणों से युक्त किया और उसका नाम 'राजवाहन' रख दिया ॥ ५० ॥

तस्मिन्नेव काले सुमतिसुमित्रसुमन्त्रसुश्रुतानां मन्त्रिणां प्रमतिमित्रगुप्त-मन्त्रगुप्तविश्रुताख्या महाभिख्याः सूनवो नवोद्यदिन्दुरुचश्चिरायुषः समजायन्त। राजवाहनो मन्त्रिपुत्रैरात्ममित्रैः सह बालकेलीरनुभवन्नवर्धत। (५१)

अथ कदाचिदेकेन तापसेन रसेन राजलक्षणविराजितं कञ्चिन्नयनानन्दकरं सुकुमारं कुमारं राज्ञे समर्प्यावोचि --भूवल्लभ, कुशसमिदानयनाय वनं गतेन मया काचिदशरण्या व्यक्तकार्पण्याश्रु मुञ्चन्ती वनिता विलोकिता। (५२)

तस्मिन्नेव .... अवर्धत् ॥ ५१ ॥

प्रसङ्गः—राजवाहनस्य वैलक्षण्यं प्रदर्श्यते बालक्रीड़ा च वर्ण्यते।

व्याख्या—तस्मिन्नेव काले=राजवाहनस्यजन्मसमये, सुमतिसुमित्रसुमन्त्र-सुश्रुतानां मन्त्रिणां प्रमतिः, मित्रगुप्तः, मन्त्रगुप्तः विश्रुताख्याः महाभिख्याः = महती शोभा येषां ते, अत्यन्तशोभाशालिनः, सूनवः = तनयाः, नवः नूतनः उद्यन् = उदयं गच्छन् य इन्दुः शशाङ्कः तस्य रुक् इव रुक् कान्तिः येषां ते नवोद्यदिन्दुरुचः, चिरायुषः = दीर्घजीविनः, समजायन्त = उत्पन्ना बभूवुः, राज-वाहनः = राजहंससुतः मन्त्रिपुत्रैः = अमात्यसुतैः, आत्ममित्रैः = स्वसुहृद्भिः सह = साकम्, बालकेलीः=बालक्रीडाः, अनुभवन् = कुर्वन्, अवर्धत् = वृद्धिं प्राप्तः ।५१।

अथ .... विलोकिता ॥ ५२ ॥

प्रसङ्गः—अनाथस्त्रीसम्बन्धिवृत्तान्तं प्रस्तूयते।

व्याख्या—अथ = तत्पश्चात्ः, कदाचित् = एकदा, एकेन तापसेन = तप-स्विना, रसेन = प्रेम्णा, राजलक्षणविराजितं = राज्ञः नृपस्य लक्षणेन चिन्हेन (चक्रादिभिः) विराजितं शोभमानम्, कञ्चित् = एकम्, नयनानन्दकरं = सुन्दरम्, सुकुमारं = मसृणम्, कुमारं = बालकम्, राज्ञे = मगधेश्वराय, समर्प्य = दत्त्वा, अवोचि = अवदत्। 'भूवल्लभ ! = पृथ्वीपते !, कुशसमिदानयनाय = दर्भेन्धना-

---

राजवाहन के जन्म के समय में ही सुमति, सुमंत्र, सुमित्र और सुश्रुत को भी क्रमशः प्रमति, मित्रगुप्त, मंत्रगुप्त तथा विश्रुत नाम के पुत्र पैदा हुए। राजवाहन उन मित्रभूत मंत्रिपुत्रों के साथ बालक्रीड़ा करता हुआ बढ़ने लगा ॥ ५१ ॥

कुछ दिनों के बाद एक दिन एक तापस आया और परम सुन्दर बालक राजा

निर्जने वने किंनिमित्तं रुद्यते त्वया इति पृष्टा सा करसरोरुहैरश्रु प्रमृज्य सगद्गदं मामवोचत्—मुने, लावण्यजितपुष्पसायके मिथिलानायके कीर्तिव्याप्तसुधर्मणि निजसुहृदो मगधराजस्य सीमन्तिनीसीमन्तमहोत्सवाय पुत्रदारसमन्विते पुष्पपुरमुपेत्य कञ्चन कालमधिवसति समाराधितगिरीशोमालवाधीशो मगधराजं योद्धुमभ्यगात् । (५३)

नयनाय, वनं=अटवीं, गतेन = यातेन, मया, काचित् = एका, अशरण्या = अनाथा, व्यक्तकार्पण्याश्रु = प्रकटितदैन्यनेत्राम्बु, मुञ्चन्ती = त्यजन्ती विलपन्ती, वनिता = नारी, विलोकिता = दृष्टा ॥ ५२ ॥

निर्जने ... . अभ्यगात् ॥ ५३ ॥

प्रसङ्गः—उपर्युक्त एव ...

व्याख्या—निर्जने = जनरहिते, वने = अरण्ये, किंनिमित्तं = कस्माद्धेतोः, रुद्यते = क्रन्दनं क्रियते, त्वया = भवत्या, इति पृष्टा = कथिता, सा = स्त्रीः, करसरोरुहैः = करकमलैः, अश्रु = वाष्पम्, प्रमृज्य = प्रोञ्छ्य, सगद्गदैः = कम्पितस्वरेण, मां, अवोचत् = उक्तवती—मुने ! तपस्विन् !, लावण्यजितपुष्पसायके = लावण्येन सौन्दर्येण जितः पराजितः पुष्पसायकः कामः येन सः तस्मिन्, मिथिलानायके = मिथिलाधिपे, कीर्तिव्याप्तसुधर्मणि = कीर्त्या यशसा व्याप्ता प्रपूर्णा सुधर्मा तन्नाम्नी समिति येन सः तस्मिन्, निजसुहृदः = स्वमित्रस्य, मगधराजस्य = राजहंसस्य, सीमन्तिनीसीमन्तोत्सवाय = स्त्रियः सीमन्तोन्नयनसंस्काराय, पुत्रदारसमन्विते = पुत्राश्च दाराश्चपुत्रदाराः तैः समन्विते युक्ते, पुष्पपुरं = कुसुमपुरम्, उपेत्य = गत्वा, कञ्चनकालं = दिनम्, अधिवसति = निवासं कुर्वति सति, समाराधितगिरीशः = सेवितः शंकरः येन सः सेवितशङ्करः, मालवाधीशः = मानसारः,

---

को देकर बोला—राजन् ! कुश-समिधा लाने के लिए मैं जंगल में गया था। मैंने वहाँ एक रोती हुई स्त्री देखी ॥ ५२ ॥

मैंने उससे पूछा—'इस निर्जन वन में क्यों रोती हो?' तो उसने अपने आँसू पोंछकर कहा—"हे मुने ! अपने सौन्दर्य से कामदेव को भी तिरस्कृत करनेवाले, दिगन्त कीर्तिव्यापी मिथिलेश प्रहार वर्मा अपने मित्र मगधराज की महारानी के

तत्र प्रख्यातयोरेतयोरसङ्ख्ये सङ्ख्ये वर्तमाने सुहृत्साहाय्यकं कुर्वाणो निजबले सति विदेहे विदेहेश्वरः प्रहारवर्मा जयवता रिपुणाभिगृह्य कारुण्येन पुण्येन विसृष्टो हतावशेषेण शून्येन सैन्येन सह स्वपुरगमनमकरोत्। (५४)

ततो वनमार्गेण दुर्गेण गच्छन्नधिकबलेन शबरबलेन रभसादभिहन्यमानो

मगधराजं = राजहंसं, योद्धुं = युद्धं कर्त्तुम्, अभ्यगात् = समागतः ॥ ५३ ॥

विशेषः—कवेः कौतूहलजनकत्वं श्लाघ्यम् ॥

तत्र ... ... अकरोत् ॥ ५४ ॥

प्रसङ्गः—वने दृष्टाया वनितायाः कथनं मुनिना कथ्यते—

व्याख्या—तत्र = मगधे, प्रख्यातयोः = प्रसिद्धयोः, तयोः = राजहंसमानसारयोः, संख्ये = युद्धे, असंख्ये = अगणिते, वर्तमाने=प्रचलिते, सुहृत्साहाय्यकं = सखासहयोगम्, कुर्वाणः विदधानः, निजबले = स्वसैन्ये, विदेहे = पञ्चत्वं गते, सति, विदेहेश्वरः = मिथिलेशः, प्रहार वर्मा, जयवता = विजयिना रिपुणा = अरिणा मानसारेण, अभिगृह्य = बन्दीकृत्य, कारुण्येन = दयया, पुण्येन = भाग्येन, वा, विसृष्टः = मुक्तः, हतावशेषेण = हतस्य अवशेषः तेन = जीवितेन, शून्येन शस्त्रादिविरहितेन, सैन्येन = सेनया, सह, स्वपुरगमनं = मिथिलां प्रति प्रस्थानम्, अकरोत् = चकार ॥ ५४ ॥

ततो ... ...अभ्यलीयत ॥ ५५ ॥

प्रसङ्गः—स उपर्युक्त एव ।

व्याख्या—ततः पुरगमनानन्तरम्, दुर्गेण = कठिनेन वनमार्गेण = अरण्यपथा-गच्छन् = गमनं कुर्वन्, अधिक बलेन = प्रभूतशक्तिसम्पन्नेन, शबरबलेन = शबर-

---

सीमन्तोत्सव में पत्नी और पुत्रसहित मगध में आकर कुछ दिन रहे। उसी समय शिवोपासना से बलोन्मत्त मालवाधीश ने मगधेश पर चढ़ाई कर दी ॥ ५३ ॥

दोनों विख्यात वीरों के युद्ध में अपने मित्र मगधेश की सहायता करने के लिए लड़ते हुए विदेहेश्वर प्रहार वर्मा की सेना विजयी शत्रु मालवेश से नष्ट कर दी गई और वे बन्दी बना लिये गये। फिर शत्रु की दया-दृष्टि अथवा अपने पुण्य-बल से छूटकर देश लौट पड़े ॥ ५४ ॥

मूलबलाभिरक्षितावरोधः स महानिरोधः पलायिष्ट। तदीयार्भकयोर्यमयोर्धात्री-भावेन परिकल्पिताहं मद्दुहितापि तीव्रगतिं भूपतिमनुगन्तुमक्षमे अभूव। तत्र विवृतवदनः कोऽपि रूपी कपि इव व्याघ्रः शीघ्रं मामाघ्रातुमागतवान्। भीताह-मुदग्रग्राव्णि स्खलन्ती पर्यपतम्। मदीयपाणिभ्रष्टो बालकः कस्यापि कपिला-शवस्य क्रोडमभ्यलीयत। (५५)

सैन्येन, रभसात् = वेगात्, अभिहन्यमानः = ताड्यमानः, मूलबलाभिरक्षितावरोधः मूलबलेन = परम्परागतसैन्येन अभिरक्षितः संरक्षितः अवरोधः शुद्धान्तः स्त्री-समूहः यस्य सः तथाभूतः, सः = मिथिलाधिपः पलायिष्ट = पलायनं कृतवान्। तदीयार्भकयोः = तस्य प्रहारवर्मणः अर्भकयोः = पुत्रयोः, यमयोः = युग्मजातयोः, धात्रीभावेन = उपमातृरूपेण; उपकल्पिता = नियुक्ता, अहं, मद्दुहिता = मम पुत्री अपि, तीव्रगतिं = शीघ्रगामिनम्, भूपतिं = प्रहारवर्माणम्, अनुगन्तुं = अनुयातुम्, अक्षमे = असमर्थे, अभूव। तत्र = विपिने, विवृतवदनः = विवृतं व्यात्तं वदनं मुखं यस्य सः व्यात्तमुखः, कोऽपि = कश्चिदपि, रूपी = रूपं अस्यास्तीति रूपी = मूर्तिमान् कोपः = क्रोध इव व्याघ्रः विशेषेण आजिघ्रतीति व्याघ्रः = सिंहः, शीघ्रं = त्वरितम्, तां = स्त्रीम्, आघ्रातुं = आहन्तुम्, आगतवान् = समागतः, भीता = संत्रस्ता, अहम्, उदग्रग्राव्णि = उत्थिते प्रस्तरे, स्खलन्ती = रिङ्गन्ती, पर्यपतम् = अस्खलम्, मदीयपाणिभ्रष्टः = मम हस्तात् च्युतः, बालकः = कुमारः, कस्यापि, कपिलाशवस्य = गोः निष्प्राणदेहस्य, क्रोडं = उत्सङ्गम्, अभ्यलीयत = प्राविशत्॥ ५५॥

दुर्गम वनमार्ग से जा रही भीलों की सेना ने उन पर आक्रमण कर दिया। उस आक्रमण में उन्हें काफी चोट आयी, फिर भी किसी तरह अन्तःपुर की सेना की सहायता से स्त्रियों सहित वहाँ से भाग निकले। उस समय उनके जुड़वाँ बच्चों की धायी मैं तथा मेरी पुत्री तेज दौड़ने में असमर्थ होने से न भाग सकी। उसी समय एक भयानक व्याघ्र आया और हम दोनों को खाने के लिए दौड़ा। भयभीत होकर भागती हुई मैं एक उठे हुए पत्थर के नीचे गिर पड़ी और बालक मेरे हाथ से छूट कर एक मरी पड़ी गाय के शव की आड में गिर पड़ा॥ ५५॥

तच्छवाकर्षिणोऽमर्षिणो व्याघ्रस्य प्राणान्बाणो बाणासनयन्त्रमुक्तोऽपाहरत्। लोलालको बालकोऽपि शबरैरादाय कुत्रचिदुपानीयत। कुमारमपरमुद्वहन्ती मद्दुहिता कुत्र गता न जाने। साऽहं मोहं गता केनापि कृपालुना वृष्णिपालेन स्वकुटीरमावेश्य विरोपितव्रणाभवम्। ततः स्वस्थीभूय क्ष्माभर्तुरन्तिकमुपतिष्ठासुरसहायतया दुहितुरनभिज्ञतया च व्याकुलीभवामि —इत्यभिदधाना 'एकाकि-

---

तच्छवाकर्षिणः ··· ··· ···· ··· ··· ··· निरगात् ॥ ५६ ॥

प्रसङ्गः—तपस्वी राजानं कानने मिलितायाः स्त्रियोवृत्तान्तं श्रावयन् गदतिः—

व्याख्या—तच्छवाकर्षिणः—तस्य शवस्य गोः मृतदेहस्य आकर्षिणः, आकर्षितुं शीलं यस्य सः तस्य, अमर्षिणः अमर्षः = क्रोधः अस्यास्तीति अमर्षी तस्य, क्रुद्धस्य, व्याघ्रस्य = शार्दूलस्य, प्राणान् = असून्, बाणासनयंत्रमुक्तः धनुषः मुक्तः बाणः = सायकः, अपाहरत् हृतवान्। लोलालकः = चञ्चलकेशः, बालकः = शिशु अपि, शबरैः = किरातैः, आदाय = गृहीत्वा, कुत्रचित् = अज्ञातस्थाने, उपानीयत = प्रापितः। अपरं = यमयोर्मध्ये एकम्, कुमारं = बालकं, उद्वहन्ती = क्रोडीकृत्यपर्यटन्ती, मद्दुहिता = मम सुता, कुत्र गता न जाने = न स्मरामि। सा = दुःख-दुखिता, अहं, मोहं = कश्मलम्, गता = प्राप्ता, केनापि = अज्ञातपरिचयेन, कृपालुना = दयालुना, वृष्णिपालेन = गोपालेन, स्वकुटीरं = निजनिवासम्, आवेश्य = प्रवेश्य, विरोपितव्रणा = चिकित्सितक्षता, अभवम् = जाता। ततः = तदनन्तरम्, स्वस्थीभूय = स्वास्थ्यं लब्ध्वा, भूयः = पुनः, क्ष्माभर्तुः = राजानः, अन्तिकं = समीपम्, उपतिष्ठासुः = उपस्थातुमिच्छुः असहायतया = सहायशून्यया, दुहितुः = पुत्र्याः, अनभिज्ञाततया = अज्ञाततया च, व्याकुली-

---

वह क्रुद्ध व्याघ्र ज्यों ही गौ के शव को खींचने लगा कि व्याध का बाण आकर उसे लगा और वह मर गया। बालक को लेकर व्याध न जाने कहाँ चला गया। दूसरे बालक के साथ मेरी पुत्री कहाँ गई, यह भी नहीं मालूम। क्योंकि मुझे मूर्च्छा आ गयी थी। कुछ समय के बाद एक चरवाहा आया। उसने अपनी कुटी में ले जाकर मेरा दवा की तब जाकर मैं स्वस्थ हुई। अब अपने महाराज के पास जाना चाहती हूँ, किन्तु अकेली होने और पुत्री के भूल

न्यपि स्वामिनं गमिष्यामि' इति सा तदैव निरगात् । (५६)

अहमपि भवन्मित्रस्य विदेहनाथस्य विपन्निमित्तं विषादमनुभवंस्तदन्वयाङ्कुरं कुमारमन्विष्यंस्तदैकं चण्डिकामन्दिरं सुन्दरं प्रागाम् । (५७)

तत्र संततमेवंविधविजयसिद्धये कुमारं देवतोपहारं करिष्यन्तः किराताः

भवामि, पीडितास्मि, इति अभिदधाना = कथयन्ती एकाकिनी = असहाया अपि, स्वामिनं = प्रहारवर्माणम्, गमिष्यामि = यास्यामि, इत्युक्त्वा, सा = धात्री, तदेव = तत्क्षणमेव, निरगात् = निरगच्छत् ॥ ५६ ॥

अहमपि ... ... प्रागाम् ॥ ५७ ॥

प्रसङ्गः—तपस्वी एव स्ववृत्तान्तं श्रावयति ।

व्याख्या—अहमपि, भवन्मित्रस्य = तव सुहृदः, विदेहनाथस्य = मिथिलेशस्य, विपन्निमित्तं = आपत्कारणम्, विषादं = दुःखम्, अनुभवन् = चिन्तयन्, तदन्वयाङ्कुरं = तस्य वंशस्य प्ररोहभूतम्, कुमार = बालकं, अन्विष्यन् = मार्गमाणः, तदा = तस्मिन् काले, एकं सुन्दरम् मनोहरं चण्डिकामन्दिरम् = दुर्गामन्दिरम्, प्रागाम् = अगच्छम् ॥ ५७ ॥

तत्र ··· ···· ···· ···· ··· ···· ··· ·· अगच्छम् ॥ ५८ ॥

प्रसङ्गः—तापसः राजहंसं स्ववृत्तान्तं व्याहरति ।

व्याख्या—तत्र = चण्डिकामन्दिरं, सततं = अनारतम् एवंविधविजयसिद्धये = इत्थं प्रकारकस्य विजयस्य सिद्धये = प्राप्तये, कुमारं = बालकम्; देवतोपहारं = दुर्गायाः उपायनम्, बलिम्, करिष्यन्तः = विधास्यन्तः, किराताः =

जाने से व्याकुल हूँ। फिर भी महाराज के पास जाऊँगी यह कहकर वह उसी समय चल पड़ी ॥ ५६ ॥

उसके बाद मैं भी आपके मित्र प्रहारवर्मा के संकट पर तरस खाता उनके पुत्र को ढूंढ़ता हुआ एक सुन्दर चण्डिका मन्दिर में पहुँच गया ।। ५७ ॥

वहाँ मुझे बहुत से भील एकत्र हुए मिले। वे कह रहे थे जैसे आज मिथिलेश पर विजय मिली है वैसे ही बराबर मिलती रहे। और इसके लिए इस वृक्ष शाखा में लटकते हुए शिशुकी तलवार से मारकर, या बालू में गाड़कर तेज बाण

'महारुहशाखावलम्बितमेनमसिलतया वा, सैकततले खननिक्षिप्तचरणं लक्षीकृत्य शितशरनिकरेण वा, अनेकचरणैः पलायमानं कुक्कुरबालकैर्वा दंशयित्वा संहनिष्यामः' इति भाषमाणा मया समभ्यभाषन्त 'ननु किरातोत्तमाः, घोरप्रचारे कान्तारे स्खलितपथः स्थविरभूसुरोऽहं मम पुत्रकं क्वचिच्छायायां निक्षिप्य मार्गान्वेषणाय किञ्चिदन्तरमगच्छम् । (५८)

स कुत्र गतः, केन वा गृहीतः, परीक्ष्यापि न वीक्ष्यते तन्मुखावलोकनेन

शवराः, महीरुहशाखावलम्बितम् = महीरुहस्य = विटपस्य शाखायाम् अवलम्बितं= बद्धम्, एनं = बालकम्, असिलतया = खड्गलतया, सैकततले = बालुकामयप्रदेशे, खननिक्षिप्तचरणं = खनने गर्ते निक्षिप्तौ कीलितौ चरणौ यस्य सः तं तथोक्तम्, लक्ष्यीकृत्य = उद्दिश्य, निशितशरनिकरेण = तीक्ष्णसायकसमूहेन, अनेकचरणैः = क्षिप्रगमनैः, कुक्कुरबालकैः = श्वशिशुभिः पलाय्यमानं धावन्तम्, एनं = बालकम्, दंशयित्वा, संहनिष्यामः मारयिष्यामः इति = इत्थम्, भाषमाणाः = व्याहरन्तः (किराताः) मया = तापसेन, समभाषन्त = कथिताः । ननु—हे किरातोत्तमाः ! घोरप्रचारे = भयङ्करसंचारे, कान्तारे = अरण्ये, स्खलितपथः = स्खलितः भ्रष्टः पन्था यस्य सः तथोक्तः, स्थविरभूसुरः = वृद्धब्राह्मणः अहमस्मि, मम पुत्रकं = जातकम्, क्वचित् छायायां, निक्षिप्य = संस्थाप्य, मार्गान्वेषणाय = पन्थानं द्रष्टुम्, किञ्चिदन्तरं = किञ्चिद्दूरम्-आगच्छम् = प्रागाम् ॥ ५८ ॥

स कुत्र ... .किमदर्शि इति ॥ ५९ ॥

प्रसङ्गः—तापसः वृत्तान्तं श्रावयति—

व्याख्या—सः = मम पुत्रः, कुत्र गतः, परीक्ष्यापि = निरिक्ष्यापि, न वीक्ष्यते = न विलोक्यते, तन्मुखावलोकनेन = तस्य आननस्य दर्शनेन, विना =

से इसका सिर काट कर अथवा अनेक कुत्तों से नुचवाकर बलि चढ़ाई जाय। यह सुनकर मैंने उनसे कहा—'हे किरातश्रेष्ठ ! मैं ब्राह्मण हूं। इस घोर जंगल में रास्ता भूल गया हूं। मैं यहीं किसी वृक्ष की छाया में अपने पुत्र को रखकर मार्ग ढूंढ़ने के लिए कुछ दूर गया था ॥ ५८ ॥

आने पर मेरा पुत्र मिला नहीं। वह कहाँ गया ? उसे किसने चुरा लिया

विनानेकान्यहान्यतीतानि। किं करोमि, क्व यामि भवद्भिर्न किमदर्शि इति। (५९)

'द्विजोत्तम ! कश्चिदत्र तिष्ठति। किमेष तव नन्दनः सत्यमेव। तदेनं गृहाण' इत्युक्त्वा दैवानुकूल्येन मह्यं तं व्यतरन्। (६०)

तेभ्यो दत्ताशीरहं बालकमङ्गीकृत्य शिशिरोदकादिनोपचारेणाश्वास्य

अन्तरा, अनेकानि = बहूनि, अहानि = दिनानि, अतीतानि = अतिवाहितानि। किं करोमि, क्व = कुत्र, यामि = गच्छामि, भवद्भिः = श्रीमद्भिः, किं न अदर्शि = न दृष्टः किम्॥ ५९॥

द्विजोत्तमः ... ...व्यतरन्॥ ६०॥

प्रसङ्गः—किराताः तापसं वदन्ति—

व्याख्या—द्विजोत्तम ! = ब्राह्मणश्रेष्ठ !, अयं = अस्माकं पार्श्वे, कश्चित् = एकः (बालकः) तिष्ठति = वर्तते। किं एषः = अयम्, तव = भवतः, सत्यमेव = निश्चयेन, नन्दनः = पुत्रकः। तत् अस्ति चेत्तर्हि एनं = बालकम्, गृहाण = स्वीकुरु, इत्युक्त्वा = एवं व्याहृत्य, दैवानुकूल्येन = ईश्वरानुग्रहेण, मह्यं = मदर्थे, तं = बालकम्, व्यतरन् = समर्पितवन्तः॥ ६०॥

विशेषः—किरातानामप्येका सहृदयता द्रष्टव्या।

तेभ्यः .... इति॥ ६१॥

प्रसङ्गः—तापसः बालकं समर्प्य राजानं निर्दिशति—

व्याख्या—तेभ्यः = शबरेभ्यः, दत्ताशीः = दत्ताः वितरिताः आशीषः-आशीर्वादाः येन सः, अहं = तापसः, बालकं = कुमारम् अङ्गीकृत्य = स्वीकृत्य,

---

कुछ भी पता नहीं चल पाया। इसलिए आज मैं बहुत दिनों से विकल हूँ क्या करूँ ? कहाँ जाऊँ ? कुछ समझ में नहीं आता। क्या आप लोगों ने उसे कहीं देखा है॥ ५९॥

किरातों ने कहा—'ब्राह्मणश्रेष्ठ ! यहाँ एक बालक है। क्या वही आपका पुत्र है। यदि है तो ले लीजिए' और ईश्वर की कृपा से उन्होंने उस बालक को मुझे दे दिया॥ ६०॥

निःशङ्कं भवदङ्कं समानीतवानस्मि । एनमायुष्मन्तं पितृरूपो भवानभिरक्षतात्' इति। (६१)

राजा सुहृदापन्निमित्तं शोकं तन्नन्दनविलोकनसुखेन किञ्चिदधरीकृत्य तमुपहारवर्मनाम्नाहूय राजवाहनमिव पुपोष । (६२)

जनपतिरेकस्मिन् पुण्यदिवसे तीर्थस्नानाय पक्वणनिकटमार्गेण गच्छन्न-

---

शिशिरोदकादिना = शीतलजलादिना, उपचारेण = शुश्रूषया, च, आश्वास्य = स्वस्थं विधाय, निःशङ्कं = निर्भयम्, भवदङ्कं = श्रीमत्समीपम्, समानीत-वान् = उपस्थापितवान्, अस्मि, आयुष्मन्तं = चिरजीविनम्, एनं = सम्मुखो-पस्थापित बालकम्, पितृरूपः जनकसदृशः, भवान् = श्रीमान्, अभिरक्षतात् = पालयतु, इति ॥ ६१ ॥

राजा ··· ···· ··· ··· ··· ··· ··· ··· पुपोष ॥ ६२ ॥

प्रसङ्गः—बालकप्राप्त्यनन्तरं राजहंसस्य मनःप्रसादः वर्ण्यते ।

व्याख्या—राजा = नृपः (राजहंसः) सुहृदापन्निमित्तं = सुहृदः मित्रस्य आपद् विपद् निमित्तं कारणं यस्य सः तथाभूतं, शोकं = स्थायिदुःखम्, तन्नन्दन-स्य = तस्य सुतस्य, विलोकनसुखेन = अवलोकनानन्देन, किञ्चित् = ईषत्, अधरीकृत्य = न्यूनीकृत्य, तं = कुमारम्, उपहारवर्मनाम्ना, उपहारवर्माभिधानेन, आहूय = आकार्य, राजवाहनं = स्वजातकं इव, पुपोष = पालितवान् ॥ ६२ ॥

विशेषः—राजहंसस्य दयालुता सौजन्यता च श्लाघ्ये ।

जनपतिः··· ··· ··· ···· ·· ···· ··· त्वया इति ॥ ६३ ॥

मैंने उनसे बालक प्राप्त करके उन्हें आशीर्वाद दिया, फिर शीतल जल आदि से उसका उपचार करके स्वस्थ किया । अब उसे ही आपकी निर्भय शरण में ले आया हूँ । आप इसका पिता तुल्य रक्षा करें ॥ ६१ ॥

राजा ने मित्र प्रहारवर्मा पर पड़ी विपत्ति को सुनकर अत्यन्त दुःख प्रकट किया । उनका वह दुःख उसके पुत्र को पाकर कुछ कम हुआ पुनः उन्होंने उस बालक का नाम 'उपहारवर्मा' रखकर राजवाहन की भाँति ही लालन-पालन करना प्रारम्भ कर दिया ॥ ६२ ॥

बलया कयाचिदुपलालितमनुपमशरीरं कुमारं कञ्चिदवलोक्य कुतूहलाकुलस्तामपृच्छत् — 'भामिनि ! रुचिरमूर्तिः सराजगुणसंपूर्तिरसावर्भको भवदन्वयसंभवो न भवति कस्य नयनानन्दः, निमित्तेन केन भवदधीनो जातः, कथ्यतां याथातथ्येन त्वया' इति (६३)।

प्रणतया तया शवर्या सलीलमलापि—'राजन् ! आत्मपल्लीसमीपे पदव्यां

प्रसङ्गः—कविना युग्मयोः अपरस्य प्रासवर्णनमुपक्रम्यते ।

व्याख्या—जनपतिः = नरपतिः (राजहंसः) एकस्मिन् = एकदा, पुण्यदिवसे = पुण्यदिने, तीर्थस्नानाय = तीर्थे स्नानं कर्त्तुम्, पक्वणनिकटमार्गेण = शबरस्य समीपेन पथा, गच्छन् = व्रजन्, अवलया = स्त्रिया, उपलालितं = स्नेहेन चुम्बितम्, अनुपमशरीरं = अतुलनीयदेहम् (परमसुन्दरम्) कञ्चित् कुमारं बालकम्, अवलोक्य = विलोक्य, कुतूहलाकुलः = कौतुकेन व्याप्तः, तां = शबरीम्, अवलाम्, अपृच्छत् = पृष्टवान्, भामिनि = सुन्दरि, रुचिरमूर्तिः = भव्यस्वरूपः, सराजगुणसंपूर्तिः = नृपलक्षणानां प्रपूर्णतया सह वर्तत इति राजलक्षणसम्पन्नः, असौ = उत्सङ्गे निहितः, अर्भकः = बालकः, भवदन्वयसम्भवः = तव कुलोत्पन्नः, न भवति = शक्नोति, कस्य = कुलविशेषस्य, नयनानन्दनः = नेत्राह्लादकः, केन निमित्तेन = केन कारणेन, भवदधीनः = त्वदधीनः, जातः = अभूत्, कथ्यतां = भाष्यताम्, यथातथ्यम् = यथार्थतः, त्वया = भवत्या इति ॥ ६३ ॥

प्रणतया ... . व्यवर्धत इति ॥ ६४ ॥

प्रसङ्गः—उपर्युक्त एव ।

व्याख्या—प्रणतया = विनतया, तया = शवर्या, किरातवनितया,

एक बार राजा किसी पर्व के दिन भीलों की बस्ती से होकर गुजर रहे थे । उन्होंने एक भीलनी को परम सुन्दर कुमार को लिये हुए देख कर पूछा—'हे भामिनि ! यह इतना सुन्दर राजलक्षणों से सम्पन्न बालक तुम्हारा तो हो नहीं सकता, किसका है ? तुम्हें कैसे मिला ? सही-सही बतलाओ ? ॥ ६३ ॥

भीलनी ने राजा को प्रणाम करके कहा—'महाराज' ! एक बार हमारे

वर्तमानस्य शक्रसमानस्य मिथिलेश्वरस्य सर्वस्वमपहरति शबरसैन्ये मद्दयितेनापहृत्य कुमार एष मह्यमर्पितो व्यवर्धत' इति (६४)

तदवधार्यं कार्यज्ञो राजा मुनिकथितं द्वितीयं राजकुमारमेव निश्चित्य सामदानाभ्यां तामनुनीयापहारवर्मेत्याख्याय देव्यै 'वर्धय' इति समर्पितवान् । (६५) •

सलीलं = स्मितिपूर्वकम्, अलापि = अभाणि । राजन् ! = स्वामिन् ! आत्मपल्लः समीपे = आत्मनः स्वस्य ग्रामस्य पार्श्वे, पदव्यां = मार्गे, वर्तमानस्य = गच्छतः, शक्रसमानस्य = इन्द्रतुल्यस्य, मिथिलेश्वरस्य = मिथिलेशस्य, सर्वस्वं = सम्पूर्णधनम्, अपहरति = आत्मसात्कुर्वति, शबरसैन्ये = किरातकुले, मद्दयितेन = मम भर्त्रा, अपहृत्य = हठात्, समानीय, एषः = पुरोवर्तमानः, कुमारः = बालकः, मह्यं = मदर्थे, अर्पितः = दत्तः, स एवेदानीम्, व्यवर्द्धत = वृद्धि प्राप्तः ॥ ६४ ॥

विशेषः—किरातस्यापि क्रूरकर्मणः वात्सल्यम् स्पृहणीयम् ॥

तदवधार्य ... ... समर्पितवान् ॥ ६५ ॥

प्रसङ्गः— उपर्युक्त एव ।

व्याख्या – तत् = शवर्याः भणितम्, अवधार्य = आकर्ण्य, कार्यज्ञः = कृत्यवित्, राजा = नृपः (राजहंसः), मुनिकथितं = तापसोक्तम् द्वितीयं = अपरम्, राजकुमारमेव = बालकमेव, निश्चित्य = निर्णीय, सामदानाभ्यां = सान्त्वनया द्रव्येन च, तां = किरातीम्, अनुनीय = कृत्वा, अपहारवर्मा—इति, आख्याय =

गाँव के समीप से गुजरते हुए मिथिलेश पर आक्रमण कर के शबर सेना ने उनको लूटा । उसी में मेरे पति को यह बालक प्राप्त हुआ । उन्होंने लाकर मुझे दे दिया इस समय उसी का पालन कर रही हूँ ॥ ६४ ॥

शबरी का कथन सुनकर तुरन्त ही राजा ने समझ लिया कि मुनि द्वारा वर्णित दूसरा बालक यही है । उन्होंने शबरी को समझाकर और कुछ पैसे देकर बालक को ले लिया तथा उसका नाम 'उपहारवर्मा' रख कर विलासवतीं को पालन-पोषण करने के लिए दे दिया ॥ ६५ ॥

कदाचिद्वामदेवशिष्यः सोमदेवशर्मा नाम कश्चिदेकं बालकं राज्ञः पुरो निक्षिप्याभाषत--'देव ! रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननावनौ वनितया कयापि धार्यमाणमेनमुज्ज्वलाकारं कुमारं विलोक्य सादरमभाणि--'स्थविरे! का त्वम्? एतस्मिन्नटवीमध्ये बालकमुद्वहन्ती किमर्थमायासेन भ्रमसि' इति। (६६)

वृद्धयाप्यभाषि--'मुनिवर ! कालयवननाम्नि द्वीपे कालगुप्तो नाम

नाम्ना विभूष्य, देव्यै = वसुमत्यै, 'वर्धय = पालय' इति = एवं व्याहृत्य, समर्पितवान् = दत्तवान् ॥ ६५ ॥

कदाचित्... .... भ्रमसि इति ॥ ६६ ॥

प्रसङ्गः—सोमशर्म्मा रत्नोद्भवसुतस्य वृत्तं राजहंसं श्रावयति ।

व्याख्या—कदाचित् = एकदा, वामदेवशिष्यः = वामदेवनाम्नः महर्षेः अन्तेवासी, सोमशर्म्मा नाम, कश्चिदेकं, बालकं = कुमारम्, राज्ञः = राजहंसस्य, पुरः = समक्षम्, निक्षिप्य = प्रस्तूय, अभाषत = कथितवान्, देव ! = राजन् ! रामतीर्थे, स्नात्वा = स्नानंकृत्वा, प्रत्यागच्छता = परवर्तमानेन, मया = सोमदेवेन, काननावनौ–वनभूयौ, कयापि–अज्ञाताभिख्यया, वनितया = स्त्रिया, धार्यमाणं = उह्यमानम्, उज्जवलाकारं = सुन्दरम्, कुमारं = बालकम्, विलोक्य = दृष्ट्वा, सादरं = आदरेण सहितं, अभाणि=अभाषि – स्थविरे = वृद्धे, का त्वम्, एतस्मिन् = पुरोदृश्यमाने, अटवीमध्ये = अरण्यान्तरे, बालकं = कुमारम्, उद्वहन्ती = धारयन्ती, किमर्थं = कस्मात्, आयासेन क्लेशेन, भ्रमसि = अटसि ॥ ६६ ॥

वृद्धया... .... जाता ॥ ६७ ॥

कुछ समय के बाद एक दिन 'सोमशर्मा' नामक वामदेव मुनि का एक शिष्य आया। उसने राजा के समक्ष एक बालक रख कर कहा—राजन् ! मैं रामतीर्थ में स्नान करने के लिये गया था। वहाँ इस सुन्दर बालक को ली हुई एक वृद्धा को देखकर पूछा—वृद्धे ! तुम कौन हो ? इस गहन वन में बालक को लेकर किस लिये दुःखपूर्वक घूम रही हो ? ॥ ६६ ॥

धनाढ्यो वैश्यवरः कश्चिदस्ति। तन्नन्दिनीं नयनानन्दकारिणीं सुवृत्तां नामैत-स्माद् द्वीपादागतो मगधनाथमन्त्रिसंभवो रत्नोद्भवो नाम रमणीयगुणालयो भ्रान्तभूवलयो मनोहारी व्यवहार्युपयम्य सुवस्तुसंपदा श्वसुरेण संमानितोऽभूत्। कालक्रमेण नताङ्गी गर्भिणी जाता। (६७)

ततः सोदरविलोकनकौतूहलेन रत्नोद्भवः कथंचिच्छ्वशुरमनुनीय

प्रसङ्गः– सोमशर्मा स्थविरयोक्तं वृत्तान्तं राजहंसं श्रावयति।

व्याख्या—वृद्धया = स्थविरया, अपि, अभाषि = अभाणि, मुनिवर ! = ऋषिश्रेष्ठ ! कालयवननाम्नि, द्वीपे = अन्तरीपे, कालगुप्तोनाम, धनाढ्यो = धनिकः, कश्चित् = एकः, वैश्यवरः = श्रेष्ठिमुख्यः, अस्ति = वर्तते तन्नन्दिनीम् = तत्सुताम्, नयनानन्दकारिणीम् = लोचनानन्ददात्रीम्, सुन्दरीम्, सुवृत्तां नाम = सुवृत्ताभिधाम्, एतस्माद्द्वीपात् = अन्तरीपात, मगधनाथमंत्रिसंभवः = मगधाधि-पस्य मंत्रिणः सम्भवः = जातः, रत्नोद्भवो नाम = रत्नोद्भवनामा, रमणीय-गुणालयः = उत्तमः गुणैः भूषितः, भ्रान्तभूवलयः = भ्रान्तं पर्यटितं भुवः पृथिव्याः वलयं मण्डलं येन सः, मनोहारी = मनांसि हर्त्तुं मुग्धीकर्त्तुं शीलं यस्यासौ, व्यवहारी = वाणिज्य कर्मपरः, उपयम्य = परिणीय, सुवस्तुसम्पदा = प्रचुरयौ-तुकैश्वर्येण, श्वसुरेण = कालगुप्तेन, संमानितः = सत्कृतः, अभूत् = कृतः, काल-क्रमेण = किञ्चित्समयानन्तरम्, नताङ्गी = नतं अंङ्गं यस्याः सा, (सुवृत्ता) गर्भिणी = गर्भयुक्ता, जाता = अभूत् ॥ ६७ ॥

ततः ... ... अमज्जत् ॥ ६८ ॥

प्रसङ्गः—उपर्युक्त एव।

व्याख्या—ततः = तदनन्तरम्, सोदरविलोकनकौतूहलेन = सोदराणां भ्रातृणां विलोकने दर्शने यत् कौतूहलं = कौतुकं तेन तयोक्तेन, रत्नोद्भवः,

---

वृद्धा ने कहा—'मुनिराज' ! कालयवन नामक द्वीप में कालगुप्त नामक एक धनाढ्य वैश्य रहता है। उसने अपनी नयनाभिराम सुता सुवृत्ता का विवाह इस द्वीप से गये हुए राजहंस के मन्त्री के पुत्र रत्नोद्भव के साथ प्रचुर दहेज देकर कर दिया। कुछ दिनों के वाद वह सुवृत्ता गर्भिणी हो गई ॥ ६७ ॥

चपललोचनया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे। कल्लोलमालिकाभिहतः पोतः समुद्राम्भस्यमज्जत्। (६८)

गर्भभरालसां तां ललनां धात्रीभावेन कल्पिताहं कराभ्यामुद्वहन्ती फलकमेकमधिरुह्य दैवगत्या तीरभूमिमगमम्। सुहृज्जनपरिवृतो रत्नोद्भवस्तत्र निमग्नो वा केनोपायेन तीरमगमद्वा न जानामि। क्लेशस्य परां काष्ठामधिगता

कथञ्चित् = कथं कथमपि, श्वसुरं = पत्न्याः पितरम्, अनुनीय = अनुकूलं कृत्वा, चपललोचनया = चञ्चलनयनया, सह, प्रवहणं = डयनम् (नौकाम्) आरुह्य = अधिरुह्य, अभिप्रतस्थे = प्रचचाल, कल्लोलमालिकाभिहतः = तरंगसमूहैः ताडितः, पोतः = जलयानम्, समुद्राम्भसि = सिन्धुसलिले, अमज्जत् = निमग्नोऽभूत्॥ ६८॥

गर्भभरालसाम् ... ... अनायि इति॥ ६९॥

प्रसङ्गः—वृद्धा मध्येसमुद्रं घटितां दुर्घटनां वर्णयन्ती आह—

व्याख्या—गर्भभरालसां = गर्भस्य भारेण शिथिलाम्, तां = पूर्वोक्ताम् (सुवृत्ताम्) ललनां = सुन्दरीम्, धातृभावेन = उपमातृरूपेण, कल्पिता = नियुक्ता, अहम् = स्थविरा, कराभ्यां = हस्ताभ्याम्, उद्वहन्ती = धारयन्ती, एकं फलकं = काष्ठखण्डम्, अधिरुह्य = आरुह्य, दैवगत्या = भाग्यवशात्, तीरभूमिं = तटप्रदेशम्, अगमम् = गतवती। सुहृज्जनपरिवृतः = मित्रवर्गैः परिवेष्टितः; रत्नोद्भवः = वणिक्, तत्र = मध्येसमुद्रम्, निमग्नः = अमज्जत्, वा = अथवा, केनोपायेन = केनोद्योगेन, तीरं = तटम्, अगमत् = प्राप्तः, न, जानामि = अवगच्छामि। क्लेशस्य = दुःखस्य परां = चरमाम्, काष्ठां = सीमाम्, अधिगता = प्राप्ता, सुवृत्ता

अब अपने भाइयों को देखने की उत्कण्ठा से रत्नोद्भव अपने श्वसुर को किसी प्रकार अनुकूल करके सुन्दरी सुवृत्ता के साथ नाव में बैठकर पुष्पपुर के लिये चल पड़ा। वह नाव समुद्र की लहरों से प्रताड़ित हो कर डूब गई॥ ६८॥

सुवृत्ता की धायी रूप में नियुक्त मैं भी उसी पर थी। मैं उस गर्भिणी को हाथों का सहारा देती हुई भाग्यवशात् एक तख्ती पर चढ़कर तट पर लग गई। मित्रों सहित रत्नोद्भव डूब गया या किसी भाँति किनारे लगा, यह सब कुछ भी

सुवृत्तास्मिन्नटवीमध्येऽद्य सुतमसूत । प्रसववेदनया विचेतना सा प्रच्छायशीतले तरुतले निवसति । विजने वने स्थातुमशक्यतया जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः समीपे बालकं निक्षिप्य गन्तुमनुचितमिति कुमारोऽप्यनायि' इति । (६९)

तस्मिन्नेव क्षणे वन्यो वारणः कश्चिददृश्यत । तं विलोक्य भीता सा बालकं निपात्य प्राद्रवत् । अहं समीपलतागुल्मके प्रविश्य परीक्षमाणोऽतिष्ठम्,

---

= ललना (रत्नोद्भवस्त्री,) सुवृत्ता, अस्मिन्नटवीमध्ये = वनान्तरे, सुतं = पुत्रम्, असूत = उत्पादितवती । प्रसववेदनया = गर्भमोचनपीडया, विचेतना = मूर्च्छिता, सा = सुवृत्ता, प्रच्छायशीतले = सघनछायया शिशिरे, तरुतले = वृक्षस्य तले, निवसति = वर्तते । विजने = निर्जने, वने = अरण्ये, स्थातुं = प्रतिवसतुम्, अशक्यतया = असमर्थतया, जनपदगामिनं = ग्रामप्रापकम्, मार्गं = पन्थानम्, अन्वेष्टुं = प्राप्तुम्, उद्युक्तया = तत्परया, मया = वृद्धया, तस्याः = सवृत्तायाः, विवशायाः = पराधीनायाः समीपे = सविधे, बालकं = शिशुम्, निक्षिप्य = संस्थाप्य, गन्तुं = यातुम्, अनुचितम् = अयुक्तम्, (इति ज्ञात्वा) कुमारः = बालकः अपि, अनायि = आनीतः ॥ ६९ ॥

विशेषः—अत्र करुणरसः आस्वाद्यः, तदनुकूला च पदशय्या ।

तस्मिन्नेव··· ···· ···· ··· ··· ··· क्वचिदगात् ॥ ७० ॥

प्रसङ्गः—सोमदेवशर्म्मा बालकवृत्तान्तं आपतितामापत्तिञ्च श्रावयति—

व्याख्या—तस्मिन्नेवक्षणे = पूर्वोक्त एव समये, कश्चित् = एकः, वन्यः = आरण्यकः, वारणः = हस्तिः, अदृश्यत = दृष्टः, तं = वन्यवारणम्, विलोक्य = दृष्ट्वा, भीता = भयाक्रान्ता, सा = वृद्धा धात्री, बालकं = शिशुम्, निपात्य = प्रक्षिप्य, प्राद्रवत् = दधाव । अहं = सोमशर्म्मा, समीपलतागुल्मके = पार्श्वस्थलता-

---

मालूम नहीं । दुःख कातरा सुवृत्ता ने इसी वन में आज सन्तान को जन्म दिया है । प्रसव-पीड़ा से मूर्च्छित वह वृक्ष की छाया में पड़ी है । मैं निर्जन वन में रहना उचित न समझकर तथा उस मूर्च्छिता के पास बालक का रखना ठीक न सोचकर अपने साथ-साथ ली हुई नगर जाने का रास्ता ढूंढ़ रही हूँ ॥ ६९ ॥

निपतितं बालकं पल्लवकवलमिवाददति गजपतौ कण्ठीरवो महाग्रहेण न्यपतत्। भयाकुलेन दन्तावलेन झटिति वियति समुत्पात्यमानो बालको न्यपतत्। चिरायुष्मत्तया स चोन्नततरुशाखासमासीनेन वानरेण केनचित्पक्वफलबुद्ध्या परिगृह्य फलेतरतया विततस्कन्धमूले निक्षिप्तोऽभूत्। सोऽपि मर्कटः क्वचिदगात्। (७०)

कुंजे, प्रविश्य = गत्वा, परीक्षमाणः = ईक्षमाणः, अतिष्ठम् = स्थितः, निपतितं = तस्याः करात् भ्रष्टम्, बालकं = शिशुम्, पल्लवकवलं = किसलयग्रासमिव, आददति = आददाने सति, गजपतौ = महागजे, कण्ठीरवः = गम्भीरगर्जनः सिंहः, महाग्रहेण = अतिवेगेन, न्यपतत् = आक्रान्तवान्। भयाकुलेन = भयविकलेन, दन्तावलेन = महागजेन, झटिति = शीघ्रम्, वियति = गगने, समुत्पात्यमानः = ऊर्ध्वं क्षिप्यमाणः, बालकः = शिशुः, न्यपतत् = पतितः। चिरायुष्मत्तया = आयुष्मतो भावः आयुष्मत्ता चिरं दीर्घकालं आयुष्मत्ता चिरायुष्मत्ता तया, सः = शिशुः, उन्नततरुशाखासमासीनेन = उच्छ्रतस्य वृक्षस्य शाखायां समासीनेन समुपविष्टेन, वानरेण = कपिना, पक्वफलबुद्धया = पीतफलभ्रान्त्या, परिगृह्य = धृत्वा, फलेतरतया-फलात् इतरत् अन्यत् तस्य भावः तत्ता तया, विततस्कन्धमूले = विस्तृतस्य वृक्षकाण्डस्य अधः प्रदेशे, निक्षिप्तः = निहितः, अभूत् = जातः। सोऽपि = पूर्वोक्तः मर्कटः = वानरः, क्वचित् = अज्ञातस्थानम्, अगात् = ययौ ॥ ७० ॥

विशेषः—घटनानां संयोजने कवेः कथाकौशलं श्लाघ्यम् ॥

उसी क्षण (जब बात हो रही थी) एक जंगली हाथी दीखा। उसे देखकर वह वृद्धा बालक को नीचे गिराकर तेजी से भाग पड़ी। मैं समीपस्थ लताकुञ्ज में छिप कर देखने लगा। हाथी ने उस गिरे हुए बालक को पल्लव के सदृश उठाकर जैसे ही मुख में डालना चाहा कि उसके ऊपर एक भयानक सिंह टूट पड़ा। सिंह के आक्रमण से भयभीत हाथी ने बालक को उछालकर फेंक दिया। उधर वृक्ष की शाखा पर बैठे हुए वानर ने ऊपर से गिरता हुआ पका फल समझ कर उस दीर्घायु बालक को लोक लिया। और फिर फल नहीं है ऐसा जान कर वृक्ष की एक डाल पर रख दिया। इसके बाद वह वानर भी कहीं चला गया॥ ७० ॥

वालकेन सत्त्वसंपन्नतया सकलक्लेशसहेनाभावि। केसरिणा करिणं निहत्य कुत्रचिदगामि। लतागृहान्निर्गतोऽहमपि तेजःपुञ्जं बालकं शनैरवनीरुहादवतार्य वनान्तरे वनितामन्विष्याविलोक्यैनमानीय गुरवे निवेद्य तन्निदेशेन भवन्निकटमानीतवानस्मि' इति। (७१)

सर्वेषां सुहृदामेकदैवानुकूलदैवाभावेन महदाश्चर्यं विभ्राणो राजा 'रत्नो-

---

वालकेन··· ··· ···· ··· ··· ··· ··· अस्मि इति ॥ ७१।

प्रसङ्गः—सोमशर्मा राजहंसं स्वतानीतस्य रत्नोद्भवकुमारकस्य वृत्तान्तं श्रावयन्नाहः—

व्याख्या—वालकेन = रत्नोद्भवस्यपुत्रेण, सत्वसम्पन्नतया = शक्तिशालितया, सकलक्लेशसहेन = सम्पूर्णदुःखसहिष्णुना, अभावि = अभूत्। केसरिणा = सिंहेन, करिणं = हस्तिनम्, निहत्य = व्यापाद्य, कुत्रचित् = अज्ञातस्थानम्, अगामि गतम्। लतागृहात् = निकुञ्जात्, निर्गतः = बहिरागतः, अहम् = सोमशर्मा, अपि, तेजः पुञ्जं = तेजस्विनम्, बालकं = शिशुम्, शनैः = यत्नपूर्वकम्, भूमीरुहात् = भूरुहात्, अवतार्य = हस्तंगतम् कृत्वा, वनान्तरे = विपिनमध्ये, वनितां वृद्धां धात्रीम्, अन्विष्य = विशोध्य, अविलोक्य = अप्राप्य, एनं = बालकम्, आनीय = आश्रमे उपस्थाप्य, गुरवे = वामदेवाय, निवेद्य = समर्प्य, तन्निदेशेन = तदाज्ञया, भवन्निकटे = श्रीमतः पार्श्वे, आनीतवान् = उपस्थापितवान् अस्मि, अहमिति अध्याहार्यः ॥ ७१ ॥

विशेषः—अत्र मुनीनां भूतदया कविना समर्थिता ॥

सर्वेषाम् ··· ··· ··· ··· ··· ··· समर्पितवान् ॥ ७२ ॥

इस बालक ने, शक्ति सम्पन्न हाने के कारण समस्त दुःख झेल लिए। सिंह हाथी को मारकर कहीं चला गया। इसके वाद मैं लताकुंज से निकला और तेजस्वी बालक को वृक्ष से उतारकर जंगल में उस वृद्धा को खोजने लगा। जब वह कहीं न मिली तब लेकर अपने गुरु जी के पास आया। अब उनकी आज्ञानुसार आप के पास ले आया हूँ ॥ ७१ ॥

वामदेव के शिष्य का कथन सुनने के वाद राजा ने सोचा अहो! मेरे सभी

द्भवः कथमभवत्' इति चिन्तयंस्तन्नन्दनं पुष्पोद्भवनामधेयं विधाय तदुदन्तं व्याख्याय सुश्रुताय विषादसंतोषावनुभवंस्तदनुजतनय समर्पितवान् । (७२)

अन्येद्युः कंचन बालकमुरसि दधती वसुमती वल्लभमभिगता । तेन 'कुत्रत्योऽयम् इति पृष्टा समभाषत—'राजन् ! अतीतायां रात्रौ काचन दिव्य-

---

प्रसङ्गः—रत्नोद्भवस्य बालकं प्राप्य राजहंसेन यत्कृतम् तदेव कविना वर्ण्यते ॥

व्याख्या—सर्वेषां = सकलानाम्, सुहृदां = मित्राणाम्, एकदैव = एकेनैव सह, अनुकूलदैवाभावेन = दुर्भाग्येन, महदाश्चर्यं = विपुलविस्मयम्, बिभ्राणः = धारयन्, (सकलानां मित्राणामुपरि मयैव सह दुर्दैवस्य प्रहारः इति विचार्य) राजा = मगधेश्वरः, रत्नोद्भवः = सुश्रुतस्य अनुजः, कथमभवत् कां गतिं प्राप्तः, इति = एवम्, चिन्तयन् = शोचन्, तन्नन्दनं = तस्य पुत्रम्, पुष्पोद्भवनामधेयं = पुष्पोद्भव इति नामधेयं संज्ञा यस्य स तम्, विधाय = कृत्वा, तदुदन्तं = रत्नोद्भवस्य समाचारम्, व्याख्याय = श्रावयित्वा, सुश्रुताय = तस्य (रत्नोद्भवस्य) अग्रजाय विषादसन्तोषौ = (मित्रस्य नाशात् विषादः तस्य च पुत्रस्य प्राप्तेः संतोषः) क्लेशहर्षौ, अनुभवन् = भावयन्, तदनुजतनयं = तस्य कनिष्ठभ्रातुः पुत्रम् (तस्मै = सुश्रुताय) समर्पितवान् = प्रदत्तवान् ॥ ७२ ॥

विशेषः—राज्ञः राजहंसस्य व्यवस्थापरादृष्टिः विचारणीया ॥

अन्येद्युः··· ···· ··· ···· ··· ···अयासीत् इति ॥ ७३ ॥

व्याख्या—अन्येद्युः = अपरेद्युः, कञ्चन = एकम्, बालकं अर्भकम्, उरसि = उत्संगे, दधती = धारयन्ती, वसुमती = महाराज्ञी, वल्लभं = दयितम्, अभिगता = प्राप्ता । तेन = वल्लभेन, अयं = एषः (बालकः) कुत्रत्यः = कुतः प्राप्तः, इति पृष्टा प्रश्नाङ्कित्ता सती, समभाषत = व्याहृतवती = राजन् ! स्वामिन् ! अती-

---

मित्र भी आपत्तिग्रस्त हो गये ? पता नहीं रत्नोद्भव की क्या दशा हुई । फिर उन्होंने सुश्रुत् को बुलवाकर सारा वृत्तान्त सुनाया और उस रत्नोद्भव के पुत्र का नाम पुष्पोद्भव रखकर विषाद और हर्ष का अनुभव करते हुए पालन-पोषण करने के लिए दे दिया ॥ ७२ ॥

वनिता मत्पुरतः कुमारमेनं संस्थाप्य निद्रामुद्रितां मां विबोध्य विनीताऽब्रवीत्—'देवि ! त्वन्मन्त्रिणो धर्मपालनन्दनस्य कामपालस्य वल्लभा यक्षकन्याहं तारावली नाम, नन्दिनी मणिभद्रस्य। यक्षेश्वरानुमत्या मदात्मजमेतं भवत्तनूजस्याम्भोनिधिवलयवेष्टितक्षोणीमण्डलेश्वरस्य भाविनो विशुद्धयशोनिधे राजवाहनस्य परिचर्याकरणायानीतवत्यस्मि। त्वमेनं मनोजसंनिभमभिवर्धय, इति विस्मयविक-

तायां = व्यतीतायाम्, रात्रौ = निशायाम्, काचन = अज्ञातनाम्नी, दिव्यवनिता = दिव्यस्त्री, मत्पुरतः = मम समक्षम्, एनं = प्रस्तुतम्, कुमारं शिशुम्, संस्थाप्य = उपस्थितं कृत्वा, निद्रामुद्रितां = सुप्तिगतांम्, मां = वसुमतीम्, विबोध्य = उत्थाप्य, अब्रवीत् = कथितवती = देवि ! त्वन्मन्त्रिणः = तव सचिवस्य, धर्मपालनन्दस्य = धर्मपालसुतस्य, कामपालस्य, वल्लभा = पत्नी, अहम्, यक्षकन्या = गुह्यकस्य सुता, तारावलीनाम = तारावलीति संज्ञका, मणिभद्रस्य = मणिभद्रनाम्नः यक्षस्य, नन्दिनी = पुत्री। यक्षेश्वरानुमत्या = कुबेरस्य अनुज्ञया, एतं = एनम्, मदात्मजं = मम सुतम्, अम्भोनिधिवलयवेष्टितक्षोणीमण्डलेश्वरस्य = समुद्रः एव वलयं कटकं तेन वेष्टिता परिवृत्ता या क्षोणी पृथ्वी तस्याः मण्डलं तस्येश्वरः शासकः तस्य तथोक्तस्य, भाविनः भविष्यतः, विशुद्धयशोनिधेः = शुभकीर्तेः आकरस्य भवत्तनूजस्य = भवत्याः आत्मजस्य, राजवाहनस्य, परिचर्याकरणाय = सेवाकर्त्तुम्, आनीतवती = उपनीतवती, अस्मि। त्वं = वसुमती, मनोजसन्निभं = कामदेवसदृशम, (शारीरिकसौंदर्येण) एनं = मदीयं पुत्रम्. अभिवर्धय पालय, इति =

एक दिन, वसुमती एक बालक को गोद में लिए हुए राजा के पास गई। राजा के, 'यह कहाँ था', पूछने पर उसने कहा—देव ! कल रात्रि किसी अप्सरा ने आकर मुझ निद्रानिमग्ना को जगाकर बड़े ही विनीत भाव से कहा—देवि ! मैं मणिभद्र नामक यक्ष की पुत्री और आपके अमात्य धर्मपाल के पुत्र कामपाल की स्त्री हूँ। मेरा नाम तारावती है। यक्षेश्वर कुबेर की आज्ञा से इस अपने पुत्र को भविष्य में भूमण्डल का शासक होनेवाले आपके परम यशस्वी पुत्र राजवाहन की सेवा करने के लिए लाई हूँ। आप इस परम सुन्दर बालक का पालन करें। मैं उस यक्षिणी का कथन सुनकर नींद से जग पड़ी और आश्चर्यपूर्वक उसे देखने

सितनयनया मया सविनयं सत्कृता स्वक्षी यक्षी साप्यदृश्यतामयासीत्' इति ।
(७३)

कामपालस्य यक्षकन्यासंगमे विस्मयमानमानसो राजहंसो रञ्जितमित्रं सुमित्रं मन्त्रिणमाहूय तदीयभ्रातृपुत्रमर्थपालं विधाय तस्मै सर्वं वार्तादिकं व्याख्यायादात् । (७४)

ततः परस्मिन् दिवसे वामदेवान्तेवासी तदाश्रमवासी समाराधितदेवकीर्ति

एवम्, विस्मयविकसितनयनया = आश्चर्येण प्रफुल्लिते लोचने यस्याः सा तया, मया = वसुमत्या, सविनयं = विनम्रतासहितम्, सत्कृता = स्वागतीकृता, सा स्वक्षी=सुशोभने अक्षिणी लोचने यस्याः सा सुलोचना, यक्षी = यक्षस्त्री, अदृश्यतां = अन्तर्धानम्, अयासीत् = गता ॥ ७३ ॥

विशेषः—अनुप्रासच्छटा विलोकनीया ।

कामपालस्य···· ··· ···· ··· ··· ··· ···अदात् ॥ ७४ ॥

प्रसङ्गः—कामपालस्य वृत्तान्तं श्रुत्वा तस्य च पुत्रसम्बन्धे राजहंसेन यत्कृतं तदेव वर्ण्यते ।

व्याख्या—कामपालस्य = सुमित्रानुजस्य, यक्षकन्यासंगमे = गुह्यककन्यकया सह विवाहे, विस्मयमानमानसः = चकितचेताः, राजहंसः = राजा, रञ्जितमित्रं = विनोदितानि मित्राणि येन सः तथोक्तम्, सुमंत्रं = सुमंत्रनामकं, मन्त्रिणं = अमात्यम्, आहूय = आकार्य, तदीय भ्रातृपुत्रं = तस्य भ्रातुः कुमारम्, अर्थपालं = अर्थपालः इति संज्ञां विधाय = कृत्वा, तस्मै = सुमित्राय, सर्वं = सम्पूर्णम्, वार्तादिकं = वृत्तम्, व्याख्याय = व्याहृत्य, अदात् = समर्पितवान् ॥ ७४ ॥

ततः··· ···· ··· ··· ·· ···· ··· ···किम् इति ॥ ७५ ॥

लगी । पश्चात् मैंने विनम्रतापूर्वक उसका स्वागत किया । मेरे द्वारा सत्कृत होकर वह सुनयना यक्षिणी अन्तर्धान हो गयी ॥ ७३ ॥

कामपाल का यक्ष कन्या के साथ परिणय सुनकर आश्चर्यचकित राजा ने मंत्री सुमित्र को बुलवाया और उसके भ्रातृपुत्र का नाम 'अर्थपाल' रखकर सारी कथा सुनायी तथा पालन-पोषण करने के लिए दे दिया ॥ ७४ ॥

निर्भर्त्सितमारमूर्ति कुसुमसुकुमारं कुमारमेकमवगमय्य नरपतिमवादीत् 'देव ! विलोलालकं बालकं निजोत्सङ्गतले निधाय रुदतीं स्थविरामेकां विलोक्यावोचम् 'स्थविरे ! का त्वम्, अयमर्भकः कस्य नयनानन्दकरः, कान्तारं किमर्थमागता, शोककारणं किम्' इति। (७५)

प्रसङ्गः—वामदेवस्य मुनेः शिष्यः राज्ञः समक्षं एकं बालकमानीतवान्। स एव प्रसङ्गः कविना वर्ण्यते।

व्याख्या—ततः =तदनन्तरम्, परस्मिन् = अन्यस्मिन्, दिवसे = वासरे, वामदेवान्तेवासी = वामदेवऋषेः शिष्यः, तदाश्रमवासी = मुनेः आश्रमस्थः, समाराधितदेवकीर्तिम् = समाराधिता देवानां कीर्तिः येन सः तम् तथोक्तम्, निर्भर्त्सितमारमूर्ति = निर्भर्त्सिता = तिरस्कृता स्वसौन्दर्येण मारस्य मदनस्य मूर्तिः स्वरूपं येन सः तं तथोक्तम्, कुसुमसुकुमारं = पुष्पवत् कोमलम्;. एकं = कञ्चन, कुमारं बालकम्, अवगमय्य = प्रापय्य, नरपतिं = राजानम्, अवादीत् = अब्रवीत् देव = भूप ! विलोलालकं = चञ्चलकुन्तलम्, बालकं = शिशुम्, निजोत्संगतले = निजांकतले, निधाय = संस्थाप्य, रुदतीं = नयनसलिलं मुञ्चन्तीम्, एकां = काञ्चित्, स्थविराम् वृद्धाम्, विलोक्य = दृष्ट्वा, अवोचम् स्थविरे = वृद्धे, त्वं, का = किं नामधेया, अयं = असौ, अर्भकः बालकः, कस्य = नरस्य, नयनानन्दकरः = नयनयोः नेत्रयोः आनन्दकरः प्रीतिकरः ? कान्तारं = वनम्, किमर्थं = कस्मात् कारणात्, आगता = प्राप्ता (असि), शोककारणं = दुःखस्य हेतुः, किम् = कः, (अस्ति) ॥ ७५ ॥

विशेषः—शब्दसारल्यम् सुष्ठुरसानुगुणत्वञ्च।

कुछ दिनों के बाद एक दिन वामदेव के आश्रम का निवासी उनका एक शिष्य फूल जैसे कोमल एक बालक को लाकर राजा के सामने रख कर बोला—राजन् ! इस चञ्चल काकपक्षवाले बालक को अपनी गोद में लिए रोती हुई एक वृद्धा को देखकर मैंने कहा—वृद्धे ! तुम कौन हो ? यह मनोहर बालक किसका है ? जंगल में क्यों आयी हो ? किस लिए रो रही हो ? ॥ ७५ ॥

सा करयुगेन वाष्पजलमुन्मृज्य निजशोकशङ्कूत्पाटनक्षममिव मामवलोक्य शोकहेतुमवोचत्— द्विजात्मज ! राजहंसमन्त्रिणः सितवर्मणः कनीयानात्मजः सत्यवर्मा तीर्थयात्रामिषेण देशमेनमागच्छत्। स कस्मिंश्चिदग्रहारे कालीं नाम कस्यचिद् भूसुरस्य नन्दिनीं विवाह्य तस्या अनपत्यतया गौरीं नाम तद्भगिनीं काञ्चनकान्ति परिणीय तस्यामेकं तनयमलभत। काली सासूयमेकदा धात्र्या

सा ... ... शोच्यते इति ॥ ७६ ॥

प्रसङ्गः—वामदेवशिष्यः राजानं राजहंसं वृद्धावृत्तान्तं श्रावयन्नाहः—

व्याख्या—सा = स्थविरा, करयुगेन = पाणिद्वयेन, वाष्पजलं = नेत्रनीरम्, उन्मृज्य = प्रोञ्छ्य, निजशोकशङ्कूत्पाटनक्षमं = निजस्य स्वस्य शोकएव खेदएव शङ्कुः कीलः, तस्योत्पाटने उत्खातने निःसारणे वा क्षमः समर्थः यः सः तमिव मां = वामदेवशिष्यम्, अवलोक्य = वीक्ष्य, शोकहेतुं दुःखस्य कारणम्, अवोचत् = अब्रवीत्, द्विजात्मज—ब्राह्मणश्रेष्ठ ! राजहंससचिवस्य = सितवर्मणः, कनीयान् = कनिष्ठः, आत्मजः = तनयः, सत्यवर्मा = तन्नामा, तीर्थयात्रामिषेण = तीर्थाटन-व्याजेन, एनं = अमुम्, देशं = स्थानविशेषम्, अगच्छत् = प्राप्तः, सः = सत्यवर्मा, कस्मिंश्चित् = एकस्मिन्, राज्ञा दानरूपेण प्रदत्ते ग्रामे, कस्यचित् = एकस्य, भूसु-रस्य = विप्रस्य, नन्दिनीम् = तनयाम्, कालीनाम्नीम्, विवाह्य = परिणीय, तस्याः = काल्याः, अनपत्यतया = निःपुत्रतया, काञ्चनकान्ति = सुवर्णवर्णाम्, गौराङ्गीं वा, गौरीं = तन्नामधेयाम्, तद्भगिनीं = काल्याः सहोदराम्, परिणीय उद्वाह्य, तस्यां = गौर्याम्, एकं, तनयं = पुत्रम्, अलभत = प्राप्तवान्, काली = गौर्याः अग्रजा, सासूयं = सेर्ष्यम्, एकदा = एकस्मिन् दिने, धात्र्या = उपमात्र्या, मया = स्थविरया, सह = साकम्, एनं = अमुम्, वालं = कुमारम्, एकेन = केन-

---

उस वृद्धा ने दोनों हाथों से आंसू पोछ कर कहा—ब्राह्मण कुमार ! राजा राजहंस के मंत्री सितवर्मा का छोटा पुत्र सत्यवर्मा तीर्थयात्रा करने के लिए इस देश में आया था। उसने राज्य प्रदत्त एक गांव में 'काली' नामक किसो ब्राह्मण की कन्या से शादी करके उसके वन्ध्या हो जाने से उसी की सुन्दरी बहन गौरी से पुनः विवाह किया और उससे एक पुत्र पैदा किया। काली ने ईर्ष्यावश एक

मया सह बालमेनमेकेन मिषेणानीय तटिन्यामेतस्यामपक्षिपत् । करेणैकेन बालमुद्धृत्यापरेण प्लवमाना नदीवेगागतस्य कस्यचित्तरोः शाखामवलम्ब्य तत्र शिशुं निधाय नदीवेगेनोह्यमाना केनचित्तरुलग्नेन कालभोगिनाहमदंशि । मदवलम्बीभूतो भूरुहोऽयमस्मिन् देशे तीरमगमत् । गरलस्योद्दीपनतया मयि मृतायामरण्ये कश्चन शरण्यो नास्तीति मया शोच्यते इति । (७६)

चित्, मिषेण = कपटेन छलेन वा, आनीय = उपस्थाप्य, एतस्यां = पुरोवर्तमानायाम्, तटिन्यां = नद्याम्, अक्षिपत् = निक्षिप्तवती । एकेन = वामेन, करेण = पाणिना, बालं = अर्भकम्, उद्धृत्य = उपरिधारयित्वा, अपरेण दक्षिणेन करेण, प्लवमाना = तरन्ती, नदीवेगागतस्य = नद्याः प्रवाहेण प्राप्तस्य, कस्यचित् = एकस्य, तरोः भूरुहस्य, शाखां = स्कन्धम्, अवलम्ब्य = प्रगृह्य, तत्र = शाखायाम्, शिशुं = बालकम्, निधाय = निक्षिप्य, नदीवेगेन = सरितः प्रवाहेण, उह्यमाना = नीयमाना, केनचित् = एकेन, तरुलग्नेन = वृक्षे विराजितेन, कालभोगिना कृष्ण फणिना (फनिग इति भाषायाम्) नागेन वा, अहं = स्थविरा, अदंशि = संदष्टा मदवलम्बीभूतः = मया आश्रितः, भूरुहः = तरुः, अस्मिन् देशे = अत्र स्थाने, तीरं तटम्, अगमत् = अगच्छत् । गरलस्य = कालकूटस्य, उद्दीपनतया = प्रवृद्धया, मृतायां पञ्चत्वंगतायाम्, मयि, स्थविरायाम्, अरण्ये = वने, कश्चन = कोऽपि, शरण्यः = आश्रयः, नास्ति = न विद्यते, इति = कारणात्, मया = स्थविरया, शोच्यते = खिद्यते ।। ७६ ।।

विशेषः—अत्र करुणरसः कथाशिल्पञ्च प्रशस्यम् ।।

बार मुझ धायी से इस बालक को मगाकर हम दोनों को इस नदी में ढकेल दिया । मैंने एक हाथ से बालक को पकड़े हुए दूसरे हाथ से तैरते हुए नदी के प्रवाह में बहते हुए एक वृक्ष की शाखा पकड़कर जैसे ही इस बालक को रखा कि नदी के वेग की धारा में बहते हुए एक वृक्ष पर स्थित सर्प ने मुझे डँस लिया । मेरा अवलम्ब वृक्ष इसी स्थान पर आकर लग गया है । अब, मेरे शरीर में जहर फैलता जा रहा है । मेरे मर जाने पर बालक किसकी शरण में जायगा ? यही सोचकर मैं रो रही हूँ ।। ७६ ।।

ततो विषमविषज्वालावलीढावयवा सा धरणीतले न्यपतत् । दयाविष्टहृदयोऽहं मन्त्रबलेन विषव्यथामपनेतुमक्षमः समीपकुञ्जेष्वौषधिविशेषमन्विष्य प्रत्यागतो व्युत्क्रान्तजीवितां तां व्यलोकयम् । (७७)

तदनु तस्याः पावकसस्कारं विरच्य शोकाकुलचेताः बालमेनमगतिमादाय

ततो··· ··· ···· ··· ··· ··· ··· व्यलोकयम् ।। ७७ ।।

प्रसङ्गः—वामदेवऋषेः शिष्यः वृद्धायाः वृत्तान्तं कथयतिः—

व्याख्या—ततः = पश्चात्, विषमविषज्वालावलीढावयवा विषमया भयानकया विषस्य गरलस्य ज्वालया दाहेन अवलीढा व्याप्ताः अवयवाः अङ्गानि यस्याः सा तथोक्ता, सा = स्थविरा, धरणीतले = भूतले, न्यपतत् = पपात, दयाविष्टहृदयः = करुणाकलितमानसः, अहं = वामदेवान्तेवासी, मन्त्रबलेन = मन्त्रप्रयोगेण, विषव्यथाम् = कालकूटप्रभावम्, अपनेतुं = दूरीकर्त्तूम्, अक्षमः = असमर्थः समीपकुंजेषु = पार्श्वस्थलताभवनेषु, औषधिविशेषं = सर्पविषविनाशकौषधम्, अन्विष्य = अन्वेषणं कृत्वा, प्रत्यागतः = प्रत्यावर्तितः, व्युत्क्रान्तजीवितां = व्यपगतजीवनाम्, तां = स्थविराम्, व्यलोकयम् = अपश्यम् ॥ ७७ ॥

विशेषः—करुणरसः ।

तदनु ·· ···· ··· ··· ··· ···· ··· अनयम् इति ॥ ७८ ॥

प्रसङ्गः—मृतायां वृद्धायां वामदेवशिष्यः स्वकीयं कार्यं कथयति—

व्याख्या—तदनु = मृतायां वृद्धायाम्, तस्याः = स्थविरायाः, पावकसंस्कारं = अग्निदानकर्म, विरच्य = विधाय, शोकाकुलचेत्ता = व्यथया विकलं चेतः यस्य सः, (तथा भूतः अहम्) एनं = अमुम्, अगतिं = अनाथम्, बालं = शिशुम्, आदाय =

इतना कह चुकने के बाद ही वह सर्वशरीरव्यापी जहर के प्रभाव से विकल हो कर पृथ्वी पर गिर पड़ी । मैं दया से द्रवित होकर मंत्र इत्यादि न जानने के कारण पास की कुंज से जड़ी खोजकर जब तक आया तब तक वह वृद्धा मर चुकी थी ॥ ७७ ॥

उसके बाद उसका अग्नि संस्कार करके शोकाकुल हुआ इस असहाय बालक

सत्यवर्मवृत्तान्तवेलायां तन्निवासाग्रहारनामधेयस्याश्रुततया तदन्वेषणमशक्यमित्यालोच्य भवदमात्यतनयस्य भवानेवाभिरक्षितेति भवन्तमेनमानयम्' इति । (७८)

तन्निशम्य सत्यवर्मस्थितेः सम्यगनिश्चिततया खिन्नमानसो नरपतिः सुमतये मन्त्रिणे सोमदत्तं नाम तदनुजतनयमर्पितवान् । सोऽपि सोदरमागतमिव मन्य-

---

नीत्वा, सत्यवर्मवृत्तान्तवेलायां = सुमत्यनुजस्य समाचारश्रवणसमये, तन्निवासाग्रहारनामधेयस्य = तस्य सत्यवर्मणः निवासाग्रहारस्य निवासभूतग्रामस्य यन्नामधेयं तस्य, अश्रुततया = अज्ञाततया, तदन्वेषणं = तस्य मार्गणम्, अशक्यं = कठिनम्, इति, आलोच्य = विचार्य, भवदमात्यतनयस्य = त्वन्मन्त्रिपुत्रस्य, भवानेव = त्वमेव, अभिरक्षिता = संरक्षकः, इति, विचार्य, एनं = अमुम्, भवन्तं = त्वन्निकटम्, अनयम् = प्रापितवान्, (अहम्, इति अध्याहार्यः) ॥ ७८ ॥

विशेषः—अत्र इदं शास्त्रसम्मतं मतं कविना प्रस्थापितं यदनाथस्याग्निसंस्कारविधाने पुण्यं भवतीति ॥

तन्निशम्य··· ···· ···· ···· ··· ···· ··· ··· पुपोष ॥ ७९ ॥

प्रसङ्गः—वामदेवशिष्येन कथितं वृद्धायाः मरणस्य वृत्तान्तं श्रुत्वा, समुपस्थापितं च सत्यवर्मणः अनाथं बालकं प्राप्य राजहंसेन किं कृतमिति वर्ण्यते ।

व्याख्या—तत् = वामदेवान्तेवासिनः कथनम्, निशम्य श्रुत्वा, सत्यवर्मस्थितेः = सत्यवर्मजीवनस्य, सम्यगनिश्चिततया याथार्थ्येन अनिर्णीततया, खिन्नमानसः व्यथितहृदयः, नरपतिः = भूपतिः राजहंसः, सुमतये = तन्नाम्ने, मन्त्रिणे = अमात्याय, सोमदत्तं नाम = सोमदत्ताभिधम्, तदनुजतनयं = तस्य कनिष्ठभ्रातुः सुतम्, समर्पितवान्, सोऽपि, सुमतिरपि, सोदरं = भ्रातारम्, आगतं = प्राप्तम्, इव,

---

को लेकर, सत्यवर्मा का मिलना असम्भव समझकर, आप के पास आया हूँ । अब अपने मंत्रिपुत्र के रक्षक आप ही हैं ॥ ७८ ॥

सारी कथा सुन कर, सत्यवर्मा की अप्राप्ति से अत्यन्त दुःखी राजा ने सुमति नामक मंत्री को बुलाया और उसके भाई के उस बालक का नाम 'सोमदत्त' रख कर पालन पोषण के लिए समर्पित कर दिया । सुमति ने मानों भाई से भेंट हो

मानो विशेषेण पुपोष । (७९)

एवं मिलितेन कुमारमण्डलेन सह बालकेलीरनुभवन्नधिरूढानेकवाहनो राजवाहनोऽनुक्रमेण चौलोपनयनादिसंस्कारजातमलभत । ततः सकललिपिज्ञानं निखिलदेशीयभाषापाण्डित्यंषडङ्ग सहितवेदसमुदायकोविदत्वं काव्यनाटकाख्यान-काख्यायिकेतिहासचित्रकथासहितपुराणगणनैपुण्यं धर्मशब्दज्योतिस्तर्कमीमांसादि-

मन्यमानः = अनुभवन्, विशेषेण = अतिशयेन (प्रेम्णा) पुपोष = पालयामास ॥

एवम्.... ... ... अविन्दत ॥ ८० ॥

प्रसङ्गः—दशकुमाराणां सम्मेलने सति किमभूतमिति कविना वर्ण्यते—

व्याख्या— एवं = पूर्ववर्णितप्रकारेण, मिलितेन = एकत्रभूतेन, कुमारमण्डलेन = बालकसमूहेन, सह = साकम्, बालकेलीः = बाल्यकालीनाः क्रीडाः, अनुभवन् = कुर्वन्, अधिरूढानेकवाहनः = अधिरूढानि आरोहितानि अनेकानि विविधानि वाहनानि अश्वगजादीनि येन सः तथोक्तः, राजवाहनः = राजहंसस्य पुत्रः, अनुक्रमेण = क्रमानुसारम्, चौलोपनयनादिसंस्कारजातं = चौलं च उपनयनं च चौलोपनयने आदनी येषां संस्काराणां तेषां जातं समूहम्, (आचूडाकरणात् समावर्तन-संस्कारपर्यंतम्) अलभत = अप्रापयत् । ततः = संस्कारानन्तरम्, सकललिपिज्ञानं = समस्ताक्षरपरिचयम्, निखिलदेशीयभाषापाण्डित्यं = समस्तासु देशीयभाषासु वैदग्ध्यम्, षडङ्गसहितवेदसमुदायकोविदत्वं = षड्भिरङ्गः (शिक्षा-कल्प-व्याकरण-छन्दोनिरुक्त-ज्योतिषरूपैः वेदाङ्गैः) सहिते = युक्ते, वेदसमुदाये = चतुर्वेदेषु, कोविदत्वं = पाण्डित्यम्, काव्यनाटकाख्यायिकाख्यायिकेतिहासचित्रकथासहित-पुराणनैपुण्यं रामायणादिषु नाटकेषु-रूपकेषु कथानकेषु श्रोत्रपरम्परागतवृत्तेषु, महा-

गई, ऐसा समझते हुए अनुरागपूर्वक पालन करना प्रारम्भ कर दिया ॥ ७९ ॥

इस प्रकार एकत्र हुए दशकुमारों के साथ बालक्रीड़ा करते हुए वाहनकला-विद राजवाहन के क्रमशः चौल, उपनयन आदि संस्कार संपन्न हुए । उसके बाद उन कुमारों सहित उसने विभिन्न गुरुओं से समस्त लिपिज्ञान, सकलभाषापांडित्य षडङ्ग सहित वेदसमुदाय कोविदत्व, काव्य-नाटक आख्यानक आख्यायिका इतिहास चित्रकथा सहित पुराणों में निपुणता, धर्मशास्त्र व्याकरण ज्योतिष न्याय

समस्तशास्त्रनिकरचातुर्यं कौटिल्यकामन्दकीयादिनीतिपटलकौशलं वीणाद्यशेषवाद्यदाक्ष्यं संगीतसाहित्यहारित्वं मणिमन्त्रौषधादिमायाप्रपञ्चचुञ्चुत्वं मातङ्गतुरङ्गादिवाहनारोहणपाटवं विविधायुधप्रयोगचणत्वं चौर्यदुरोदरादिकपटकलाप्रौढत्वं च तत्तदाचार्येभ्यः सम्यग्लब्ध्वा यौवनेन विलसन्तं कुमारनिकरं निरीक्ष्य

भारतादिषु रमणीयाकथासु अष्टादशपुराणेषु च दक्षताम् धर्मशास्त्र ज्योतिस्तर्कमीमांसादि समस्तशास्त्रनिकरचातुर्यं धर्मश्च शास्त्रञ्च ज्योतिषञ्च तर्कश्च मीमांसा चेति धर्मशास्त्रज्योतिषतर्कमीमांसाः ताः आदयो येषां ते तथोक्तेषु चातुर्यं = नैपुण्यम्, कौटिल्य कामन्दकीयादिनीतिपटलकौशल अर्थशास्त्रे, नीतिशास्त्रे च भतृहरिशुक्रादीनां नीतिग्रन्थेषु च, कौशलं प्रावीण्यम्, वीणाद्यशेषवाद्यदाक्ष्यं वीणादिषु समस्त तन्त्रवाद्येषु समस्तमृदङ्गादिवाद्येषु च दाक्ष्यं प्रवीणताम्, संगीतसाहित्यहारित्वं = संगीतं नृत्यगीतादिकं च साहित्यं शिल्पकलादिकञ्च तयोः हारित्वं मनोहरत्वम्, मणिमन्त्रौषधादिमायाप्रपञ्चचुंचुत्वं मणिश्च यंत्रश्च औषधञ्च तानि आदीनि यस्य मायाप्रपञ्चस्य तत्र चुञ्चुत्वं प्रसिद्धिम्, मातङ्गतुरङ्गादिवाहनारोहणपाटवं मातङ्गश्च तुरङ्गश्च मातङ्गतुरङ्गौ हस्त्यश्वौ तौ आदी येषां तानि च वाहनानि च तेषु आरोहणस्य पाटवं = कौशल्यम्, (अत्र आदि पदेन रथादीनां संग्रहः) विविधायुध प्रयोगचणत्वं विविधानां नानाप्रकाराणां आयुधानां शस्त्रास्त्राणां प्रयोगेण संचालनेन वित्तः तस्य भावस्तत्त्वं विख्यातत्वम् चौर्यदुरोदरादिकपटकलाप्रौढत्वं चौरश्च दुरोदरश्च तौ आदी यस्याः कलायाः तस्यां प्रौढत्वं छलप्रपञ्चविधिषु पटुत्वम्, तत्तदाचार्येभ्यः तत्तच्छास्त्रस्यपारंगतेभ्यः, सम्यग्पूर्णतया, लब्ध्वा अधिगम्य, यौवनेन युवावस्थया विलसन्तं शोभमानम्, कुमारनिकरं दशकुमारसमूहम्, निरीक्ष्य प्रविलोक्य, महीवल्लभः भूवल्लभः सः राजहंसः, अहं, शत्रुजनदुर्लभः अरिभिः दुर्जयः

मीमांसा आदि दर्शनशास्त्रों में दक्षता, अर्थशास्त्र नीतिशास्त्रों में कुशलता वीणा आदि समस्त वाद्यों में प्रवीणता, गायन में सफलता, मणि, मंत्र औषधि आदि मायात्मक प्रपञ्चों में प्रसिद्धि, हाथी घोड़े आदि की सवारी में पटुता, हर तरह के आयुध प्रयोग में निपुणता और चोरी, द्यूत आदि कपटकलाओं में प्रौढता प्राप्त

महीवल्लभः सः 'अहं शत्रुजनदुर्लभः' इति परमानन्दममन्दमविन्दत। (८०)

इति श्रीदण्डिनः कृतौ दशकुमारचरिते कुमारोत्पत्तिर्नाम
प्रथम उच्छ्वासः।

—:०:—

इति इत्थं विचार्य, अमन्दं अत्यधिकम्, परमानन्दं सुखसमूहम्, अविदत अलभत, प्रापत ॥ ८० ॥

विशेषः—अत्र दण्डिनः बहुज्ञता द्रष्टव्या। समासानाञ्च द्वन्द्वबहुव्रीहीणां दीर्घाणां संयोजनकौशलम् श्लाघ्यम् शत्रुविजयाय सर्वविषयकं पाटवमपेक्षितमिति कवेराशयः ॥

इत्याचार्यदण्डिविरचितदशकुमारचरितस्य पूर्वपीठिकायाः प्रथमोच्छ्वासस्य
त्रिपाठियमुनेशचातकेन कृता 'प्रदीपिका' संस्कृत व्याख्या।

●

की। इस प्रकार सर्वगुण संपन्न कुमारों को देखकर राजा राजहंस 'अब मैं शत्रुओं के लिए अजेय हूँ।' सोचकर परम आनन्दित हुए ॥ ८० ॥

●

द्वितीयोच्छ्वासः

अथैकदा वामदेवः सकलकलाकुशलेन कुसुमसायकसंशयितसौन्दर्येण कल्पितसोदर्येण साहसापहसितकुमारेण सुकुमारेण जयध्वजातपवारणकुलिशाङ्कितकरेण कुमारनिकरेण परिवेष्टितं राजानमानतशिरसं समभिगम्य तेन तां कृतां

अथैकदा .... अभ्यभाषत ॥ १ ॥

प्रसङ्गः—स्वनामधन्येन महाकविना दण्डिना वामदेवराजहंसयोः सम्मेलनं वर्णयता कथ्यते—

व्याख्या—अथ = तत्पश्चात्, एकदा = एकस्मिन्दिवसे, वामदेवः = महर्षिः, सकलकलाकुशलेन = नृत्यगीतादिललितकलापारङ्गतेन, कुसुमसायकसंशयितसौंदर्येण = कुसुमसायकः कामदेवः तेन संशयितं संदिग्धं सौंदर्यं रूपं यस्य सः तेन तथोक्तेन, कल्पितसोदर्येण कल्पितं विहितं सोदर्यं परस्परभ्रातृत्वं येन सः तादृशेन, साहसापहसितकुमारेण साहसेन वीर्येण अपहसितः अधरीकृतः कुमारः कार्तिकेयः शंकरसुतः येन सः तेन तथोक्तेन, सुकुमारेण = सुकोमलवपुषा, जयध्वजातपवारणकुलिशाङ्कितकरेण = जयध्वजः विजयकेतुः आतपवारणं = छत्रं, कुलिशं वज्रं तैः अङ्कितौ चिन्हितौ करौ पाणी यस्य सः तेन तथोक्तेन, कुमारनिकरेण = दशकुमारसमूहेन, परिवेष्टितं = मण्डलीकृतम्, आनतशिरसं = कृतसाष्टाङ्गप्रणामम्, राजानं = नृपम् (राजहंसम्) समभिगम्य = उपसृत्य, तेन = राजहंसेन, कृतां =

एक दिन, महर्षि वामदेव राजा राजहंस से मिलने गये। उस समय राजहंस दशों कुमारों से घिरे हुए बैठे थे। वे कुमार कामदेव जैसे सुन्दर थे। उनकी वेश-भूषा मनोहर थी। उनका साहस और शौर्य ऐसा था कि स्वामी कार्तिकेय भी उपहसित हो जाते थे। उनके हाथों में जयध्वज, छत्र एवं कुलिश के चिह्न थे। राजा ने वामदेव को देखते ही उठकर उनका स्वागत किया। राजा को आशीर्वाद

परिचर्यामङ्गीकृत्य निजचरणकमलयुगलमिलन्मधुकरायमाणकाकपक्षं विदलिष्यमाणविपक्षं कुमारचयं गाढमालिङ्ग्य मितसत्यवाक्येन विहिताशीरभ्यभाषत ।

(१)

भूवल्लभ, भवदीयमनोरथफलमिव समृद्धलावण्यं तारुण्यं नुतमित्रो भवत्पु-

---

समर्पिताम्, परिचर्यां = सत्कारम् आतिथ्यम् वा, अङ्गीकृत्य = स्वीकृत्य, निजचरणकमलयुगलमिलन्मधुकरायमाणकाकपक्षम् = निजस्य वामदेवस्य चरणकमलयुगले = पादाम्बुजद्वये मिलन्तः निष्पतन्तः मधुकरायमाणाः मधुपा इवाचरन्तः काकपक्षाः शिखण्डकाः यस्य सः तम्, तादृशम्, विदलिष्यमाणविपक्षं = विदलिष्यमाणाः पराजेष्यमाणाः विपक्षाः रिपवः येन सः तम्, कुमारचयं = राजवाहन प्रमुखदशकुमारसमूहम्, गाढं = दृढम्, आलिङ्ग्य = परिष्वज्य, मितसत्यवाक्येन = अनधिकसत्यप्रियवचनेन, विहिताशीः = दत्ताशीः = दत्ताशीर्वचनम्, अभ्यभाषत = अब्रवीत् ॥ १ ॥

विशेषः—अत्र सर्वत्र अनुप्रासच्छटा विलोकनीया यमकसौंदर्यम् बन्धदार्ढ्यम् समाससंरचनञ्च ॥

भूवल्लभ··· ···· ··· ··· ··· ··· ····क्रियताम् इति ॥ २ ॥

प्रसङ्गः—विहिताशीर्वादः मुनिः वामदेवो व्याहरति—

व्याख्या—भूवल्लभ ! = राजन् ! भवदीयमनोरथफलमिव = भवदीयानां श्रीमतां मनोरथानां मनोकामानां फलमिव परिणमनमिव, समृद्धलावण्यं = समृद्धं = संवर्द्धितं लावण्यं सौंदर्यं यस्मिन् तत् तथोक्तम्, तारुण्यं = यौवनम्, नुतमित्रः = नूतानि = प्रशंसितानि मित्राणि सुहृदः यस्य सः तथोक्तः, भवत्पुत्रः = श्रीमतां तनयः, अनुभवति = प्राप्तः । सहचरसमेतस्य = सुहृत्सहितस्य, एतस्य = भवत्तन-

---

देने के बाद मुनि ने उन दशों कुमारों को आशीर्वाद दिया । वे कुमार सचमुच अत्यन्त सुन्दर थे । उनके भँवरों जैसे काले-काले बालों पर मुग्ध मुनि ने, अपनी प्रखर प्रतिभा से यह जान कर कि ये भविष्य में शत्रुदमन करेंगे, अंक से लगा लिया । पुनः उन्होंने राजा से कहा ॥ १ ॥

भूप ! आपका मनोरथ फल के सदृश मित्रों से युक्त, पुत्र युवा हो गया है ।

त्रोऽनुभवति । सहचरसमेतस्य नूनमेतस्य दिग्विजयारम्भसमयः एषः । तदस्य सकलक्लेशसहस्य राजवाहनस्य दिग्विजयप्रयाणं क्रियताम् इति । (२)

कुमारा माराभिरामा रामाद्यपौरुषा रुषा भस्मीकृतारयो रयोपहसित-समीरणा रणाभियानेन यानेनाभ्युदयाशंसं राजानमकार्षुः । तत्साचिव्यमितरेषां

यस्य, नूनं = अवश्यमेव, एषः = साम्प्रतिकः, दिग्विजयारम्भसमयः = दिग्विजय-प्रस्थानकालः । तत् = तस्मात् हेतोः, अस्य = भवत्पुत्रस्य, सकलक्लेशसहस्य = समस्तसंकटसहिष्णोः राजवाहनस्य, दिग्विजयप्रयाणं = दिशां विजयाय जयाय प्रयाणं = प्रस्थानं क्रियताम् = विधीयताम् ॥ २ ॥

विशेषः—अत्र मुनेः भविष्यदर्शित्वं सूच्यते ॥

कुमाराः ... ... विससर्ज ॥ ३ ॥

प्रसङ्गः—वामदेवमहर्षेः मंत्रणानुसारं कुमारैः सह राजवाहनस्य दिग्विजय-प्रयाणम् वर्ण्यते कविना—

व्याख्या—कुमाराः = दशकुमाराः, माराभिरामाः = कामदेववत् सुन्दराः रामाद्यपौरुषाः = रामः दशरथात्मजः आद्यः प्रथमो येषां ते तेषां पौरुषं सामर्थ्य-मिव पौरुषं पराक्रमो येषां ते, रुषा = क्रोधेन, भस्मीकृतारयः = विनष्टीकृत-शत्रवः, रयोपहसितसमीरणा = रयेन जवेन उपहसिताः अधरीकृताः, समीरणाः पवनाः यैस्ते तथोक्ताः, रणाभियानेन = रणं युद्धं अभियातीति गच्छतीति तेन तादृशेन यानेन = प्रस्थानेन, अभ्युदयाशंसं = अभ्युदये = विजये आशंसा आशा यस्य सः तं तादृशम्, राजानं = राजहंसम्, अकार्षुः = कृतवन्तः । तत्साचिव्यं = राजवाहनस्य साहाय्यम् इतरेषां = समवयस्ककुमाराणाम्, विधाय = कृत्वा, समु-

---

अतः मित्र समूह के साथ अब इसे दिग्विजय के लिए प्रस्थान करना चाहिए ॥२॥

वे अत्यन्त सुन्दर, परम पराक्रमी, शत्रुदल को तिरस्कृत करनेवाले राजकुमार राजा राजहंस को अभ्युदय के लिए प्रोत्साहित सा कर रहे थे। अतः उन्होंने मुनि के कथनानुसार समस्त कुमारों सहित अपने पुत्र राजवाहन को शुभ मुहूर्त में दिग्विजय के लिए भेज दिया ॥ ३ ॥

विधाय समुचितां बुद्धिमुपदिश्य शुभे मुहूर्ते सपरिवारं कुमारं विजयाय विससर्ज।
(३)

राजवाहनो मङ्गलसूचकं शुभशकुनं विलोकयन्देशं कञ्चिदतिक्रम्य विन्ध्याटवीमध्यमविशत्। तत्र हेतिहतिकिणाङ्कं कालायसकर्कशकायं यज्ञोपवीतेनानुमेयविप्रभावं व्यक्तकिरातप्रभावं लोचनपरुषं कमपि पुरुषं ददर्श। (४)

चितां अवसरानुसारिणीम्, बुद्धिं = मतिम्, उपदिश्य = निर्दिश्य, शुभे = प्रशस्ते, मुहूर्ते = लग्ने, सपरिवारं कुमारादिभिः सहितम्, कुमारं राजवाहनम्, विजयाय = दिग्विजयं कर्त्तुम्, विससर्ज = प्रेषयामास ॥ ३ ॥

राजवाहनः .... ददर्श ॥ ४ ॥

प्रसङ्गः— दिग्विजयप्रस्थानं वर्ण्यते।

व्याख्या—राजवाहनः = राजहंसपुत्रः, मङ्गलसूचकं = शुभसूचकम्, शुभशकुनं = मङ्गलनिमित्तम्, विलोकयन् = पश्यन्, कञ्चित् देशं = प्रदेशम्, अतिक्रम्य = उल्लंघ्य, विन्ध्याटवीमध्यं = विन्ध्यवनम्, अविशत् = प्रविशत्। तत्र = विन्ध्याटवीमध्ये, हेतिहतिकिणाङ्कः = हेतीनां = शस्त्राणाम् हतिभिः प्रहारैः ये किणाः व्रणाः तेषां अङ्काः चिह्नानि यस्य तं तथोक्तम्, कालायसकर्कशकायं = कृष्णलौहवत्कठोरशरीरम्, यज्ञोपवीतेन = यज्ञसूत्रेण, अनुमेयविप्रभावं = अनुमातुं योग्यः विप्रभावः ब्राह्मणभावः यस्य सः तं तथोक्तम्, व्यक्तकिरातप्रभावं = व्यक्तः प्रकटीकृतः किरातस्य भिल्लस्य प्रभावः बलम् येन सः तं तथोक्तम्, लोचनपरुषं = भयानकदर्शनम्, कमपि = एकम्, पुरुषं = नरम्, ददर्श = विलोकितवान् ॥ ४ ॥

तेन ... . किमेतत् इति ॥ ५ ॥

प्रसङ्गः— राजवाहनप्राप्तपुरुषयोः परस्परं वार्तालापः वर्ण्यते—

राजवाहन मांगलिक शकुनों को देख कर प्रस्थित हुआ। और कुछ चलने के बाद विन्ध्यवन में पहुँचा। वहाँ उसने भयंकर नेत्रोंवाले, काले लोह के समान कठोर तथा शस्त्रों के निशान से युक्त शरीरवाले, यज्ञोपवीतधारी किरातवंशी ब्राह्मण को देखा ॥ ४ ॥

तेन विहितपूजनो राजवाहनोऽभाषत —'ननु मानव, जनसङ्गरहिते मृगहिते घोरप्रचारे कान्तारे विन्ध्याटवीमध्ये भवानेकाकी किमिति निवसति। भवदंसोपनीतं यज्ञोपवीतं भूसुरभावं द्योतयति। हेतिहतिभिः किरातरीतिरनुमीयते। कथय किमेतत्' इति। (५)

'तेजोमयोऽयं मानुषमात्रपौरुषो नूनं न भवति' इति मत्वा स पुरुषस्तद्वय-

---

व्याख्या—तेन = शबरवेषपुरुषेण, विहितपूजनः = सत्कृतः, राजवाहनः, अभाषत = अवदत् = 'ननु, मानव ! हे मनुष्य !, जनसङ्गरहिते = नरनिवासशून्ये, मृगहिते = मृगाणां वन्यजीवाना कृते हिते लाभकरे, घोरप्रचारे = घोरः संकटापन्नः प्रचारः संचारः यस्मिन् तत् तस्मिन् तथोक्ते, कान्तारे = गहने, विन्ध्याटवीमध्ये = विन्ध्यविपिने, भवान् = श्रीमन्, किमिति कस्मात्, एकाकी = एक एव, निवसति = निवासं करोति। भवदंसोपनीतं = भवतः श्रीमतः अंसं स्कन्धं उपनीतं प्राप्तम्, यज्ञोपवीतम्, = यज्ञसूत्रम्, भूसुरभावं = ब्राह्मणत्वम्, द्योतयति = प्रकटयति। हेतिहतिभिः = शस्त्रप्रहाराङ्कैः, किरातरीतिः = शबराचरणम्, अनुमीयते = लक्ष्यते। एतत् = इदम्, किं = कथम् इति, कथय = वर्णय॥ ५॥

तेजोमयोऽयम्··· ··· ··· ···· ··· ···· ·· ब्राह्मण इति॥ ६॥

प्रसङ्गः - किरातवेषधारी पुरुषः स्वकीयं वृत्तान्तं राजवाहनं श्रावयन्नाह—

व्याख्या—तेजोमयः = तेजस्वी, अयं = सम्मुखोपस्थितः नरः, मानुषमात्रपौरुषः = मानुषः प्रमाणमिति मानुषमात्रम् नरप्रमाणम् पौरुषं = सामर्थ्यं यस्य सः तथोक्तः, नूनं = निश्चयेन, न भवति = न भवितुं योग्यः, इति मत्वा = विचि-

---

उस किरात वेशधारी पुरुष से आदर सत्कार पाने के बाद राजवाहन ने पूछा—हे भाई ! आप इस निर्जन वन में अकेले क्यों रहते हैं ? आप के कन्धे में पड़ी जनेऊ आपको ब्राह्मण घोषित करती है और शस्त्रों के घावों के चिह्नों से किरात होने का भी अनुमान होता है। बतलाइए यह क्या रहस्य है॥ ५॥

वह पुरुष, राजवाहन के सम्बन्ध में उसके मित्रों के मुख से पूर्व विश्रुतवृत्त था। अतः देखने पर 'यह तेजस्वी मात्र मनुष्य ही नहीं है', ऐसा विचार करके, अपना वृत्तान्त कहने लगा—'राजकुमार !, इस जंगल में, वेद पाठन-पठन से

स्य मुखान्नामजनने विज्ञाय तस्मै निजवृत्तान्तमकथयत्—'राजनन्दन, केचिदस्यामटव्यां वेदादिविद्याभ्यासमपहाय निजकुलाचारं दूरीकृत्य सत्यशौचादिधर्मव्रातं परिहृत्य किल्विषमन्विष्यन्तः पुलिन्दपुरोगमास्तदन्नमुपभुञ्जाना बहवो ब्राह्मणब्रुवा निवसन्ति तेषु कस्यचित्पुत्रो निन्दापात्रचारित्रो मातङ्गो नामाहं सहकिरातबलेन जनपदं प्रविश्य ग्रामेषु धनिनः स्त्रीबालसहितानानीयाटव्यां बन्धने निधाय

न्त्य, सः = किरातरूपी, पुरुषः, तद्वयस्यानाम् = तस्य मित्राणाम्, मुखात् = वदनात् नामजनने = नाम च जननं उत्पत्तिश्च नाम जनने, विज्ञाय = ज्ञात्वा, निजवृत्तान्तं = स्वकीयं वृत्तम्, तस्मै = राजवाहनाय, अकथयत् = वर्णितवान् = राजनन्दन ! राजकुमार, ! केचित् = कतिचित्, अस्यां = पुरोवर्तमानायां, अटव्यां = अरण्यान्याम्, वेदादिविद्याभ्यासं = वेदादीनां ब्राह्मणोचितानां विद्यानां अभ्यासं = अध्ययनम्, अपहाय = विस्मार्य, निजकुलाचारं = ब्राह्मणवंशव्यवहारम्, इतीकृत्य = प्रविहाय, सत्यशौचादिधर्मव्रातं सत्यञ्च शौचञ्च ते आदिर्येषां तादृशाणां व्रातं समूहं परिहृत्य = त्यक्त्वा, किल्विषं = कुकर्म, अन्विष्यन्तः = मार्गमाणः, पुलिन्दपुरोगमाः = भिल्लनायकाः, तदन्नं = पुलिन्दान्नम्, उपभुञ्जानाः = भक्षयन्तः = बहवः अनेके ब्राह्मब्रुवाः = आत्मानं ब्राह्मणं ब्रुवन्तीति, ब्राह्मणापसदाः, निवसन्ति = निवासं कुर्वन्ति । तेषु = ब्राह्मणापसदेषु, कस्यचित् = एकस्य, पुत्रः = सुतः, अहं, निन्दापात्रचरित्रः = निन्दापात्रं कुत्सितं चरित्रं आचरणं यस्य सः तथोक्तः, मातङ्गोनाम = मातङ्गाभिधः (अस्मि) । सोऽहम्, किरातबलेन = शबरसैन्येन, सह = साकम्, जनपदं = ग्रामम्, प्रविश्य = गत्वा, ग्रामेषु = जनपदेषु, धनिनः = सम्पत्तिसम्पन्नान्, स्त्रीबालसहितान् = स्त्रीभिः बालैः पुत्रैश्च सहितान् समन्वितान्, अटव्यां = वने, आनीय = नीत्वा, बन्धने = पाशे, निधाय = आबध्य, तेषां = धनिनाम्, सकलधनं = समस्तसम्पत्तिम्, अपहरन्, स्वायत्तीकुर्वन्, उद्धतः = उद्-

---

विरत, शौचादि धर्म से हीन, पाप परायण, पुलिन्दों के अन्न पर जीविका निर्वाह करने वाले कुछ ब्राह्मण रहते हैं। उन्हीं में से एक ब्राह्मण का, निन्दित चरित्र वाला मातङ्ग नामक पुत्र हूँ। मै किरातसेना के साथ नगरों में जाकर, स्त्री-बच्चों सहित धनिकों को पकड़ कर जंगल में लाता हूँ। और यहाँ उनका सारा धन

तेषां सकलधनमपहरन्नुद्धतो वीतदयो व्यचरम् । कदाचिदेकस्मिन् कान्तारे मदीयसहचरगणेन जिघांस्यमानं भूसुरमेकमवलोक्य दयायत्तचित्तोऽब्रवम्—'ननु पापाः, न हन्तव्यो ब्राह्मण' इति । (६)

ते रोषारुणनयना मां बहुधा निरभर्त्सयन् । तेषां भाषणपारुष्यमसहिष्णुरहमवनिसुररक्षणाय चिरं प्रयुध्य तैरभिहतो गतजीवितोऽभवम् । (७)

दण्डः, वीतदयः = निर्दयः, व्यचरम् = अभ्रमम्, कदाचित् = एकदा, एकस्मिन् = कस्मिश्चित्, कान्तारे = विषमे मार्गे, मदीयसहचरगणेन मम साकं चरेण, जिघांस्मानं = व्यापादयितुमिष्यमाणं, वधार्थमानीयमानम्, एकम्, भूसुरं = भूदेवम्, अवलोक्य = दृष्ट्वा, दयायत्तचित्तः = दयार्द्रचित्तः, (अहं) अब्रवम् = अवदम्, —'ननु !, पापाः ! दुराचारिणः !, ब्राह्मणः' = भूसुरः, न हन्तव्यः = वधार्हः । ६ ॥

तं ... ... अभवम् ॥ ७ ॥

प्रसङ्गः—पूर्वोक्तः एव ।

व्याख्या—ते = शबराः, रोषारुणनयनाः = रोषेण क्रोधेन अरुणानि शोणितवर्णानि नयनानि नेत्राणि येषां ते तथोक्ताः, मां = मातङ्गम्, बहुधा = भृशम्, निरभर्त्सयन् = प्रताडितवन्तः । तेषां = सहचरकिरातानाम्, भाषणपारुष्यं = कठोरवचनम्, असहिष्णुः = असहनशीलः, अहं = मातङ्गः, अवनिसुररक्षणाय = ब्राह्मणसंरक्षणाय, चिरं दीर्घकालपर्यन्तम्, प्रयुध्य = प्रकृष्टं संघर्षं कृत्वा, तैः = किरातैः, अभिहतः = प्रघातितः, गतजीवितः = मृतः, अभवम् = आसम् ॥ ७ ॥

ततः ... ... गम्यतामिति ॥ ८ ॥

प्रसङ्गः—मयि मृते सति किमभूदिति व्याहरति मातङ्गः ।

निर्दयतापूर्वक छीन कर जीविका चलाता हुआ स्वच्छन्द घूमा करता हूँ । एक बार अपने साथियों को एक ब्राह्मण का वध करने के लिये उद्यत देख कर मैं द्रवित हो कर बोला—'अरे दुराचारियों ब्राह्मण को नहीं मारना चाहिये ! ॥ ६ ॥

उन मेरे साथियों ने, मेरा कथन सुनकर अत्यन्त क्रुद्ध हो मेरी काफी भर्त्सना की । उनकी कटूक्तियों से मैं तिलमिला उठा और उस ब्राह्मण की रक्षा के लिये बहुत देर तक युद्ध कर के अन्त में मृत्यु को प्राप्त हो गया ॥ ७ ॥

ततः प्रेतपुरीमुपेत्य तत्र देहधारिभिः पुरुषैः परिवेष्टितं सभामध्ये रत्नखचितसिंहासनासीनं शमनं विलोक्य तस्मै दण्डप्रणाममकरवम्। सोऽपि मामवेक्ष्य चित्रगुप्तं नाम निजामात्यमाहूय तमवोचत् - 'सचिव, नैषोऽमुष्य मृत्युसमयः। निन्दितचरितोऽप्ययं महीसुरनिमित्तं गतजीवितोऽभूत्। इतःप्रभृति विगलितकल्मषस्यास्य पुण्यकर्मकरणे रुचिरुदेष्यति। पापिष्ठैरनुभूयमानमत्र

व्याख्या—ततः = मरणानन्तरम्, प्रेतपुरीम् = यमलोकम्, उपेत्य = गत्वा, तत्र = यमलोके, देहधारिभिः शरीरधारिभिः, पुरुषैः = मनुष्यैः, कर्मकरैः वा, परिवेष्टितं = परिवृत्तम्, सभामध्ये = संसदः मध्ये, रत्नखचितसिंहासनासीनं = मणिव्यासासने उपविष्टम् शमनं = यमम्, विलोक्य = प्रेक्ष्य, तस्मै = यमदेवाय, दण्डप्रणामं = साष्टाङ्गनमनम्, अकरवम् = कृतवान्। सोऽपि = यमोऽपि, मां = मातङ्गम्, अवेक्ष्य = दृष्ट्वा, चित्रगुप्तंनाम = चित्रगुप्तनामानम्, निजामात्यं = स्वकीयं मन्त्रिणम्, आहूय = आकार्य, तं = अमात्यम्, अवोचत् = उक्तवान्,—सचिव ! = अमात्य !, अमुष्य = अस्य, एषः = अयम्, मृत्युसमयः = मरणकालः, न = नास्ति। निन्दितचरितोऽपि = गर्हिताचरणोऽपि, अयं = असौ, महीसुरनिमित्तं = भूदेवार्थम्, गतजीवितः = गतप्राणः, अभूत् = अजायत। इतः प्रभृति = अस्मात् वासरात्, विगलितकल्मषस्य विगलितं कल्मषं पापं यस्य सः तथोक्तः तस्य, अस्य = एतस्य, पुण्यकर्मकरणे = सुकृतसमाचरणे, रुचिः इच्छा, उदेष्यति = भविष्यति। अत्र = यमलोके, पापिष्ठैः = पापाचरणशीलैः, अनुभूयमानं = भुज्यमानम्, यातनाविशेषं = कष्टविशेषम्, विलोक्य = निरीक्ष्य, पुनरपि = भूयो-

---

मर जाने के बाद यमलोक में पहुँचा। वहाँ शरीरधारी पुरुषों से घिरे, मणिमय सिंहासन पर आसीन यमराज को देख कर दण्ड-प्रणाम किया। यमराज ने मुझे देख कर चित्रगुप्त नामक अपने अमात्य को बुलाया और कहा—'सचिव !, अभी इस व्यक्ति की मृत्यु का समय नहीं आया है। इसने निन्द्य चरित्र होने पर भी ब्राह्मण के रक्षार्थ प्राणोत्सर्ग किया है। अतः अब से यह निष्कलुष हो गया। इसके अन्दर धर्म की प्रवृत्ति जगेगी। अतः पापियों को मिलनेवाली यातनाओं का अवलोकन कराकर इसे पूर्व शरीर में भेज दें॥ ८॥

यातनाविशेषं विलोक्य पुनरपि पूर्वंशरीरमनेन गम्यताम्' इति । (८)

चित्रगुप्तोऽपि तत्र तत्र सन्तप्तेष्वायसस्तम्भेषु बध्यमानान्, अत्युष्णीकृते विततशरावे तैले निक्षिप्यमाणान्, लगुडैर्जर्जरीकृतावयवान्, निशितटङ्कैः परितक्ष्यमाणानपि दर्शयित्वा पुण्यबुद्धिमुपदिश्य मामनुमुञ्चत् । तदेव पूर्वशरीरमहं प्राप्तो महाटवीमध्ये शीतलोपचारं रचयता महीसुरेण परीक्ष्यमाणः शिलायां शयितः क्षणमतिष्ठम् । (९)

ऽपि, पूर्वशरीरम् = मातङ्गदेहम्, अनेन = अत्रागतेन अमुना, गम्यतां = व्रज्यताम् ॥ ८ ॥

विशेषः—अत्र कविना शास्त्रीयामर्यादा सुरक्षिता । तस्य च ब्रह्मण्यत्वं सविशेषतया सूच्यते ॥

चित्रगुप्तोऽपि ... ... अतिष्ठम् ॥ ९ ॥

प्रसङ्गः—म तङ्गः स्वता दृष्टं यमलोकं वर्णयन्नाह—

व्याख्या—चित्रगुप्तोऽपि = यमसचिवोऽपि, तत्र-तत्र = स्थाने-स्थाने, सन्तप्तेषु = अत्युष्णेषु, आयसस्तम्भेषु = लोहविनिर्मितडित्थेषु, वध्यमानान् = बध्यन्ते इति बध्यमानाः तान् निबद्धान्, अत्युष्णीकृते = संतप्तीकृते विततशरावे = प्रसृतपात्रे, तैले = स्नेहे, निक्षिप्यमाणान् = निपात्यमाणान्, लगुडैः = दण्डैः, जर्जरीकृतावयवान् = शिथिलीकृताङ्गान्, निशितटङ्कैः = तीक्ष्णपाषाणशकलैः, परितक्ष्यमाणानपि = घर्ष्यमाणान् अपि, दर्शयित्वा = अक्षीकारयित्वा, पुण्यबुद्धिं = धर्मधियम्, उपदिश्य = उद्बुध्य, मां = मातङ्गम्, अमुञ्चत् = त्यक्तवान् । तदैव = तस्मिन्नेव काले, वा तत् = पूर्वशरीरम्, एव, अहं = मातङ्गः, प्राप्तः = अधिगतः, महाटवीमध्ये = अरण्यान्तरे, शीतलोपचारं = शिशिरोपायम्, रचयता = कुर्वता,

---

चित्रगुप्त ने कहीं सन्तप्त लोहस्तम्भ में बँधे हुए, कहीं खौलते हुए तेल में डाले जाते हुए, कहीं बेंत से पीटे जाते हुए और कहीं आरे से चीरे जाते हुए पापी जीवों को दिखा कर धर्माचरण का उपदेश देकर मुझे छोड़ दिया । छूटने के बाद मैं ब्राह्मण से संरक्षित अपने पूर्व शरीर में लौट आया और उसके द्वारा जल के छींटे आदि से एक क्षण में ही सचेष्ट होकर उठ बैठा ॥ ९ ॥

तदनु विदितोदन्तो मदीयवंशबन्धुगणः सहसागत्य मन्दिरमानीय मामपक्रान्तव्रणमकरोत् । द्विजन्मा कृतज्ञो मह्यमक्षरशिक्षां विधाय विविधागमतन्त्रमाख्याय कल्मषक्षयकारणं सदाचारमुपदिश्य ज्ञानेक्षणगम्यमानस्य शशिखण्डशेखरस्य पूजाविधानमभिधाय पूजां मत्कृतामङ्गीकृत्य निरगात् । (१०)

महीसुरेण = भूसुरेण, परीक्ष्यमाणः = समीक्ष्यमाणः (मृतो वा जीवितो वेति) शिलायां = पाषाणखण्डे, शयितः = सुप्तः, क्षणं = पलं यावत्, अतिष्ठम् = आसम् ।

विशेषः—अत्र कविना कृतं यमपुर्याः वर्णनम् गरुणपुराणानुसारमेव वेदितव्यम् लौकिकशब्दानां सफलप्रयोगोऽपि द्रष्टव्यः ॥ ९ ॥

तदनु ... ... निरगात् ॥ १० ॥

प्रसङ्गः—मातङ्गः राजवाहनं स्वकीयं वृत्तान्तं श्रावयति—

व्याख्या—तदनु = तदनन्तरम्, विदितोदन्तः = ज्ञातवृत्तः, मदीयवंशबन्धुगणः = मम कुलजाः बान्धवाः, सहसा = अकस्मात्, आगत्य = उपस्थितिंविधाय, मन्दिरं = गृहम्, आनीय = नीत्वा, मां = मातङ्गम्, अपक्रान्तव्रणं = विगताघातचिह्नम् स्वस्थम्, अकरोत् = कृतवान् । द्विजन्मा = विप्रः, कृतज्ञः = कृतं जानातीति कृतवित्, मह्यं = मातङ्गाय, अक्षरशिक्षां = लिपिज्ञानम्, विधाय = दत्त्वा, विविधागमतन्त्रं = विविधानां = बहूनाम्, आगमानां शास्त्राणाम् तन्त्रं सिद्धान्तं आख्याय = व्याहृत्य, कल्मषक्षयकारणम् = पापध्वंसनिमित्तम् सदाचारं = साधुव्यवहारम्, उपदिश्य = कथयित्वा, ज्ञानेक्षणगम्यमानस्य = ज्ञाननयनेन-अवबुध्यमानस्य न तु चर्मनेत्रेण, शशिखण्डशेखरस्य = शङ्करस्य, पूजाविधानं = अर्चानियमम्, अभिधाय = निर्दिश्य, मत्कृतां मया विहिताम्, पूजां = अतिथिसत्कारम्, अङ्गीकृत्य = गृहीत्वा, निरगात् = निःशेषेण अगच्छत् ॥ १० ॥

उसके बाद, मेरे विषय में जानकारी प्राप्त करके कुटुम्बी लोग वहाँ आये और घर ले गये । वहाँ उपचार से मेरा घाव ठीक हुआ । उस कृतज्ञ ब्राह्मण ने मुझे अक्षर-ज्ञान कराया । विविध आगम तथा पापक्षयकारीमन्त्रोपदेश दिये और अन्त में उसने भगवान् शिव की उपासना का आदेश देकर मेरे द्वारा सत्कृत होकर अपने घर की राह ले ली ॥ १० ॥

तदारभ्याहं किरातकृतसंसर्गं बन्धुवर्गमुत्सृज्य सकललोकैकगुरुमिन्दुकलावतंसं चेतसि स्मरन्नस्मिन्कानने दूरीकृतकलङ्को वसामि । 'देव, भवते विज्ञापनीयं रहस्यं किञ्चिदस्ति । आगम्यताम् इति । (११)

स वयस्यगणादपनीय रहसि पुनरेनमभाषत —'राजन्, अतीते निशान्ते

तदारभ्याहं .. ..आगम्यताम् इति ॥ ११ ॥

प्रसङ्गः—मातङ्गनामा पुरुषः स्वस्याटवीनिवासस्य कारणं कथयति—

व्याख्या—तदारभ्य = ततः प्रभृति, अहं मातङ्गः, किरातकृतसंसर्गं = किरातै भिल्लैः कृतः विरचितः संसर्गः साहचर्यं येन सः तं तथोक्तम्, बन्धुवर्गं = कुटुम्बिनां समूहम्, उत्सृज्य = विहाय, सकललोकैकगुरुं = साकलानां निखिलानां लोकानां = जीवानाम्, एकं = अद्वितीयं गुरुं = ज्ञानदातारम्, इन्दुकलावतंसं = चन्द्रमसः कला (षोडशोभागः) अवतंसः शिरोभूषणं यस्य सः तं शिवम्, चेतसि = हृदये, स्मरन् = जपन्, अस्मिन् = अत्र, कानने = विपिने, दूरीकृतकलङ्कः = निष्पापः, वसामि = निवसामि, देव ! भगवन् !, भवते = श्रीमते, विज्ञापनीयं = कथनीयम्, किञ्चित् = एकम्, रहस्यं = गोप्यम्, अस्ति = वर्तते, आगम्यतां = चलतु, इति ॥ ११ ॥

विशेषः—भाषासारल्यम् सुष्ठु ॥

सः ....साहाय्यम् इति ॥ १२ ॥

प्रसङ्गः—सः मातङ्गः राजवाहनं रहस्यं कथयति—

व्याख्या—सः = मातङ्गः, वयस्यगणात् = सखासमूहात्, अपनीय = पृथक् नीत्वा, रहसि = निर्जने, पुनः = भूयः, एनं राजवाहनम्, अभाषत् = अकथयत्, —'राजन् ! = राजकुमार !, अतीते = विगते, निशान्ते = चतुर्थदिनवेलायाम्,

---

तभी से मैं किरातों से सम्बन्धित अपने बन्धुओं को छोड़ कर भगवान् शिव की आराधना करता हुआ इस घोर वन में निष्कलंक होकर रह रहा हूँ । हे देव ! आप से कुछ गोपनीय वार्ता करनी है । आइये ! ॥ ११ ॥

वह राजवाहन को मित्र मण्डली से अलग ले जाकर कहने लगा—'राजन् !, पिछली भोर के सपने में भगवान् शङ्कर मेरे पास आये और उन्होंने जगाकर

गौरीपतिः स्वप्नसन्निहितो निद्रामुद्रितलोचनं विबोध्य प्रसन्नवदनकान्तिः प्रश्रयानतं मामवोचत्—'मातङ्ग, दण्डकारण्यान्तरालगामिन्यास्तटिन्यास्तीरभूमौ सिद्धसाध्याराध्यमानस्य स्फटिकलिङ्गस्य पश्चादद्रिपतिकन्यापदपङ्क्तिचिह्नितस्याश्मनः सविधे विधेराननमिव किमपि बिलं विद्यते। तत्प्रविश्य तत्र निक्षिप्तं ताम्रशासनं शासनं विधातुरिव समादाय विधिं तदुपदिष्टं दिष्टविजयमिव विधाय

गौरीपतिः = शङ्करः, स्वप्नसन्निहितः = स्वप्ने स्वप्नावस्थायाम् सन्निहितः समीपमागतः, निद्रामुद्रितलोचनं = सुषुप्तिं गते लोचने नयने यस्य सः तं तथोक्तम्, मां, विबोध्य = जाग्रतं कृत्वा, प्रसन्नवदनकान्तिः = सौम्याननदीप्तिः, प्रश्रयावनतं = प्रश्रयेण ईशानुरक्त्या आनतं विनमितम्, मां = मातङ्गम्, अवोचत् = उक्तवान् = मातङ्ग ! दण्डकान्तरालगामिन्याः = दण्डकान्तराले गच्छतीति तस्याः तथाभूतायाः, तटिन्याः सरितः, तीरभूमौ = पुलिनप्रदेशे, सिद्धसाध्याराध्यमानस्य = सिद्धैः कृतब्रह्मसाक्षात्कारैः साध्यैः = गणदेवताभिः आराध्यमानस्य = समर्च्यमानस्य, स्फटिकलिङ्गस्य = स्फटिकप्रस्तरेण निर्मितस्य शिवलिङ्गस्य, पश्चात् = पृष्ठभागे, अद्रिपतिकन्यापदपङ्क्तिचिन्हितस्य = अद्रिपतिः हिमालयः तस्य कन्या पार्वती तस्याः पदपङ्क्त्या चरणपद्धत्या चिन्हितस्य अङ्कितस्य, अश्मनः = पाषाणस्य, सविधे = पार्श्वे, विधेः = विधातुः, आननमिव = मुखमिव, किमपि = एकम्, विलं = विवरम्, विद्यते = अस्ति। तत् = विलम्, प्रविश्य = गत्वा, तत्र = विले, निक्षिप्तं = निहितम्, ताम्रशासनं = ताम्रपत्रम्, विधातुः = वेधसः, शासनं = आदेशपत्रम्, इव = सदृशम्, समादाय = गृहीत्वा, तदुपदिष्टं = तत्पत्रे लिखितम्, दिष्टविजयं = भाग्यविजयिनम्, विधिं = व्यापारम्, विधाय = कृत्वा, पाताललोकाधीश्वरेण = रसातलशासकेन भवता त्वया (मातङ्गेन) भवितव्यम् =

कहा—'मातङ्ग !, इस दण्डकारण्य से होकर गुजरने वाली नदी के तट पर स्थित सिद्ध-साध्यों से पूजित शङ्कर के स्फटिक लिङ्ग के पीछे पार्वती के चरणों से चिह्नित पत्थर के समीप ब्रह्मा के मुख जैसा एक विवर है। उसमें प्रविष्ट होकर ब्रह्मा के शासन के सदृश रखे हुए ताम्रपत्र में अंकित विधि के अनुसार आचरण करके पाताल के राजा बनोगे। तुम्हारा सहायक राजा आज या कल आयेगा।

पातालल्लोकाधीश्वरेण भवता भवितव्यम् । भवत्साहाय्यकरो राजकुमारोऽद्य श्वो वा समागमिष्यति' इति । तदादेशानुगुणमेव भवदागमनमभूत् । साधनाभिलाषिणो मम तोषिणो रचय साहाय्यम्' इति । (१२)

'तथा' इति राजवाहनः साकं मातङ्गेन नमितोत्तमाङ्गेन विहायार्धरात्रे निद्रापरतन्त्रं मित्रगणं वनान्तरमवाप । तदनु तदनुचराः कल्येन साकल्ये राजकुमारमनवलोकयन्तो विषण्णहृदयास्तेषु तेषु वनेषु सम्यगन्विष्यानवेक्षमाणा एत-

---

स्यात् । भवत्साहाय्यकरः = तव सहायकः, राजकुमारः = राजसूनुः, अद्य श्वोवा एकद्वयोः दिवसयोः समागमिष्यति = एष्यति । इति । तदादेशानुगुणमेव= भगवतः शिवस्य आज्ञानुसारमेव, भवदागनम् = तवोपस्थितिः, अभूत् = जाता । साधनाभिलाषिणः = उपायेच्छुकस्य, मम = मातङ्गस्य, तोषिणः = संतोषवृत्तेः, साहाय्यं = सहयोगम्, रचय = कुरु, इति ॥ १२ ॥

विशेषः—कौतूहलमुत्पाद्य कथा अग्रे नीयते ॥

तथा ... ... ययुः ॥ १३ ॥

प्रसङ्गः—मातङ्गस्य निवेदनं श्रुत्वा राजवाहनेन यत् कृतं तदेव कविना वर्ण्यते—

व्याख्या—'तथा' इति = यथाभवतोक्तं तथैवास्तु, इति, राजवाहनः = राजहंससुतः, नमितोत्तमाङ्गेन = नमितं नतीकृतं उत्तमाङ्गं शिरः येन सः तेन तथोक्तेन, मातङ्गेन, साकं = सह, निद्रापरतन्त्रं = सुषुप्तं, मित्रगणं = सखासमूहम्, विहाय = हित्वा, अर्धरात्रे = निशीथे, वनान्तरं = अपरं अरण्यम्, अवाप = प्राप्तः, तदनु = तत्पश्चात्, तदनुचराः = तस्य सेवकाः, कल्ये = प्रत्यूषे, साकल्येन = सर्वतोभावेन, राजकुमारं = राजवाहनम्, अनवलोकयन्तः = अनीक्षमाणाः, विषण्णहृदयाः = खिन्नमानसाः, तेषु-तेषु = तत्र-तत्र, वनेषु = काननेषु, सम्यक् = पूर्णतया, अन्विष्य = विशोध्य, अनवेक्षमाणाः = अनवलोकयन्तः, एतदन्वेषणमनीषया

उनके आदेशानुसार ही आप आये हैं । अतः सब प्रकार से तुष्ट मुझ कार्येच्छुक की सहायता करें ॥ १२ ॥

मातङ्ग की बात सुनकर राजवाहन 'ठीक है' कहकर अपने मित्रवर्ग को

दन्वेषणमनीषया देशान्तरं चरिष्णवोऽतिसहिष्णवो निश्चितपुनःसंकेतस्थानाः परस्परं वियुज्य ययुः । (१३)

लोकैकवीरेण कुमारेण रक्ष्यमाणः सन्तुष्टान्तरङ्गो मातङ्गोऽपि बिलं शशिशेखरकथिताभिज्ञानपरिज्ञातं निःशङ्कं प्रविश्य गृहीतताम्रशासनो रसातलं पथा तेनैवोपेत्य तत्र कस्यचित्पत्तनस्य निकटे केलीकाननकासारस्य विततसारसस्य

= राजवाहनगवेषणेच्छया, देशान्तरे = अपरंदेशम्, चरिष्णवः = गन्तुकामाः, अतिसहिष्णवः = दुःखसहनशीलाः, निश्चितपुनःसंकेतस्थानाः = निश्चितं निर्णीतं संकेतस्थानं सम्मेलनस्थानम् यैस्ते तथोक्ताः, परस्परं = मिथः, वियुज्य = पृथग्भूय, ययुः = चलितवन्तः ॥ १३ ॥

लोकैकवीरेण···· ···· ···· ···· ··· ···तनुमलभत ॥ १४ ॥

प्रसङ्गः—मातङ्गेन सह गते सति राजवाहने तदनुचराः तमन्वेष्टुं गताः । राजवाहनमातङ्गाभ्यां किमाचरितमिति वर्ण्यते ।

व्याख्या—लोकैकवीरेण = एकश्चासौवीरः एकवीरः लोकेषु त्रिभुवनेषु एकवीरः अद्वितीयवीरः अतुलपराक्रमः तेन तादृशेन, कुमारेण = राजवाहनेन, रक्ष्यमाणः = गोप्यमानः, संतुष्टान्तरङ्गः = हृष्टहृदयः, मातङ्गः = किरातवेषधारी ब्राह्मणोऽपि, शशिशेखरकथिताभिज्ञानपरिज्ञातं = शङ्करेग उक्तं यत् लक्षणं तेन अवगतम्, बिलं विवरम्, निःशङ्कं = निर्भयम्, यथा स्यात्तथा, प्रविश्य = गत्वा, गृहीतताम्रशासनः = गृहीतं स्वायत्तीकृतं ताम्रशासनं ताम्रपट्टम् येन सः तथोक्तः मातङ्गः, रसातलं = पातालम्, तेनैव = ताम्रपत्रवर्णितेनैव, पथा मार्गेण, उपेत्य = गत्वा, तत्र = पाताले, कस्यचित् = एकस्य, पत्तनस्य = नगरस्य, निकटे = समीपे, केलीकाननकासारस्य = क्रीडावनसरसः, विततसारसस्य = वितताः प्रसृताः

निद्रावस्था में छोड़कर, उसके साथ दूसरे वन में चला गया । उसके चले जाने के बाद सोकर उठे हुए मित्र भी उसे कहीं न देखकर खोजते हुए, एक स्थान पर मिलने का संकेत रखकर यत्र-तत्र चले गये ॥ १३ ॥

अद्वितीय वीर राजवाहन से अभिरक्षित होकर संतुष्टान्तरङ्ग मातङ्ग शङ्कर के निर्देशानुसार विना किसी शङ्काके बिलमें घुस गया । वहाँ ताम्रपत्र के उल्लेख

समीपे नानाविधेनेशशासनविधानोपपादितेन हविषा होमं विरच्य प्रत्यूहपरिहारिणि सविस्मयं विलोकयति राजवाहने समिधाज्यसमुज्ज्वलिते ज्वलने पुण्यगेहं देहं मन्त्रपूर्वकमाहुतीकृत्य तडित्समानकान्तिं दिव्यां तनुमलभत । (१४)

तदनु मणिमयमण्डनमण्डलमण्डिता सकललोकललनाकुलललामभूताकन्यका

सारसाः जलविहगविशेषाः यस्मिन् सः तस्य, समीपे = निकटे, नानाविधेन = बहुप्रकारेण, ईशशासनविधानोपपादितेन = भगवतः यत् शासनं तदेव विधानं आदेशविधिः तेन सम्पादितम् तेन तथोक्तेन, हविषा = होमद्रव्येण, होमं = आहुतिं, विरच्य = विधाय, प्रत्यूहपरिहारिणि = बाधानिवारके, राजवाहने, सविस्मयं, विलोकयति = पश्यति सति, समिदाज्यसमुज्वलिते = समिद्भिः आम्रादिदारुभिः आज्यैः घृतैः समुज्वलिते प्रदीप्ते, ज्वलने = पावके, पुण्यगेहं = सुकर्मफलाधारम्, देहं = शरीरम्, मन्त्रपूर्वकं = समन्त्रं यथा स्यात्तथा, आहुतीकृत्य = होमीकृत्य, तडितसमानकान्तिं = विद्युत्तुल्यप्रभाम्, दिव्यां = स्वर्गीयां, तनुं = देहम्, अलभत = प्राप्तवान् ॥ १४ ॥

विशेषः—अनुप्रासयमकयोः छटा विलोकनीया ॥

तदनु ··· ···· ···· ···· ··· ···· ··· ··· अभाषत ॥ १५ ॥

प्रसङ्गः—अग्नौ भूते सति भस्मीभूते दिव्यदेहं गते च मातङ्गे किमभूत्, वर्ण्यते—

व्याख्या— तदनु = तदनन्तरम्, मणिमयमण्डनमण्डलमण्डिता = मणिमयानां हीरकादिरत्नमयानां मण्डनानां अलङ्काराणां मण्डलैः समूहैः मण्डिता विभूषिता, सकललोकललनाकुलललामभूता = सकलस्य निखिलस्य लोकस्य ललनाकुलेषु स्त्रीसमुदायेषु ललामभूता मण्डनभूता शोभास्वरूपा, काचन = एका कन्यका = कुमारी,

---

के अनुसार एक नगर मिला। उस नगर के निकट एक सारसों से युक्त वापिका थी। उस वापिका के तट पर उसने परिश्रमपूर्वक समिधा एकत्र करके चिता बनाई और राजवाहन के देखते-देखते उसी मे जलकर दिव्य शरीर धारण कर लिया ॥ १४ ॥

उसके पश्चात् उस दिव्य शरीरधारी मातङ्ग ब्राह्मण के समक्ष मणिरत्नों से

काचन विनीतानेकसखीजनानुकम्प्यमाना कलहंसगत्या शनैरागत्यावनिसुरोत्तमाय मणिमेकमुज्ज्वलाकारमुपायनीकृत्य तेन 'का त्वम्' इति पृष्टा सोत्कण्ठा कलकण्ठस्वनेन मन्दं मन्दमुदञ्जलिरभाषत। (१५)

'भूसुरोत्तम, अहमसुरोत्तमनन्दिनी कालिन्दी नाम। मम पितास्य लोकस्य शासिता महानुभावो निजपराक्रमसहिष्णुना विष्णुना दूरीकृतामरे समरे यम-

---

विनीतानेकसखीजनानुगम्यमाना = विनीतैः विनम्रैः अनेकसखीजनैः बहुसहचरीसमूहैः अनुगम्यमाना, कलहंसगत्या = कलहंसवत् गतिः गमनं तया हंसवद्गमनेन, शनैः = मन्दम्, आगत्य = अभ्युपेत्य, अवनिसुरोत्तमाय = भूसुखराय (मातङ्गाय), उज्ज्वलाकारं = दीप्तिपूर्णम्, एकम्, मणिं = महार्घरत्नम्, उपायनीकृत्य = उपहार रूपेण दत्वा, तेन = मातङ्गब्राह्मणेन, का त्वम् त्वं काऽसि, इति एवम्, पृष्टा = उक्ता, सोत्कण्ठा = सोत्सुका, कलकण्ठस्वनेन = मधुरस्वरेण, उदञ्जलिः = बद्धाञ्जलिः, मन्दं-मन्दं = शनैः-शनैः अभाषत = उवाच ॥ १५ ॥

विशेषः—अत्रानुप्रासच्छटा हृदयहारिणी।

भूसुरोत्तम··· ··· ···· ··· ··· ··· ···अभाषत ॥ १६ ॥

प्रसङ्गः—असुरराज कन्या कालिन्दी स्वकीयं वृत्तं मातङ्गं श्रावयति —

व्याख्या—भूसुरोत्तम = विप्रवर !, अहम्, असुरोत्तमनन्दिनी = राक्षसश्रेष्ठस्य पुत्री, कालिन्दी, नाम = नाम्नी, मम = कालिन्द्याः, पिता = जनकः, अस्य लोकस्य = रसातलस्य, शाशिता = राजा, महानुभावः = महान् अनुभावः प्रभावो यस्य सः, निजपराक्रमासहिष्णुना = निजस्य स्वस्य पराक्रम एव वीरतायाः असहिष्णुः तेन तथोक्तेन, विष्णुना = हरिणा, दूरीकृतामरे = विजितदेवे, समरे = संग्रामे,

---

सुसज्जित परमसुन्दरी एक रमणी आई, जिसने उसे एक अत्युज्ज्वलमणि भेंट की। मणि लेने के बाद मातङ्ग ने पूछा —तुम कौन हो ?। वह मुस्कराकर कहने लगी—॥ १५ ॥

'ब्राह्मणश्रेष्ठ !, मै असुराधिप की कन्या—कालिन्दी हूं। इस लोक के राजा मेरे परम पराक्रमी पिता को विष्णु भगवान् ने युद्ध में मार कर यमलोक भेज

नगरातिथिरकारि। तद्वियोगशोकसागरमग्नां मामवेक्ष्य कोऽपि कारुणिकः सिद्धतापसोऽभाषत। (१६)

'बाले, कश्चिद्दिव्यदेहधारी मानवो नवो वल्लभस्तव भूत्वा सकलं रसातलं पालयिष्यति' इति। तदादेशं निशम्य घनशब्दोन्मुखी चातकी वर्षागमनमिव तवालोकनकाङ्क्षिणी चिरमतिष्ठम्। मन्मनोरथफलायमानं भवदागमनमवगम्य

यमनगरातिथिः=यमपुरनिवासी, अकारि=कृतः, तद्वियोगशोकसागरमग्नां=तस्य पितुः वियोगः विनाशः तस्मात् जातः यः शोकः सः एव सागरः समुद्रः तत्र मग्ना तां तथोक्ताम्, मां=कन्यकाम्, अवेक्ष्य=प्रेक्ष्य, कोऽपि=कश्चित्, कारुणिकः=दयालुः, सिद्धतापसः=सिद्धतपस्वी, अभाषत=कथितवान्॥

बाले .. .. भवान् इति॥ १७॥

प्रसङ्गः—कालिन्दी स्वकीयं वृत्तान्तं कथयति—

व्याख्या—बाले! कन्यके! कश्चित्=एकः, दिव्यदेहधारी=स्वर्गीयशरीरधारी, मानवः=नरः, तव=कालिन्द्याः, नवः=नवीनः, वल्लभः=पतिः, भूत्वा सकलं=निखिलम्, रसातलं=पातालम्, पालयिष्यति=रक्षिष्यति, इति। तदादेशं=तस्य तपस्विनः आज्ञाम्, निशम्य=श्रुत्वा, घनशब्दोन्मुखी=घनस्य=जलदस्य शब्देन गर्जनेन उन्मुखी ऊर्ध्वमुखी, चातकी=सारङ्गी, वर्षागमनं=जलदागमकालस्य आगमनम्, इति, तव=भवतः, आलोकनकांक्षिणी=दर्शनाभिलाषिणी, चिरं=बहुसमयम्, अतिष्ठम्=अवसम्। मन्मनोरथफलायमानं=मम कालिन्द्याः मनोरथस्य अभिलाषस्य फलायमानं परिणामभूतम्, भवदागमनं=तव आगमनम्, अवगम्य=ज्ञात्वा, मद्राज्यावलम्बभूतामात्यानुमत्या=मत् मम राज्यस्य

दिया। पिता के शोक में निमग्न मुझे देख कर किसी परम कारुणिक सिद्ध तापस ने कहा—॥ १६॥

'बाले! कोई दिव्यशरीरधारी मानव तुम्हारा पति बन कर समस्त पाताल का पालन करेगा। उस तपस्वी के कथनानुसार मैं घनोन्मुखी चातकी की भाँति आप के आगमन की राह देख रही थी। और अब, आप की उपस्थिति को अपना फलीभूत मनोरथ समझकर मन्त्रियों की अनुमति से सकामा होकर आप के

मद्राज्यावलम्बभूतामात्यानुमत्या मदनकृतसारथ्येन मनसा भवन्तमागच्छम् । लोकस्यास्य राजलक्ष्मीमङ्गीकृत्य मां तत्सपत्नीं करोतु भवान्' इति । (१७)

मातङ्गोऽपि राजवाहनानुमत्या तां तरुणीं परिणीय दिव्याङ्गनालाभेन हृष्टतरो रसातलराज्यमुररीकृत्य परमानन्दमाससाद । (१८)

वञ्चयित्वा वयस्यगणं समागतो राजवाहनस्तदवलोकनकौतूहलेन भुवं

पुरुस्य अवलम्बभूतानां = सहायकीभूतानाम्, अमात्यानां = सचिवानाम् अनुमत्या अनुमोदनेन, मदनकृतसारथ्येन = मदनेन मन्मथेन कृतं विहितं सारथ्यं रथचालकत्वम् यस्य तत् तेन तथोक्तेन, मनसा = मानसेन, भवन्तं = श्रीमन्तम्, आगच्छम् = उपस्थिता । अस्य लोकस्य = रसातलदेशस्य, राजलक्ष्मीं = सौभाग्यश्रियम्, मां = कालिन्दीम्, स्वीकृत्य = परिणीय, तत्सपत्नीं = राजलक्ष्म्याःप्रतिपक्षरमणीम्, करोतु = विदधातु, भवान् = श्रीमान्, इति ॥ १७ ॥

विशेषः — नारी सहजसमर्पणवतीति सिद्धान्तमनुधावितम् कविवरेणेति ।

मातङ्गोऽपि ... ... आससाद ॥ १८ ॥

प्रसङ्गः—मातङ्गस्य कालिन्द्या सह परिणयः वर्ण्यते—

व्याख्या—मातङ्गोऽपि = दिव्यदेहमुपगतः किरातविप्रोऽपि, राजवाहनस्य, अनुमत्या = अनुमोदनेन, तां = कालिन्दीनाम्नीम्, तरुणीं = युवतीम्, परिणीय = विवाह्य, दिव्याङ्गनालाभेन = स्वर्गीयवनिताप्राप्त्या, हृष्टतरः = प्रमुदितः, रसातलराज्यं = असुरदेशम्, ऊरीकृत्य = अधिकृत्य, परमानन्दं = परप्रमोदम्, आससाद = प्रापः ॥ १८ ॥

वञ्चयित्वा... ... ... बभ्राम ॥ १९ ॥

प्रसङ्गः—राजवाहनस्य रसातलात् प्रत्यागमनं निगद्यते—

पास आई हूँ । आप इस पाताल लोक की राज्यलक्ष्मी की सपत्नीस्वरूपा मुझे पत्नीरूप में वरण करें ॥ १७ ॥

मातङ्ग ने राजवाहन का अनुमोदन प्राप्त करके उस दिव्याङ्गना से विवाह कर लिया । और रसातल का राज्य पा कर परमानन्द का अनुभव करने लगा ॥ १८ ॥

गमिष्णुः कालिन्दीदत्तं क्षुत्पिपासादिक्लेशनाशनं मणिं साहाय्यकरणसन्तुष्टान्मतङ्गाल्लब्ध्वा काञ्चनाध्वानमनुवर्तमानं तं विसृज्य विलपथेन तेन निर्ययौ। तत्र च मित्रगणमवलोक्य भुवं बभ्राम। (१९)

भ्रमंश्च विशालोपशल्ये कमप्याक्रीडमासाद्य तत्र विशश्रमिषुरान्दोलिकारूढं

व्याख्या—वयस्यगणं = सहचरसमूहम्, वञ्चयित्वा = अविज्ञाय, समागतः = पातालं प्राप्तः, राजवाहनः = राजहंससूनुः, तदवलोकनकौतूहलेन = तस्य वयस्य वर्गस्य दर्शनोत्कण्ठया, भुवं = मर्त्यलोकम्, गमिष्णुः = गमनाभिलाषी, कालिन्दीदत्तं = असुरकन्यकया निवेदितम्, क्षुत्पिपासादिक्लेशनाशनं = क्षुधा च पिपासा च ते आदी येषां क्लेशानां ते क्षुत्पिपासादयः क्लेशाः तेषां नाशनं = शामकम्, मणिं = रत्नम्, साहाय्यकरणसन्तुष्टात् = सहायताप्रदानेन तोषमुपगतात्, मातङ्गात्, लब्ध्वा = प्राप्य, कञ्चन = किञ्चिद्दूरम्, अध्वानं = मार्गम्, अनुवर्तमानं = अनुगच्छन्तम्, तं = मातङ्गम्, विसृज्य = विहाय, तेन = पूर्वपरिचितेन, विलपथेन = विवरमार्गेण, निर्ययौ = निरगच्छत्। तत्र च = भुवि, मित्रमण्डलं = सखावर्गम्, अनवलोक्य = अप्राप्य, भुवं = धरित्रीम्, बभ्राम = परिभ्रमितुमारब्धः॥ १९॥

भ्रमंश्च.... ... . पस्पर्श॥ २०॥

प्रसङ्गः—भ्रमता मित्रवर्गमन्वेष्टुं राजवाहनेन किं कृतमिति वर्ण्यते—

व्याख्या—भ्रमन् = पर्यटन्, विशालोपशल्ये = विशालं विपुलं उपशल्यं ग्रामान्तः तस्मिन् विशालग्रामस्य समीपे, कमपि = एकम्, आक्रीडं = राज्ञः उपवनम्, आसाद्य = प्राप्य, तत्र = उपवने, (साधरणे वने) विशश्रमिषुरान्दोलिकारूढं = विशश्रमिषुः = विश्रामं कर्तुमिच्छुः, आन्दोलिकारूढं शिविकायां संस्थितम्,

मित्र वर्ग को धोखे में डाल कर आया हुआ राजवाहन भी इस समस्त वृत्तान्त के अवलोकन से आश्चर्यचकित हुआ, कालिन्दी प्रदत्त क्षुत्पिपासानाशक मणि को, अपनी सहायता से संतुष्ट मातङ्ग के द्वारा प्राप्त करके, कुछ दूरी तक पहुँचाने के लिये आये हुए मातङ्ग को विदा करके, विलमार्ग से बाहर निकल आया, वहाँ मित्रों को न देखकर इधर-उधर घूमने लगा॥ १९॥

उसने घूमते हुए, विशालग्राम के पास एक उपवन में विश्राम करने के लिये

रमणीसहितमाप्तजनपरिवृतमुद्याने समागतमेकं पुरुषमपश्यत् । सोऽपि परमानन्देन पल्लवितचेता विकसितवदनारविन्दः 'मम स्वामी सोमकुलावतंसो विशुद्धयशोनिधी राजवाहनः एषः । महाभाग्यतयाकाण्ड एवास्य पादमूलं गतवानस्मि । सम्प्रति महान्नयनोत्सवो जातः' इति ससंभ्रममान्दोलिकाया अवतीर्य सरभसपदविन्यासविलासिहर्षोत्कर्षचरितस्त्रिचतुरपदान्युद्गतस्य चरणकमलयुगलं गलदुल्लसन्मल्लिकावलयेन मौलिना पस्पर्श । (२०)

रमणीसहितम् = रमण्या तरुण्या सहितं युक्तम्, आप्तजनपरिवृतं = आप्तजनैः आत्मीयजनैः परिवृतं परिवेष्टितम्, उद्याने = उपवने आक्रीडे, समागतम्; एकं = कश्चित्, पुरुषं = मनुष्यम्, अपश्यत् = दृष्टवान् । सोऽपि = शिविकारूढः पुरुषोऽपि, परमानन्देन = परमहर्षेण, पल्लवितचेताः = पल्लवितं प्रफुल्लितं चेतः चित्तं यस्यासौ प्रफुल्लचित्तः, विकसितवदनारविन्दः = प्रसन्नाननः, मम = मे, स्वामी = राजकुमारः, सोमकुलावतंसः = चन्द्रवंशमण्डनः, विशुद्धयशोनिधिः = विशुद्धानि च तानि यशांसि विशुद्धयशांसि तेषां निधिः कोशः, एषः = पुरोदृश्यमानः, राजवाहनः । महाभाग्यतया = भाग्ययोगेन, अकाण्डे = असमये, एव, अस्य = मम स्वामिनः, पादमूलं = चरणसन्निधिम्, गतवान् = प्राप्तवान्, अस्मि सम्प्रति = अधुना, महान् = परमः, नयनोत्सवः = लोचनानन्दः, जातः = प्राप्तः । इति = एवं विचार्य, ससम्भ्रमं = सहसा, आन्दोलिकायाः = शिविकायाः, अवतीर्य = बहिरागत्य, सरभसेन = रथसेन, शीघ्रतया सहितेन युक्तेन, पदविन्यासेन = प्रादप्रक्षेपेण, विलसतीति = विलासी, हर्षाणां उत्कर्षस्य चरितं भावः यस्य सः हर्षोत्कर्षचरितः, त्रिचतुरपदानि = त्रीणि चत्वारि वा त्रिचतुराणि पदानि, उद्गतस्य = प्रचलितस्य (राजवाहनस्य), चरणकमलयुगलं = पादाम्बुजद्वयम्, गलदुल्लसन् मल्लिकावलयेन = गलत् विनम्रीभवनेन भ्रश्यत्, उल्लसत् = विकसत् मल्लिकायाः तदाद्यपुष्प-

---

आये हुए परिजनों से परिवेष्ठित रमणीयुक्त पालकी में बैठे हुए एक व्यक्ति को देखा । वह पुरुष भी अत्यन्त प्रसन्नता से विभोर सा हुआ कह उठा—"अरे ! यह तो सोमकुलावतंस मेरे स्वामी 'राजवाहन हैं' ! परम भाग्य ही है कि जो अनायास ही इन्हें पा गया । बहुत बड़े नयनोत्सव का यह समय है ! " और पालकी से

प्रमोदाश्रुपूर्णो राजा पुलकिताङ्गं तं गाढमालिङ्ग्य 'अये सौम्य सोमदत्त!' इति व्याजहार। ततः कस्यापि पुन्नागभूरुहस्य छायाशीतले तले संविष्टेन मनुजनाथेन सप्रणयमभाणि—'सखे ! कालमेतावन्तं, देशे कस्मिन्, प्रकारेण केनास्थायि भवता, संप्रति कुत्र गम्यते, तरुणी केयं, एष परिजनः सम्पादितः कथं, कथय' इति। (२१)

विशेषस्य वलयं = माल्यम् यस्मात् तेन तथाभूतेन, मौलिना उत्तमाङ्गेन, मस्तकेन, पस्पर्श = स्पृष्टवान् ॥ २० ॥

विशेष:—मित्रयोः सम्मेलनं हर्षदमेव भवति। दण्डिनः सरलपदेष्वपि समासनिर्वाहः श्लाघ्यः ॥

प्रमोदाश्रुपूर्णो... ... . कथय'इति ॥ २१ ॥

प्रसङ्गः - परस्परसम्मेलनात् समुपजातहर्षौ सोमदत्तराजवाहनौ वर्ण्यते।

व्याख्या—प्रमोदाश्रुपूर्णः = प्रमोदस्य आनन्दस्य अश्रुभिः वाष्पैः पूर्णः परिप्लुतः, राजा = राजवाहनः, पुलकिताङ्गं = रोमाञ्चितावयवम्, तं = व्यक्तिम्, गाढं = निर्भरम्, आलिङ्ग्य = उपगुह्य, 'अये! सौम्य = प्रिय !, सोमदत्त ! इति एवम् व्याजहार = अकथयत्। ततः = तत्पश्चात्, कस्यापि = एकस्य, पुन्नागभूरुहस्य = नागकेशरतरोः, छायाशीतले = छायया शीतले शिशिरे तले = अधःप्रदेशे, संविष्टेन = आसीनेन, मनुजनाथेन राज्ञा राजवाहनेन, सप्रणयं = सानुरागम्, अभाणि = उक्तः, सखे = सुहृद ! एतावन्तं, कालं = समयम्, कस्मिन् = कुत्र, देशे = स्थानविशेषे, केन प्रकारेण = कथम्, भवता = त्वया, अस्थायि = स्थितम्, सम्प्रति = अधुना, कुत्र = क्व, गम्यते = व्रज्यते, इयं साकंचरा, तरुणी = युवती, का ?, एषः, परिजनः = सेवकसमूहः, कथं = केन प्रकारेण, सम्पादितः = प्राप्तः, कथय = वद इति ॥ २१ ॥

उतरकर तीन चार कदम चलकर अपने मल्लिकावलययुक्त मस्तक को राजवाहन के चरणों पर झुका दिया ॥ २० ॥

प्रमोदाश्रुपूर्ण राजा राजवाहन ने उस पुलकिताङ्ग पुरुष का गाढ़ालिङ्गन करके कहा—'अरे सौम्य सोमदत्त !' फिर किसी नागकेशर वृक्ष की छाया में बैठकर

सोऽपि मित्रसंदर्शनव्यतिकरापगतचिन्ताज्वरातिशयो मुकुलितकरकमलः सविनयमात्मीयप्रचारप्रकारमवोचत् । (२२)

इति श्रीदण्डिनः कृतौ दशकुमारचरिते द्विजोपकृतिर्नाम

द्वितीय उच्छ्वासः ।

सोऽपि ... ... अवोचत ॥ २२ ।

प्रसङ्गः—राजवाहनस्य जिज्ञासां शमयितुं सोमदत्तो व्याहरति—

व्याख्या – सोऽपि = सोमदत्तोऽपि, मित्रसंदर्शनव्यतिकरापगतचिन्ताज्वरातिशयः = मित्रस्य सुहृदः संदर्शनं सम्मेलनम्, तस्य व्यतिकरः व्यापारः तेन अपगतः शान्तः, चिन्ताज्वरस्य = कुविचारसंतापस्य, अतिशयः = अतिरेकः, यस्मात् सः, तथोक्तः, मुकुलितकरकमलः = मुकुलितं आवद्धं करकमल = पाणिपाथोजम् येन सः तथोक्तः, वद्धाञ्जलिः, सविनयं = विनयेन सहितं यथा स्यात्तथा, आत्मीयप्रचारप्रकारं = आत्मनः अयं आत्मीयः, नैजः यः प्रचारः पर्यटनम्, तस्य प्रकारः प्रभेदः तं तथोक्तम्, अवोचत् = अवदत् ।

इति श्रीदण्डिविरचितदशकुमारचरितस्य पूर्वपीठिकायाः द्वितीयोच्छ्वासस्य

त्रिपाठीयमुनेशचातकेन कृता 'प्रदीपिका' संस्कृतव्याख्या ।

राजा प्रेमपूर्वक वोले—'मित्र !, अव तक किस देश में और किस प्रकार रहे ? इस समय कहाँ जा रहे हो ? यह युवती कौन है ? और यह सेवक वर्ग कहाँ से मिला ? ॥ २१ ॥

मित्र की प्राप्ति से चिन्तामुक्त हुआ सोमदत्त हाथ जोड़कर अपने भ्रमण की कथा कहने लगा— ॥ २२ ॥

तृतीयोच्छ्वासः

'देव, भवच्चरणकमलसेवाभिलाषीभूतोऽहं भ्रमन्नेकस्यां वनावनौ पिपासाकुलो लतापरिवृतं शीतलं नदसलिलं पिबन्नुज्ज्वलाकारं रत्नं तत्रैकमद्राक्षम्। तदादाय गत्वा कञ्चनाध्वानमम्बरमणेरत्युष्णतया गन्तुमक्षमो वनेऽस्मिन्नेव किमपि देवतायतनं प्रविष्टो दीनाननं बहुतनयसमेतं स्थविरमहीसुरमेकमवलोक्य कुशलमुदितदयोऽहमपृच्छम्। (१)

देव ··· ··· ··· ··· ··· ···· ····अगच्छम् ॥ १ ॥

प्रसङ्गः--सोमदत्तः राजवाहनं स्वकीयं वृत्तान्तं श्रावयन् आह—

व्याख्या – देव ! = नाथ !, भगवच्चरणकमलसेवाभिलाषीभूतः = भवतः = देवस्य चरणकमलयोः पादाम्बुजयोः सेवायां परिचर्यायाम् अभिलाषीभूतः सकामः, अहं = सोमदत्तः, भ्रमन् = परिचरन्, एकस्यां = कस्याञ्चित्, वनावनौ = वने, पिपासाकुलः = तृषार्त्तः, लतापरिवृतं = वल्लरीभिः परिवेष्टितम्, शीतलं = शिशिरम्, नदसलिलं =अर्णवजलम्, पिबन् = आस्वाद्यमानः, उज्ज्वलाकारं = विभासमानम्, तत्र = तस्मिन् स्थाने, एकम्, रत्नं = मणिम्, अद्राक्षम् = विलोकितवान्। तत् = रत्नम्, आदाय = प्रगृह्य, कञ्चन = कियन्तम्, अध्वानं = पथम्, गत्वा = यात्वा, अम्बरमणेः = रवेः, अत्युष्णतया = तापेन, गन्तुं = चलितुम्, अक्षमः = असमर्थः, अस्मिन्नेव = अत्रैव, वने = कानने, किमपि = एकम्, देवतायतनं = देवालयम्, प्रविष्टः = गतः, दीनाननं = विवर्णास्यम्, बहुतनयसमेतं = बहुभिः

हे देव ! आपके चरणकमलों की सेवा का इच्छुक मैं, घूमता हुआ एक वन में पहुँच गया। वहाँ प्यास से व्याकुल होकर एक नद में जैसे ही जल पी रहा था कि एक मणि दिखाई पड़ी। उसे लेकर कुछ दूर चला। धूप बड़ी तेज थी। अतः चलने में असमर्थ होकर इसी वन में अवस्थित एक मन्दिर में गया। वहाँ एक

कार्पण्यविवर्णवदनो महदाशापूर्णमानसोऽवोचदग्रजन्मा—'महाभाग सुतानेतान्मातृहीनाननेकैरुपायै रक्षन्निदानीमस्मिन्कुदेशे भैक्ष्यं संपाद्य ददेतेभ्यो वसामि शिवालयेऽस्मिन्' इति। (२)

तनयैः पुत्रैः समेतं युक्तम्, एकम् = कञ्चित्, स्थविरं = वृद्धम्, महीसुरं = भूदेवम्, अवलोक्य = वीक्ष्य, उदितदयः = उदिता प्रादुर्भूता दया सहानुभूतिः यस्य सः तादृशः, अहं = सोमदत्तः भवतः मित्रम्, कुशलं = कल्याणम्, अपृच्छम् = पृष्टवान्॥ १॥

विशेषः—विपन्नस्य साहाय्यं कर्त्तव्यमिति भावना प्रकरणेनानेन विवोधिता कविनेति॥

कार्पण्य ·· ···· ··· ··· ··· ···· ···अस्मिन् इति॥ २॥

प्रसङ्गः—विषण्णवदनो वृद्धब्राह्मणः स्वकीयं वृत्तान्तं सोमदत्तं कथयति—

व्याख्या—कार्पण्यविवर्णवदनः = कार्पण्येन दैन्यभावेन विवर्णं शुष्कं वदनं मुखमण्डलम् यस्य सः तथोक्तः, महदाशापूर्णमानसः = महत्या अधिकया आशया अभीप्सया पूर्णं मानसं हृदयं यस्य सः तथोक्तः, अग्रजन्मा = विप्रः, अवोचत् = अब्रवीत्, महाभाग ! = महान् विशदः भागः अंशः यस्य सः तत्सम्बुद्धौ महाभाग ! महाशय !, एतान् = इमान्, मातृहीनान् = जननीविरहितान्, सुतान् = पुत्रान्, अनेकैः = वहुभिः, उपायैः = साधनैः, रक्षन् = पालयन्, इदानीं = अस्मिन् समये, अस्मिन् = अत्र, कुदेशे = कानने, भैक्ष्यं = याचनावृत्तिम्, सम्पाद्य = कृत्वा, एतेभ्यः = सुतेभ्यः, ददत् = अर्पयत्, अस्मिन्, शिवालये = शिवमन्दिरे, वसामि = निवासं करोमि इति॥ २॥

वृद्ध ब्राह्मण मिला। उस वृद्ध ब्राह्मण के कई विपन्न बच्चों को देख कर मुझे दया आ गई। मैंने उससे कुशल क्षेम पूछा॥ १॥

दरिद्रता से विवर्ण मुख वाले उस वृद्ध ब्राह्मण ने मेरी वातों से कुछ आशान्वित होकर कहा—'महाभाग ! मातृविहीन इन बच्चों को लेकर इस कुदेश में कुछ दाता-दानियों से भिक्षा मांगकर उसी से जीविका निर्वाह करता हुआ इस शिवालय में निवास करता हूँ॥ २॥

'भूदेव, एतत्कटकाधिपती राजा कस्य देशस्य, किं नामधेयः, किमत्रागमनकारणस्य' इति पृष्टोभाषत महीसुरः—'सौम्य, मत्तकालो नाम लाटेश्वरो देशस्यास्य पालयितुर्वीरकेतोस्तनयां वामलोचनां नाम तरुणीरत्नमसमानलावण्य श्रावं श्रावमवधूतदुहितृप्रार्थनस्य तस्य नगरीमरौत्सीत्। वीरकेतुरवि भीतो महदुपायनमिव तनयां मत्तकालायादात्। तरुणीलाभहृष्टचेता लाटपतिः 'परिणेया

विशेषः—निर्धनः कीदृशोऽनुतापोऽनुभूयत इति दर्शितम्॥

भूदेव··· ···· ··· ··· ··· ···· ···अकारयत्॥ ३॥

प्रसङ्गः—वृद्धब्राह्मणं पृच्छति सोमदत्तः—

व्याख्या—भूदेवः = भूसुरः, एतत्कटकाधिपतिः— एतस्य = पुरोदृश्यमानस्य, कटकस्य = सेनाशिविरस्य, अधिपतिः = स्वामी, कस्य, देशस्य = भूभागस्य, राजा = भूपः, किं नामधेयः = तस्य किं नाम ?, अस्य = अमुष्य राज्ञः, अत्र = प्रदेशे, आगमनस्य, किं, कारणं = हेतुः, इति पृष्टः = उक्तः, महीसुरः = ब्राह्मणः, अभाषत = अवोचत् = 'सौम्य ! भद्र !, मत्तकालो नाम = मत्तकालाख्यः, लाटेश्वरः = लाटदेशस्य राजा, अस्य = अमुष्य, देशस्य = भूभागस्य, पालयितुः = शासकस्य, वीरकेतोः, तनयां = तनुजाम्, वामलोचनां नाम = तन्नाम्नीम्, असमानलावण्यं = अद्वितीयसौन्दर्यम्, तरुणीरत्नं = नारीषु श्रेष्ठाम्, नारीरत्नम्, श्रावं-श्रावं = पुनः पुनः श्रुत्वा, अवधूतदुहितप्रार्थनस्य = अवधूता तिरस्कृता कन्यायाः तनयायाः प्रार्थना याचना येन सः तस्य तथोक्तस्य, तस्य = वीरकेतोः, नगरीं = राजधानीम्, अरौत्सीत् = रुरुध। भीतः = भयाक्रान्तः, वीरकेतुः =

उस वृद्ध ब्राह्मण की बात सुनकर मैंने पूछा—'ब्राह्मण देव ! यह जो सेनाशिविर दीख रहा है, उसका राजा कहाँ का रहनेवाला है ? उसका नाम क्या है ? और यहाँ किस लिये आया है ? मेरे प्रश्न का उत्तर देते हुए ब्राह्मण ने कहा—'भद्र ! लाटदेश (बंग) के राजा मत्तकाल ने इस देश के राजा की अत्यन्त सुन्दरी कन्या वामलोचना से शादी करनी चाही। पर, वीरकेतु ने जब उसके प्रस्ताव को अस्वीकार कर दिया तब सेना लेकर उनके नगर पर चढ़ाई कर दी। वीरकेतु ने भयभीत होकर कन्या उसको दे दी। तरुणी को पाकर प्रमुदित हुआ

निजपुर एव' इति निश्चित्य गच्छन्निजदेशं प्रति संप्रति मृगयादरेणात्र वने सैन्यावासमकारयत् । (३)

कन्यासारेण नियुक्तो मानपालो नाम वीरकेतुमन्त्री मानधनश्चतुरङ्गबलसमन्वितोऽन्यत्र रचितशिविरस्तं निजनाथावमानखिन्नमानसोऽन्तर्विभेद इति । (४)

राजा, अपि, महदुपायनमिव = बहुमूल्यमुपहारमिव, तनयां = कन्याम्, मत्तकालाय = लाटाधिपतये, अदात् = समर्पितवान् । तरुणीलाभदृष्टचेताः = तरुण्याः युवत्याः लाभेन उपलब्ध्या दृष्टं हर्षितं चेतः मनः यस्य सः तथोक्तः, लाटपतिः = लाटेश्वरः निजपुरे = स्वराज्ये, एव, परिणेया = विवाहनीया, इति = इत्थम्, निश्चित्य = निश्चयं कृत्वा, निजदेशे = स्वपुरम्, प्रति, गच्छन् = व्रजन्, सम्प्रति= साम्प्रतम्, मृगयादरेण = मृगयायाः आखेटस्य आदरेण, कामनया, अत्र = अस्मिन्, वने = अरण्ये, सैन्यावासं = कटकम्, अकारयत् = स्थापयामास ॥ ३ ॥

विशेषः—अत्र तात्कालीना राज्ञां दारापहरणप्रवृत्तिः सन्निवेशिता कविना दण्डिना देशकालज्ञेन ॥

कन्यासारेण···· ···· ··· ··· ··· ··· अन्तर्विभेद इति ॥ ४ ॥

प्रसङ्गः—कटकस्य स्थितिं वर्णयन्नाह वृद्धः—

व्याख्या—कन्यासारेण = कन्यापुत्री एव सारः अर्थः यस्य तेन तनयाधनेन, (वीरकेतुना) नियुक्तः नियोजितः, मानपालोनाम, वीरकेतुमन्त्री = वीरकेतोः सचिवः, मानधनः = स्वाभिमानी, चतुरङ्गबलसमन्वितः — चतुरङ्गं = हस्त्यश्वरथपदातिसमन्वितं, बलं = सैन्यम् यस्य सः तेन तथोक्तेन समन्वितः सहितः,

---

लाटपति अपने नगर में जाकर विवाह करूँगा। ऐसा कहकर अपने राज्य के लिये प्रस्थित हो गया। और शिकार खेलने की इच्छा से इस समय इस वन मे डेरा डाले हुए है ॥ ३ ॥

दूसरी ओर वीरकेतु के स्वाभिमानी मन्त्री मानपाल ने अपने राजा की आज्ञा से चतुरङ्गिणी सेना सहित पड़ाव किया है। मानपाल ने अपने राजा के अपमान से खिन्न होकर उसके बदले की भावना से मत्तकाल की सेना में अन्तर्विरोध पैदा कर दिया है ॥ ४ ॥

विप्रोऽसौ बहुतनयो विद्वान्निर्धनः स्थविरश्च दानयोग्य इति तस्मै करुणापूर्णमना रत्नमदाम् । परमाह्लादविकसिताननोऽभिहितानेकाशीः कुत्रचिदग्रजन्मा जगाम । अध्वश्रमखिन्नेन मया तत्र निरवेशि निद्रासुखम् । तदनु पश्चान्निगडित-

---

अन्यत्र = लाटाधिपतेः अन्यस्थाने, रचितशिविरः = कृतकटकः, निजनाथस्य = स्वराज्ञः, अवमानेन = अपमानेन, खिन्नं = दुःखितम्, मानसं = हृदयम्, यस्य सः तथोक्तः, तं = लाटदेशाधिपम्, अन्तर्विभेद = राजा सैन्ययोः मध्ये द्वन्द्वमुद्बोधयितुं सन्नद्धो वभूव ॥ ४ ॥

विप्रोऽसौ··· ··· ···· ··· ··· ··· ··· इत्यदर्शयत् ॥ ५ ॥

प्रसङ्गः—सोमदत्तः राजवाहनं वृद्धब्राह्मणस्य वृत्तान्तं श्रावयित्वा स्वतः-कृतमाचरणं कथयति—

व्याख्या—असौ = अयम्, विप्रः = द्विजः, बहुतनयः = अनेकपुत्रः, विद्वान् = विद्याविभूषितः, निर्धनः = दरिद्रः, स्थविरश्च = जराग्रस्तश्च, अस्ति, (अतः) दानयोग्यः = दानपात्रम् इति = एवं विचिन्त्य, तस्मै = ब्राह्मणाय, करुणापूर्ण-मनाः = दयाभिभूतमानसः, (अहम्) रत्नं = मणिम्, अदाय = समर्पितवान् । परमाह्लादविकसिताननः = परमाह्लादेन परमोल्लासेन विकसितं उल्लसितं आननं = मुखम् यस्य सः तथोक्तः, अभिहितानेकाशीः = दत्तागणिताशीर्वादः, अग्रजन्मा = विप्रः, कुत्रचित् = अज्ञातस्थानम्, जगाम = गतवान् । अध्वश्रमखि-न्नेन = अध्वनि पथि यः श्रमः आयासः तेन खिन्नः आयासितः तेन तथोक्तेन, मया = सोमदत्तेन, तत्र = देवमन्दिरे, निद्रासुखं = शयनानन्दम्, निरवेशि = अन्व-भावि । तदनु = तत्पश्चात्, पश्चात् = पृष्ठदेशे निगडितं = बद्धं बाहुयुगलं = करद्वयं यस्य सः तथाभूतः, सः = पूर्वदृष्टः, भूसुरः = विप्रः, कशाघातचिह्नितगात्रः =

मैंने, यह सोच कर कि यह ब्राह्मण वृद्ध, विद्वान्, अधिक सन्तानवाला तथा निर्धन होने के कारण दान का पात्र है—वह मणि उसे दे दी । ब्राह्मण मणि पाकर अत्यन्त प्रसन्न हुआ और मुझे बहुत आशीर्वाद देकर कहीं चला गया । मैं थका था इसलिये सो गया । उसके बाद जगने पर मैंने देखा कि वह ब्राह्मण सिपाहियों से घिरा हुआ मेरे सामने खड़ा है । उसके शरीर पर कोड़ों के सैकड़ों

बाहुयुगलः स भूसुरः कशाघातचिह्नितगात्रोऽनेकनैस्त्रिंशिकानुयातोऽभ्येत्य माम् 'असौ दस्युः' इत्यदर्शयत् । (५)

परित्यक्तभूसुरा राजभटा रत्नावाप्तिप्रकारं मदुक्तमनाकर्ण्य भयरहितं मां गाढं नियम्य रज्जुभिरानीय कारागारम् 'एते तव सखायः' इति निगडितान्कांश्चिन्निर्दिष्टवन्तो मामपि निगडितचरणयुगलमकार्षुः । किङ्कर्तव्यतामूढेन निराश-

---

कशाघातेन = वेत्रप्रहरणेन चिह्नितं अङ्कितं गात्रं शरीरं यस्य सः तथोक्तः, अनेकनैस्त्रिंशिकानुयातः = अनेकैः = वहुसंख्यकैः नैस्त्रिंशिकैः सशस्त्रजनैः अनुयातः अनुगतः, अभ्येत्य = आगत्य, माम् = सोमदत्तम्, असौ = अयम्, (संकेतेन) दस्युः = चौरः, इति अदर्शयत् = दर्शितवान् ॥ ५ ॥

परित्यक्तभूसुराः··· ··· ··· ··· ···· ···किमिदमिति ॥ ६ ॥

प्रसङ्गः—सोमदत्तः स्वकीयं संकटवृत्तान्तं कथयति—

व्याख्या—परित्यक्तभूसुरः = परित्यक्तः विमुक्तः भूसुरः विप्रः यैः ते तथोक्ताः, राजभटाः = राजपुरुषाः, मदुक्तं = मया प्रोक्तम्, रत्नवाप्तिप्रकारं = मणिप्राप्तिविधिम्, अनाकर्ण्य = अनादृत्य, भयरहितं = निर्भयं, मां = सोमदत्तम्, रज्जुभिः बन्धनैः, गाढं = दृढ़तापूर्वकम्, नियम्य = निगडीकृत्य, कारागारं = बन्धनगृहम्, 'एते = कारागृहस्थाः, तव = भवतः, सखायः = सहवासिनः' इति, कांश्चित् = बहून्, निगडितान् = निवद्धान्, निर्दिष्टवन्तः = दर्शितवन्तः, मां = सोमदत्तम् अपि, निगडितचरणयुगलं = संयमितपादद्वयम्, अकार्षुः = कृतवन्तः । किं कर्त्तव्यतामूढेन = किं कर्त्तव्यतायां मूढ़ः अज्ञः तेन तथाभूतेन, निराशक्लेशानुभवेन = हताशदुःखानुभवेन, मया = सोमदत्तेन, अवाचि = भाषितम्,—'ननु

निशान पड़े हैं और मुझे संकेतित कर के सिपाहियों से कह रहा है—'यही चोर है' ! ॥ ५ ॥

अब, उन सिपाहियों ने उस ब्राह्मण को छोड़कर मुझ निर्भय को, मेरी एक न सुनते हुए कसकर बांध दिया । और कारागार लाकर वहाँ पहले से वर्तमान कुछ कैदियों को दिखलाकर 'ये ही तुम्हारे मित्र हैं' कहकर मेरे दोनों पैर जकड़ दिये । मैं किंकर्त्तव्यमूढ़ सा निराशा और दुःख से भरा हुआ बोला—'हे वीरों !,

क्लेशानुभवेनावाचि मया—'ननु पुरुषा वीर्यपरुषाः, निमित्तेन केन निविशथ कारावासदुःखं दुस्तरम्। यूयं वयस्या इति निर्दिष्टमेतैः, किमिदम् इति। (६)

तथाविधं मामवेक्ष्य भूसुरान्मया श्रुतं लाटपतिवृत्तान्तं व्याख्याय चोरवीराः पुनरवोचन्—'महाभाग ! वीरकेतुमन्त्रिणो मानपालस्य किङ्करा वयम्। तदाज्ञया

वीर्यपुरुषः = पराक्रमेण कठोराः, पुरुषाः = भटाः ! केन, निमित्तेन = कारणेन, दुस्तरं = कठिनम्, कारावासदुःखं = बन्धनगृहक्लेशम्, निविशथ = अनुभवथ। यूयं भवन्तः, वयस्याः मित्राणि (सखायः) इति = एवम्, एतैः = राजभटैः, निर्दिष्टम् = संकेतितम्, इद किम् अस्य कथनस्य किं तात्पर्यम्। इति ॥ ६ ॥

तथाविधम्··· ··· ··· ··· ··· ···अशृङ्खलयन् ॥ ७ ॥

प्रसङ्गः—ते कारागारस्थाः वन्दिनः स्वकीयं वृत्तान्तं सोमदत्तं श्रावयन् वदन्ति—

व्याख्या—तथाविधं = वन्दीभूतम्, मां = सोमदत्तम्, अवेक्ष्य = विलोक्य, भूसुरात् = विप्रात्, मया = सोमदत्तेन, श्रुतं = आकर्णितम्, ललाटपतिवृत्तान्तं = ललाटेश्वस्य समाचारम्, व्याख्याय = विस्तरेण व्याहृत्य, चोरवीराः = चोरश्चासौ वीरः चोरवीरः ते, पुनः - भूयः, अवोचन् = कथितवन्तः, महाभाग ! = महाशय !, वयम् = वन्दिनः, वीरकेतुमन्त्रिणः = वीरकेतोः अमात्यस्य, मानपालस्य, किङ्कराः = सेवकाः। तदाज्ञया = मानपालस्य आदेशेन, लाटेश्वरमारणाय= लाटाधिपतिम् हन्तुम्, रात्रौ = रजन्याम्, सुरङ्गद्वारेण = गुप्तमार्गेण, तदागारं = लाटेश्वरस्य भवनं, प्रविश्य = गत्वा, तत्र = भवने, राजाभावेन = ललाटपतेः,

---

तुम लोग कारागार में क्यों पड़े हो ? सिपाहियों ने कहा है कि ये तुम्हारे मित्र हैं ! आखिर क्या बात है ? ॥ ६ ॥

उन वन्दियों ने मुझे देखकर ब्राह्मण द्वारा कथित लाटपति का वृत्तान्त सुना कर कहा—'महाभाग ! हमलोग वीरकेतु के मन्त्री मानपाल के सेवक हैं। उसकी आज्ञा से लाटपति का वध करने के लिये रात्रि में सुरङ्ग द्वार से उसके घर में घुसकर उसे न पाकर निराश हुए उसका बहुत सा धन लेकर महाटवी में भाग

लाटेश्वरमारणाय रात्रौ सुरङ्गद्वारेण तदगारं प्रविश्य तत्र राजाभावेन विषण्णा बहुधनमाहृत्य महाटवीं प्राविशाम। अपरेद्युश्च पदान्वेषिणो राजानुचरा बहवोऽभ्येत्य धृतधनचयानस्मान्परितः परिवृत्य दृढतरं बद्ध्वा निकटमानीय समस्तवस्तुशोधनवेलायामेकस्यानर्घ्यरत्नस्याभावेनास्मद्वधाय माणिक्यादानाद-स्मान् किलाश्रृङ्खलयन् इति। (७)

अवर्तमानतया, विषण्णाः = दुःखिताः, वयम्, वहुधनं = अधिकं सारम्, आहृत्य = समादाय, महाटवीं = घोरारण्यम्, प्रविशाम = प्रविष्टाः। अपरेद्युश्च = अन्यस्मिन् दिवसे, पदान्वेषिणः = चरणचिन्हं विलोकयन्तः बहवः = असंख्याः, राजानुचराः = नृपस्य किङ्कराः, अभ्येत्य = आगत्य, धृतधनचयान् = धृतः स्वायत्तीकृतः धनानां = वसूनाम्, चयः = राशिः यैस्ते तान्, अस्मान् = चौरवीरान्, परितः = समन्तात्, परिवृत्य = परिवेष्ट्य, दृढतरं प्रगाढतरम्, बद्ध्वा = निगडीकृत्य, निकटं =समीपम्, आनीय = उपस्थितान् कृत्वा, समस्तवस्तुशोधनवेलायाम् = समस्तानां सम्पूर्णानां वस्तूनां धनानाम् शोधनवेलायाम् निरीक्षणसमये, एकस्य = कस्यचित्, अनर्घ्यरत्नस्य = अमूल्यमणेः, अभावेन = अप्राप्तया, अस्मद्वधाय = अस्माकम् निगडीकर-णाय, मणिक्यादानात् = रत्नसमर्पणार्थम्, अस्मान् = चौरवीरान्, अश्रृङ्खलयन्= श्रृङ्खलाभिः निगडीकृतवन्तः ॥ ७ ॥

श्रुतरत्न··· ··· ··· ··· ··· ···· ··· आर्चयत् ॥ ८ ॥

प्रसङ्गः—तेषां चौरवीराणां कथां श्रुत्वा सोमदत्तेन किमाचरितमिति तेन निरूप्यते—

व्याख्या —श्रुतरत्नरत्नावलोकनस्थानः—श्रुतं ज्ञातं रत्नरत्नस्य = बहुमूल्य-मणेः अवलोकनस्थानं निरीक्षणस्थानम् येन सः तथोक्तः, अहं = सोमदत्तः, इदं =

गये। दूसरे दिन पद-चिन्हों को देखते हुए मत्तकाल के सैनिक हमारे पास पहुँच गये। और हम लोगों को बाँध कर ले आये। यहाँ निरीक्षणोपरान्त एक मणि गायब पायी गई। उन लोगों ने कहा—इन चोरों को बाँधकर कारागार में डाल दिया जाय। ये लोग सोच कर यदि मणि लौटा देते हैं तो छोड़ दिया जायगा, अन्यथा प्राण दण्ड दिया जायगा ॥ ७ ॥

श्रुतरत्नरत्नावलोकस्थानोऽहम् 'इदं तदेव माणिक्यम्' इति निश्चित्य भूदेवदाननिमित्तां दुरवस्थामात्मनो जन्म नामधेयं युष्मदन्वेषणपर्यटनप्रकारं चाभाष्य समयोचितैः संलापैर्मैत्रीमकार्यम् । ततोऽर्धरात्रे तेषां मम च शृङ्खलाबन्धनं निर्भिद्य तैरनुगम्यमानो निद्रितस्य द्वाःस्थगणस्यायुधजालमादाय पुररक्षान्पुरतोऽभिमुखागतान्पटुपराक्रमलीलयाभिद्राव्य मानपालशिविरं प्राविशम् । मानपालो निजकिङ्करेभ्यो मम कुलाभिमानवृत्तान्तं तत्कालीनं विक्रमं च निशम्य मामार्चयत् । (८)

मया तद्वृद्धविप्राय दत्तम्, माणिक्यं = रत्नम्, तदेव = लाटेश्वरभवनान्नीतमेव चौरैः, इति = एवम्, निश्चित्य = निर्णीय, भूदेवदाननिमित्तां = भूदेवस्य भूसुरस्य दानं निमित्तं कारणं यस्याः सा ताम्, दुरवस्थां = दुर्दशाम्, आत्मनः = स्वस्य, जन्म = प्रभवम्, नामधेयं = संज्ञाम्, युष्मत् = तव, अन्वेषणपर्यटनप्रकारं = अन्वेषणाय मार्गणाय पर्यटनस्य भ्रमणस्य प्रकारं = विधिम् च आभाष्य = कथयित्वा, समयोचितैः = कालानुकूलैः, संलापैः = वार्ताभिः मैत्रीम् = सौहार्दम्, अकार्यम् = कृतवान् । ततः = तदनु, अर्धरात्रे = निशीथं तेषां = चौरवीराणाम्, मम = सोमदत्तस्य च, शृङ्खलाबन्धनं = निगडरज्जुम्, निर्भिद्य = छिन्द्य, तैः = चोरवीरैः, अनुगम्यमानः = अनुकार्यमाणः, निद्रितस्य = स्वापंगतस्य, द्वाःस्थगणस्य = दौवारिकसमूहस्य, आयुधजालं = शस्त्रसंकलनम्, आदाय = गृहीत्वा, पुरतः = ममाग्रतः, अभिमुखगतानां = संमुखागतानाम्, पुररक्षान् = नगररक्षकान्, पटपराक्रमलीलया = पटुः दक्षा या पराक्रमलीला वीरताविधिः तया निजवीरतया, अभिद्राव्य=

अब, मैंने निश्चय कर लिया कि ब्राह्मण को जो रत्न दिया था वह यही रत्न था । फिर मैंने, अपना नाम, आपके अन्वेषण की कथा एवं ब्राह्मण को मणि दान की घटना सब सुना कर उनसे मैत्री कर ली । उसके बाद एक दिन अर्धरात्रि में अपना और उन मित्रों के बन्धन काटकर लाटपति के द्वारपालों को अपने पराक्रम से पराजित कर के सभी के साथ मानपाल के शिविर में पहुँच गया । मानपाल ने अपने सेवकों से मेरे वंश तथा पराक्रम के विषय में सुनकर मेरा खूब स्वागत किया ॥ ८ ॥

परेद्युर्मत्तकालेन प्रेषिताः केचन पुरुषा मानपालमुपेत्य 'मन्त्रिन्, मदीयराजमन्दिरे सुरङ्गया बहुधनमपहृत्य चोरवीरा भवदीयं कटकं प्राविशन् तानर्पय। नो चेन्महाननर्थः भविष्यति इति क्रूरतरं वाक्यमब्रुवन्। तदाकर्ण्य रोषारुणित-

---

अतिक्रम्य, मानपालशिविरं = मानपालस्य कटकम्, प्राविशम् = प्रविष्टः। मानपालः, निजकिंकरेभ्यः = निजसेवकेभ्यः, मम = सोमदत्तस्य, कुलाभिमानवृत्तान्तं = वंशगौरवकथाम्, तत्कालीनं = सामयिकम्, विक्रमं = पराक्रमम्, च, निशम्य = श्रुत्वा, मां = सोमदत्तम्, आर्चयत् = सत्कृतवान् ॥ ८ ॥

विशेषः—अत्र बुद्धिर्यस्य वलं तस्य इति सिद्धान्तः प्रतिपादितः ॥

परेद्युः··· ··· ···· ···· ··· ··· ··· ···प्राहरम् ॥ ९ ॥

प्रसङ्गः—मत्तकालस्य वन्दीगृहात् पलाय्य मानपालस्य शिविरं प्राप्ते सति किमभूदिति वर्ण्यते सोमदत्तेन।

व्याख्या—परेद्युः = अन्येद्युः, मत्तकालेन = लाटेश्वरेण, प्रेषिताः = प्रहिताः, केचन = कतिचन, पुरुषाः = सैनिकाः, मानपालम्, उपेत्य = प्राप्य, मन्त्रिन् !, मदीयराजमन्दिरे = मदीयस्य राज्ञः लाटेश्वरस्य मन्दिरे भवने, सुरङ्गया = गुप्तमार्गेण, बहुधनं = प्रचुरं द्रव्यम्, अपहृत्य = चोरयित्वा, चोरवीराः = दक्षाः चौराः, भवदीयं = त्वदीयम्, कटकं = शिविरम्, प्रविशन् = प्रविष्टाः, तान् = चोरवीरान्, अर्पय = देहि। नो चेत् = अन्यथा, महानर्थः = महती हानिः, भविष्यति। इति = एवम्, क्रूरतरं = क्लिष्टतरम्, वाक्यं = वचनम्, अब्रुवन् = उक्तवन्तः। तदाकर्ण्य = तेषां कथनं श्रुत्वा, रोषारुणितनेत्रः = रोषेण क्रोधेन अरुणिते शोणिते नेत्रे नयने यस्य सः, मन्त्री = अमात्यः (मानपालः), कः लाट-

---

इसके वाद दूसरे दिन मत्तकाल के द्वारा भेजें गये कुछ राजपुरुषों ने कहा -'मन्त्री !, हमारे कटक से सुरङ्ग मार्ग द्वारा जाकर कुछ चोर रत्न चुराकर आपके कटक मे आए हैं। कृपया, उन्हें लौटा दीजिए। अन्यथा महान् अनर्थ होगा।' उनका परुषकथन सुनकर क्रुद्ध मन्त्री ने कहा—'कैसा लाटपति ! उससे कैसी मित्रता ? फिर उस अधम की सेवा से क्या लाभ ? उन राजपुरुषों ने मानपाल के द्वारा की गई भर्त्सना को जाकर मत्तकाल से ज्यों-की-त्यों कह सुनाया। यह सुन

नेत्रो मन्त्री लाटपतिः कः, तेन मैत्री का, पुनरस्य वराकस्य सेवया किं लभ्यम् इति तान्निरभर्त्सयत्, ते च मानपालेनोक्तं विप्रलापं मत्तकालाय तथैवाकथयन्। कुपितोऽपि लाटपतिर्दोर्वीर्यगर्वेणाल्पसैनिकसमेतो योद्धुमभ्यगात्। पूर्वमेव कृतरणनिश्चयो मानी मानपालः संनद्धयोधो युद्धकामो भूत्वा निःशङ्कं निरगात्। अहमपि सबहुमानं मन्त्रिदत्तानि बहुलतुरङ्गमोपेतं चतुरसारथिं रथं च दृढतरं

पतिः = किं नामधेयो कुत्रत्यः लाटपतिः ?, तेन = ललाटपतिना, का मैत्री = कीदृशी मित्रता ?, अस्य = ललाटेश्वरस्य, वराकस्य = अधमस्य, सेवया = सपर्यया, पुनः किं लभ्यम् = किं प्रयोजनम्, इति एतादृशैः परुषवाक्यैः, तान् = समागतराजपुरुषान्. निरभर्त्सयत् = कुत्सितवान् ते च = राजपुरुषाः च, मानपालेनोक्तं = मानपालेन भणितम्, विप्रलापं = कटुकथनम्, मत्तकालाय = लाटाधिपाय, तथैव = यथा तेन कथितम् तदवत्, अकथयन् = उक्तवन्तः। कुपितः = क्रोधितः, अपि, लाटपतिः = मत्तकालः, दोर्वीर्यगर्वेण—दोषोः = बाह्वोः वीर्यं= बलम् तस्य गर्वेण दर्पेण, अल्पसैनिकसमेतः = न्यूनसैन्यसहितः, योद्धुम् = युद्धाय, अभ्यगात् = प्रचलितवान्। पूर्वमेव = कटुवचनकथनकाले एव, कृतरणनिश्चयः = कृतयुद्धनिर्णयः, मानी = स्वाभिमानी, मानपालः, संनद्धयोधः = संनद्धाः तत्पराः योधाः वीरा यस्य सः, तथाभूतः, युद्धकामो = युद्धाभिलाषी, भूत्वा, निःशङ्कम् = निःसन्देहं, यथा स्यात्तथा, निरगात् = प्रस्थितोऽभूत्। अहमपि = सोमदत्तोऽपि, सबहुमानं = मानेन सहितम् यथा स्यात्तथा, मन्त्रिदत्तानि = मन्त्रिणा अर्पितानि, बहुलतुरङ्गमोपेतं = बहुलैः अत्यधिकैः तुरङ्गमैः अश्वैः उपेतं युक्तम्, चतुरसारथिम् = चतुरः दक्षः सारथिः रथचालकः यस्य सः तम् तथोक्तम्, रथं = स्यन्दनम्,

---

कर घमण्डी मत्तकाल अपने साथ थोड़ी सी सेना लेकर मानपाल से लड़ने के लिये चढ़ आया। मानपाल ने युद्ध का पहले ही निश्चय कर लिया था। अतः वीर सैनिकों के साथ निकल पड़ा। मैंने भी, मन्त्री द्वारा सादर दिये गये रथ, धनुष, वाण, और कवच आदि से सुसज्जित होकर विश्वासपूर्वक शत्रु का दमन करने के लिये उद्यत मन्त्री का अनुगमन किया। मैं परस्पर क्रोधाकुल सेनाओं के बीच में घुसकर, शत्रु सेना पर बाण बरसाने लगा। कुछ ही क्षणों में, तेज घोड़ों वाले

कवचं मदनुरूपं चापं च विविधबाणपूर्णं तूणीरद्वयं रणसमुचितान्यायुधानि गृहीत्वा युद्धसंनद्धो मदीयबलविश्वासेन रिपूद्धरणोद्युक्तं मन्त्रिणमन्वगाम्। परस्परमत्सरेण तुमुलसंगरकरमुभयसैन्यमतिक्रम्य समुल्लसद्भुजाटोपेन बाणवर्षं तदङ्गे विमुञ्चन्नरातीन् प्राहरम्। (९)

ततोऽतिरयतुरङ्गमं मद्रथं तन्निकटं नीत्वा शीघ्रलङ्घनोपेततदीयरथोऽहम-

---

दृढतरं = अच्छेद्यम्, कवचं = तनुत्रम्, मदनुरूपं = मम योग्यम्, चापं = धनुः, विविधबाणपूर्णं = विविधैः नानाभिः बाणैः शरैः पूर्णं भृतम्, तूणीरद्वयं = तरकषद्वयम्, च, रणसमुचितानि = युद्धयोग्यानि, आयुधानि = अस्त्राणि, गृहीत्वा = नीत्वा, युद्धसन्नद्धः = युद्धाय तत्परः, मदीयबलविश्वासेन = मम पराक्रमस्य विश्वासेन, रिपूद्धरणोद्युक्तं-रिपूणां = अरीणाम् उद्धरणे विनाशे, उद्युक्तं = सन्नद्धम्, मन्त्रिणं = अमात्यं मानपालम्, अन्वगाम = पृष्ठतः भूत्वा अगच्छम्। परस्परमत्सरेण = एकैकस्य विद्वेषेण, तुमुलसंगरकरम् = घोरयुद्धकरम्, उभयसैन्य = मानपालमत्तकालयोः सेनाप्रमुखम्, अतिक्रम्य = उल्लंघ्य, समुल्लसद्भुजाटोपेन = समुल्लसतोः वृद्धि व्रजतोः भुजयोः = बाह्वोः आटोपेन = दर्पेण, तदङ्गे = रिपूणां सैन्यं, बाणवृष्टि = शरप्रक्षेपणम्, विमुञ्चन् = कुर्वन्, अरातीन् = रिपून्, प्राहरम् = अताडयम्॥ ९॥

ततो···· ··· ··· ··· ··· ··· ···· ···अकार्षीत्॥ १०॥

प्रसङ्गः—मानपाललाटपत्योर्मध्ये भवन्त युद्धं स्वता च कृतं संघर्षं वर्णयन्नाह सोमदत्तः।

व्याख्या—ततः = तत्पश्चात्, अतिरयतुरङ्गमं = अतिरयाः प्रवेगाः तुरङ्गमाः वाजिनः यस्मिन् स तं तथोक्तम्, मद्रथं = मम स्यन्दनम्, तन्निकटं = ललाटपतेः समीपम्, नीत्वा = प्रापय्य शीघ्रलङ्घनोपेततदीयरथः - शीघ्रं = अरं यल्लङ्घनं अतिक्रमणं तेन उपेतः प्राप्तः तदीयः ललाटपतेः रथः स्यन्दनं येन सः तथोक्तः,

---

अपने रथ को लाटपति के पास ले जाकर शीघ्रतापूर्वक उसका सिर उड़ा दिया। उसके मर जाने पर शेष सैनिक भाग निकले। मैं शत्रु के छूटे हुए समस्त हाथी घोड़ों आदि के सहित मानपाल के पास आ गया। मुझे देखकर मन्त्री परम प्रसन्न

रातेः शिरःकर्तनमकार्षम् । तस्मिन्पतिते तदवशिष्टसैनिकेषु पलायितेषु नानाविधहयगजादिवस्तुजातमादाय परमानन्दसंभृतो मन्त्री ममानेकविधां संभावनामकार्षीत् । (१०)

मानपालप्रेषितात्तदनुचरादेनमखिलमुदन्तजातमाकर्ण्य संन्तुष्टमना राजाभ्युद्गतो मदीयपराक्रमे विस्मयमानः समहोत्सवममात्यबान्धवानुमत्या शुभदिने

अहं = सोमदत्तः, अरातेः = रिपोः, शिरः कर्तनम् = मस्तकस्य छेदनम्, अकार्षम् = अकरवम् । तस्मिन् = लाटपतौ, पतिते = स्यन्दनाद् भ्रष्टे, सति, तदवशिष्टसैनिकेषु = तस्य लाटेश्वरस्य अवशिष्टेषु = जीवितेषु सैनिकेषु भटेषु पलायितेषु विश्रृंखलीभूतेषु सत्सु, नानाविधं बहुप्रकारकं हयाश्च गजाश्च आदौ येषां वस्तूनां तानि हयगजवस्तूनि तेषां जातं समूहं, आदाय = नीत्वा, परमानन्दसंभृतः = परप्रमोदपूर्णः, मन्त्री = अमात्यः (मानपालः) मम = सोमदत्तस्य, अनेकविधां नानाविधाम्, संभावनां = बहुमानम्, अकार्षीत् = अकरोत् ॥ १० ॥

मानपालप्रेषितात् ....लब्धः इति ॥ ११ ॥

प्रसङ्गः—स्वता, युद्धे व्यापादिते सति लाटेश्वरे तस्य सैन्ये पलायिते च सति किमभूत् वर्णयन्नाह सोमदत्तः—

व्याख्या—मानपालप्रेषितात् = मानपालेन अमात्येन प्रेषितात् प्रेरितात्, तदनुचरात् = मानपालस्य सेवकात्, एनं = पूर्वोक्तम्, अखिलं = सम्पूर्णम्, उदन्त जातं = घटनासमूहम्, आकर्ण्य = श्रुत्वा, सन्तुष्टमनाः प्रसन्नचेताः, राजा = वीरकेतुः, अभ्युद्गतः = अग्रे आगत्य, मदीयपराक्रमे = मम शौर्ये, विस्मयमानः = आश्चर्यचकितः, समहोत्सवं = महांश्चासौ उत्सवः चेतिमहोत्सवः तेन सहितम्, अमात्यबान्धवानुमत्या = अमात्यानां सचिवानां बान्धवानां = पारिवारिकाणां च अनुमत्या अनुमोदनेन, शुभदिने = मंगलमुहूर्ते, निजतनयां = स्वकीयकन्याम्,

---

हुआ और मेरा अत्यधिक सम्मान किया ॥ १० ॥

तत्पश्चात्, मानपाल द्वारा प्रेषित सेवकों से मत्तकाल का वध और मेरे शौर्य की कथा सुनकर वीरकेतु अत्यन्त प्रमुदित हुआ मेरी अगवानी के लिये चल पड़ा, पुनः अपने अमात्यों और कौटुम्बिकों की अनुमति लेकर एक महोत्सव आयोजित

निजतनयां मह्यमदात् । ततो यौवराज्याभिषिक्तोऽहमनुदिनमाराधितमहीपालचित्तो वामलोचनयानया सह नानाविधं सौख्यमनुभवन्भवद्विरहवेदना शल्यसुलभवैकल्यहृदयः सिद्धादेशेन सुहृज्जनावलोकनफलं प्रदेशं महाकालनिवासिनः परमेश्वरस्याराधनायाद्य पत्नीसमेतः समागतोऽस्मि । भक्तवत्सलस्य गौरीपतेः

मह्यं = मदर्थे, अदात् = समर्पितवान् । ततः = तदनन्तरम् यौवराज्याभिषिक्तः = युवा चासौ राजा युवराज युवराजस्य भावः यौवराज्यम् तस्मिन् अभिषिक्तः = नियुक्तः = यौवराज्याभिषिक्तः, अहं = सोमदत्तः, अनुदिनम् = प्रतिवासरम्, आराधितमहीपालचित्तः = आराधितं संतोषितं (विनयार्जवेन) महीपालस्य वीरकेतोः चित्तं मनो येन सः तथोक्तः, अनया = साकंचर्या, वामलोचनया = रमण्या, सह, नानाविधं = वहुप्रकारम्, सौख्यं = मोदम्, अनुभवम् = उपभुज्यमानः, भवद्विरहवेदनाशल्यसुलभवैकल्यः = भवतः श्रीमतः वियोगेन विरहेण या वेदना पीडा सा एव शल्यं शङ्कुः तेन सुलभं प्राप्तं वैकल्यं उद्वेगः यत्र तादृशं हृदयं यस्य सः तथोक्तः, अहम्, सिद्धादेशेन = योगिनः आज्ञया, सुहृज्जनावलोकनफलं = सुहृज्जनस्य मित्रस्य (तव) अवलोकनं सम्मेलनं फलं यत्र सः त तथोक्तं, प्रदेशं= भूभागम्, महाकालनिवासिनः = उज्जयिन्यां वर्तमानस्य, परमेश्वरस्य = शङ्करस्य, आराधनाय = अर्चनाय, अद्य = साम्प्रतम्, पत्नीसमेतः = पत्न्या गृहिण्या युक्तः, समागतः = प्राप्तः, अस्मि । भक्तवत्सलस्य = दासेषु दयालोः, गौरीपतेः उमेशस्य, कारुण्येन = दयया, त्वत्पदारविन्दसंदर्शनानन्दसंदोहः = त्वत् तव पदारविन्दयोः चरणाम्बुजयोः संदर्शनेन प्रविलोकनेन यः आनन्दः तस्य सन्दोहः प्रकरः मया = सोमदत्तेन (भवतः मित्रेण) लब्धः = प्राप्तः ॥ ११ ॥

विशेषः—अत्र कवेः ईश्वरविषयको विश्वासः धर्मनिष्ठा च व्यज्यते । मित्रयोः सम्मेलनमेवानन्दः इत्यपि सूचितम् ॥

करके अपनी कन्या के साथ मेरा विवाह कर दिया । विवाह के बाद मुझे युवराज भी बना दिया । उसके बाद, मैं इस वामलोचना के साथ नाना प्रकार के यौवन सुख का आनन्द लेता हुआ आपके अभाव से खिन्नहृदय परम कारुणिक भगवान् शङ्कर की उपासना के लिये आज आया हूँ । क्योंकि उनकी दया से आप अवश्य

कारुण्येन त्वत्पदारविन्दसंदर्शनानन्दसंदोहो मया लब्धः' इति। (११)

तन्निशम्याभिनन्दितपराक्रमो राजवाहनस्तन्निरपराधदण्डे दैवमुपालभ्य तस्मै क्रमेणात्मचरितं कथयामास। तस्मिन्नवसरे पुरतः पुष्पोद्भवं विलोक्य ससंभ्रमं निजनिटिलतटस्पृष्टचरणाङ्गुलिमुदञ्जलिममुं गाढमालिङ्ग्यानन्दबाष्प-

---

तन्निशम्य...... ... .दर्शयामास ॥ १२ ॥

प्रसङ्गः—सोमदत्तस्य सर्वं वृत्तान्तं श्रुत्वा राजवाहनस्य हर्षः पुष्पोद्भवस्य च आगमनम् वर्ण्यते।

व्याख्या—तन्निशम्य = सोमदत्तेन वर्णितं वृत्तान्तम्, श्रुत्वा, अभिनन्दितपराक्रमः = अभिनन्दितः प्रशंसितः (सोमदत्तस्य) पराक्रमः शौर्यम्येन सः तथोक्तः, राजवाहनः = राजहंसस्य पुत्रः, (युवराजः) तन्निरपराधदण्डे = तस्य = सोमदत्तस्य निरपराधस्य निर्दोषस्य दण्डे यातनायाम्, दैवम् = भाग्यम्, उपालभ्य = निन्द्य, तस्मै = सोमदत्ताय, क्रमेण = क्रमशः, आत्मचरितं = स्वकीयं वृत्तान्तम्, कथयामास = अव्याहरत्। तस्मिन्नवसरे = तत्क्षणे, पुरतः = समक्षम्, पुष्पोद्भवं= रत्नोद्भवस्य तनयम्, विलोक्य = प्रेक्ष्य, ससम्भ्रमं = साश्चर्यम्, निजनिटिलतट-स्पृष्टचरणाङ्गुलिम् = निजेन स्वीयेन निटिलतटेन मस्तकाग्रेण स्पृष्टाः संसक्ताः चरणाङ्गुलयः = पादाङ्गुलयः, येन सः तं तथोक्तम्, उदञ्जलिम् = बद्धाञ्जलिम्, अमुं = सम्मुखस्थम्, (पुष्पोद्भवम्) संकुलसंफुल्ललोचनः = आनन्दबाष्पेण हर्षाश्रुणा संकुले व्याप्ते संफुल्ले विकसिते लोचने नयने यस्य सः तथोक्तः,(राज-

---

मिलते। और यह उनकी भक्तवत्सल गौरीपति की दया ही है कि आप के चरण कमलों को पाकर आनन्दित हो रहा हूँ॥ ११ ॥

सोमदत्त की सारी कथा सुनकर, अनिन्द्य प्रराक्रम राजवाहन ने उसके कष्टों के लिए दैव की निन्दा करके अपना सारा वृतान्त कह सुनाया। ठीक उसी समय पुष्पोद्भव भी वहाँ आ गया। विनम्रतापूर्वक प्रणाम करते हुए उसका गाढालिङ्गनं करके राजा राजवाहन ने सोमदत्त से कहा—'भद्र! सोमदत्त! देखो, ये पुष्पोद्भव भी मिल गये!'॥ १२ ॥

संकुलसंफुल्ललोचनः 'सौम्य सोमदत्त, अयं सः पुष्पोद्भवः' इति तस्मै तं दर्शयामास। (१२)

तौ च चिरविरहदुःखं विसृज्यान्योन्यालिङ्गनसुखमन्वभूताम्। ततस्तस्यैव महीरुहस्य छायायामुपविश्य राजा सादरहासमभाषत—'वयस्य, भूसुरकार्यं करिष्णुरहं मित्रगणो विदितार्थः सर्वथान्तरायं करिष्यतीति निद्रितान्भवतः

वाहनः) 'सौम्य ! = भद्र !, सोमदत्त ! अयं = एषः पुरो वर्तमानः, सः = पूर्वपरिचितः, पुष्पोद्भवः = रत्नोद्भवसुतः इति, तस्मै = सोमदत्ताय, तं = पुष्पोद्भवम्, दर्शयामास = दर्शितवान् ॥ १२ ॥

तौ च ... . अलपत् ॥ १३ ॥

प्रसङ्गः—राजवाहनस्य सोमदत्तपुष्पोद्भवयोश्च मिथः सम्मेलनम् वर्णयति कविः।

व्याख्या—तौ = सोमदत्तपुष्पोद्भवौ, च, चिरविरहदुःखं = दीर्घवियोगव्यथाम्, विसृज्य = विस्मार्य, अन्योन्यस्य = परस्परस्य, आलिङ्गनसुखं = आलिङ्गनेन उपगूहनेन यत् सुखं आनन्दः तत्, अन्वभूताम् = प्राप्तवन्तः। ततः = सम्मेलनालिङ्गनान्तरम्, तस्यैव = तत्र वर्तमानस्यैव, महीरुहस्य = भूरुहस्य, छायायां = अधस्तले प्रश्रये वा उपविश्य = स्थितिं कृत्वा, राजा = राजवाहनः, सादरहासं = आदरेणसहितः सादरः सादरः हासो यत्र तत् सादरहासम्, अभाषत = अब्रवीत्—वयस्य ! मित्र !, भूसुरकार्यं = विप्रकार्यम्, करिष्णुः = कर्त्तुं शीलः, अहं = राजवाहनः, मित्रगणः = सखामण्डलम्, विदितार्थः = ज्ञातोद्देश्यः, सर्वथा = सर्वप्रकारेण, अन्तरायं = विघ्नम्, करिष्यति = पातयिष्यति, इति विचार्य, निद्रितान् = सुप्तान्, भवतः = युष्मान्, परित्यज्य = विहाय, निरगाम् = अगच्छम्। तदनु=

उन दोनों (सोमदत्त और पुष्पोद्भव) ने चिर विरह के दुःख को भुलाकर आपस में आलिङ्गनसुख प्राप्त किया। उसके बाद उसी वृक्ष की छाया में बैठकर राजा ने आदर सहित हँसते हुए कहा—'मित्र, ब्राह्मण का कार्य करने की इच्छा से मैं, यह सोचकर कि जानने के बाद मित्रगण नहीं जाने देंगे, आप लोगों को निद्रावस्था में छोड़कर यहाँ से चला गया था। उसके बाद जग कर आप लोग

परित्यज्य निरगाम् । तदनु प्रबुद्धो वयस्यवर्गः किमिति निश्चित्य मदन्वेषणाय कुत्र गतवान् । भवानेकाकी कुत्र गतः' इति । सोऽपि ललाटतटचुम्बदञ्जलिपुटः सविनयमलपत् । (१३)

इति श्रीदण्डिनः कृतौ दशकुमारचरिते सोमदत्तचरितं नाम तृतीय उच्छ्वासः ।

—:०:—

ततः परम्, प्रबुद्धः = जाग्रतः वयस्यवर्गः = मित्रसमूहः, किमिति, निश्चित्य = विचार्य, मदन्वेषणाय = मम मार्गणाय, कुत्र, गतवान् = अगच्छत् । एकाकी = एकलः, भवान् = त्वम्, कुत्र, गतः = प्राप्तः इति । सोऽपि = पुष्पोद्भवोऽपि, ललाटतटचुम्बदञ्जलिपुटः = ललाटतटं भालाग्रभागं चुम्बत् स्पृशत् अञ्जलिपुटं पाणिपुटं यस्य सः तथोक्तः, सविनयेन = विनयेन सहितं यथा स्यात्तथा, अलपत् = वक्तुमारब्धः ।। १३ ।।

इति दण्डिप्रणीतदशकुमारचरितस्य पूर्वपीठिकायाः त्रिपाठियमुनेशचातकेन कृतायां'प्रदीपिका' व्याख्यायां तृतीयोच्छ्वासः ।

क्या किये ? मुझे खोजते हुए कहाँ गए ? राजा की जिज्ञासा सुनकर पुष्पोद्भव विनम्रतापूर्वक कहने लगा— ।। १३ ।।

चतुर्थोच्छ्वासः

'देव, महीसुरोपकारायैव देवो गतवानिति निश्चित्यापि देवेन गन्तव्यं देशं निर्णेतुमशक्नुवानो मित्रगणः परस्परं वियुज्य दिक्षु देवमन्वेष्टुमगच्छत्। (१)

अहमपि देवस्यान्वेषणाय महीमटन्कदाचिदम्बरमध्यगतस्याम्बरमणेः

देव··· ··· ···· ··· ··· ···· ··· ···अगच्छत् ॥ १ ॥

प्रसङ्गः—राजवाहनेन पृष्टः पुष्पोद्भवः वृत्तान्तं वर्णयति—

व्याख्या—देव ! महाराज !, देवः = भवान्, महीसुरोपकाराय = ब्राह्मणस्य सहातायै, गतवान् = गतः, इति = इत्थम्, निश्चित्यापि = विचार्यापि, देवेन = श्रीमता, गन्तव्यं = गन्तुं—यातुं योग्यं यातव्यम्, देशं = स्थानं, निर्णेतुं = निश्चेतुम्, अशक्नुवानः = असमर्थः, मित्रगणः = सखासमूहः, परस्परं अन्योन्यम्, वियुज्य = पृथग्भूय, दिक्षु = यत्र तत्र, देवं = भवन्तम्, अन्वेष्टुम् शोधयितुम् प्राप्तुम् वा, अगच्छत् = गतवान् ॥ १ ॥

अहमपि ··· ··· ··· ··· ···· ··· ··· ···अपृच्छम् ॥ २ ॥

सन्दर्भः—पुष्पोद्भवः स्वविषये वदति—

व्याख्या—अहमपि = पुष्पोद्भवोऽपि, देवस्य = राज्ञः, भवतः वा, अन्वेषणाय = शोधनाय, महीम् = धरित्रीम्, अटन् = प्रविचरन्, कदाचित् = एकदा, अम्बरमध्यगतस्य = अम्बरस्य = गगनस्य मध्यं अन्तरालं गतस्य प्राप्तस्य, अम्बरमणेः =

महाराज ! आप ब्राह्मण के उपकार के लिए गये होंगे ऐसी आशंका करके भी आपके गन्तव्य स्थान का निश्चय न होने से मित्र वर्ग अलग-अलग होकर आपको ढूंढने के लिए चारों दिशाओं में चल पड़ा ॥ १ ॥

और मै भी आपको ढूंढ़ता हुआ एक दिन मध्याह्न सूर्य के प्रखर ताप से क्लांत होकर पर्वत के किनारे उगे हुए एक वृक्ष की शीतल छाया में कुछ समय

किरणमसहिष्णुरेकस्य गिरितटमहीरुहस्य प्रच्छायशीतले तले क्षणमुपाविशम्। मम पुरोभागे दिनमध्यसंकुचितसर्वावयवां कूर्माकृतिं मानुषच्छायां निरीक्ष्योन्मुखो गगनतलान्महारयेण पतन्तं पुरुषं कंचिदन्तराल एव दयोपनतहृदयोऽहमवलम्ब्य शनैरवनितले निक्षिप्य दूरापातवीतसंज्ञं तं शिशिरोपचारेण विबोध्य शोकातिरेकेणोद्गतबाष्पलोचनं तं भृगुपतनकारणमपृच्छम् (२)

रवेः, किरण = रश्मिम्, असहिष्णुः सोढुमशक्तः, एकस्य = कस्यचित्, गिरितटमहीरुहस्य = पर्वतस्य वृक्षस्य, प्रच्छायशीतले = प्रकृष्टाच्छाया प्रच्छायं तेन शीतलं शिशिरम् तस्मिन् तथोक्ते, तले = अधःप्रदेशे, क्षणं = पलमात्रम्, उपविशम् = विश्रामं कृतवान् । मम = पुष्पोद्भवस्य, पुरो भागे सम्मुखे, दिनमध्यसङ्कुचितसर्वावयवान् = दिनमध्यसमये = मध्याह्ने संकुचितावयवम् = संकुचिताः आकुञ्चिताः अवयवाः अङ्गानि यस्याः सा ताम् तथोक्ताम्, कूर्माकृतिम् = कूर्मस्य कच्छपस्य आकृतिः आकारः यस्याः सा तां तथोक्ताम्, मानुषच्छायां = नरच्छायाम्, निरीक्ष्य = दृष्ट्वा, उन्मुखः = ऊर्ध्वमुखः, गगनतलात् = अम्बरतलात्, महारवेण = प्रबलवेगेन, पतन्तं = स्खलन्तम्, कञ्चित् = एकम्, पुरुषं = मनुजम्, अन्तराले = मध्ये धरास्पर्शात् पूर्वमेव, दयोपनतहृदयः = दयया = करुणया उपनतं द्रवितं हृदयं मनो यस्य सः तथोक्तः, अहं = पुष्पोद्भवः, अवलम्ब्य = प्रगृह्य, शनैः = मन्दम्, अवनितले = पृथिव्याम्, निक्षिप्य = संस्थाप्य, दूरापातवीतसंज्ञम् = दूरात् उच्चैः आपातः पतनं तेन वीता अपगता संज्ञा चेतना यस्य सः तं तथोक्तम्, तं = नरम्, आकृतिम् वा, शिशिरोपचारेण = सलिलकणप्रक्षेपेण, विबोध्य = सचेतनं कृत्वा शोकातिरेकेण = दुःखाधिक्येन, उद्गतवाष्पलोचनं = उदगतं निर्गतं वाष्पं

के लिए बैठ गया। इतने में मेरे सामने ही दोपहर के समय अपने सभी अङ्गों को समेटे हुए कछुए के आकार सदृश मनुष्य की छाया दीख पड़ी। छाया को देखकर मैंने ऊपर देखा तो आकाश से बड़े वेगपूर्वक गिरता हुआ कोई पुरुष दिखलाई पड़ा। उसे देखकर मुझे दया आ गयी। अतः बीच में ही लोककर नीचे उतार लिया और जल के छीटे आदि से उसकी मूर्छा दूर करके प्रपात से गिरने का कारण पूछा ॥ २ ॥

सोऽपि करुरुहैरश्रुकणानपनयन्नभाषत—'सौम्य, मगधाधिनाथामात्यस्य पद्मोद्भवस्यात्मसंभवो रत्नोद्भवो नामाहम् । वाणिज्यरूपेण कालयवनद्वीपमुपेत्य कामपि वणिक्कन्यकां परिणीय तया सह प्रत्यागच्छन्नम्बुधौ तीरस्यानतिदूर एव प्रवहणस्य भग्नतया सर्वेषु निमग्नेषु कथंकथमपि दैवानुकूल्येन तीरभूमिमभिगम्य

अश्रु याभ्यां तादृशी लोचने नयने यस्य सः तं तथोक्तम्, तं = पुरुषम्, भृगुपतन-कारणम् = भृगोः प्रपातात् पतनस्य स्खलनस्य कारणं हेतुम्, अपृच्छम् = पृष्टवान् ॥ २ ॥

सोऽपि··· ··· ··· ··· ··· ····· ·· अकार्षम्' इति ॥ ३ ॥

प्रसङ्गः पुष्पोद्भवः राजानं राजहंसं पततः पुरुषस्य वृत्तान्तं श्रावयन्नाह—

व्याख्या—सोऽपि = पतन् पुरुषोऽपि, करुरुहैः = कराग्रैः, अश्रुकणान् = वाष्पविन्दून्, अनपनयन् = प्रोञ्छन्, अभाषत = अब्रवीत्, सौम्य ! = भद्र !, मगधाधिनाथामात्यस्य = राजहंसमन्त्रिणः, पद्मोद्भवस्य = तन्नाम्नः मन्त्रिणः, आत्मसम्भवः = आत्मजः रत्नोद्भवः नाम = रत्नोद्भवनामा, अहम् = अस्मि । वाणिज्यरूपेण = व्यापारविचारणया, कालयवनद्वीपम् = तदभिधं देशम् उपेत्य = गत्वा, कामपि = एकाम्, वणिक्कन्यकाम् = वणिक्पुत्रीम्, परिणीय = विवाह्य, तया = वणिककन्यया, सह साकम्, प्रत्यागच्छन् = परावर्तमानः अम्बुधौ = सागरे, तीरस्य = वेलायाः, अनतिदूरे = समीपे, एव, प्रवहणस्य = जलयानस्य, भग्नतया = विदीर्णतया, सर्वेषु = सकलेषु निमग्नेषु = अन्तर्लीनेषु, कथम् कथमपि = केनापि प्रकारेण, अपि, दैवानुकूल्येन = भाग्यसाहाय्येन, तीरभूमिम् = तटप्रदेशम्, अभिगम्य = प्राप्य, निजाङ्गना वियोगदुःखार्णवे = निजायाः स्वकीयायाः

मेरा प्रश्न सुनकर उस पुरुष ने अपने हाथों से आँसू पोछते हुए कहा — 'सौम्य !, मैं मगधनरेश का अमात्य पद्मोद्भव का पुत्र रत्नोद्भव हूँ । मैं व्यापार करने के विचार से कालयवन द्वीप गया था । वहाँ एक व्यापारी की कन्या से विवाह कर लिया । लौटते समय मेरी नौका समुद्र में डूब गई । और उस पर सवार सभी लोग डूब गये । भाग्य की कृपा से मैं तीर लग गया । उसके बाद पत्नी वियोग से अत्यन्त दुःखी एक तापस के आश्रम पर गया । तापस के कथ-

निजाङ्गनावियोगदुःखार्णवे प्लवमानः कस्यापि सिद्धतापसस्यादेशादरेण षोडश हायनानि कथंचिन्नीत्वा दुःखस्य पारमनवेक्षमाणः गिरिपतनमकार्षम्' इति। (३)

तस्मिन्नेवावसरे किमपि नारीकूजितमश्रावि—'न खलु समुचितमिदं यत्सिद्धादिष्टे पतितनयमिलने विरहमसहिष्णुर्वैश्वानरं विशसि' इति। (४)

अङ्गनायाः पत्न्याः यद् वियोगदुःख विश्लेषव्यथा तदेव अर्णवः समुद्रः तस्मिन् तथोक्ते, प्लवमानः = सतरन्, कस्यापि = एकस्य, सिद्धतापस्य = सिद्धतपस्विनः आदेशादरेण = आज्ञाविश्वासेन, षोडश, हायनानि = षडुत्तरदशवर्षाणि, कथंचित् कथं कथमपि, नीत्वा = अतिवाह्य, दुःखस्य = क्लेशस्य, पारं = अन्तम्, अनवेक्षमाणः = अपश्यन्, गिरिपतनम् = पर्वतात् पतनम्, अकार्षम् = कृतवान् इति ।३।

विशेषः—करुणरसः ।

तस्मिन्नेव .. .. विशसि' इति ॥ ४ ॥

प्रसङ्गः—पतन् पुरुषः आत्मवृत्तान्तं श्रावयन्नाह—

व्याख्या—तस्मिन्नेव = तदेव, अवसरे = क्षणे, किमपि अनिर्दिष्टम्, नारीकूजितम् = स्त्रियः क्रन्दनम्, अश्रावि = श्रुतम् इदं = कार्यम्, न, खलु, समुचितं = उपयुक्तम्, यत्, पतितनयमिलने = पत्युः भर्त्तुः तनयस्य = पुत्रस्य, च मिलने सम्मेलने, सिद्धादिष्टे = तापसोक्ते, विरहं = वियोगम्, असहिष्णु = सोढुमशक्ता, वैश्वानरं = अग्निम्, विशसि = प्रविशसि प्रयासि वा इति ॥ ४ ॥

तन्निशम्य .. .. स्थियतामिति ॥ ५ ॥

प्रसङ्गः—रत्नोद्भवः स्ववृत्तान्तं श्रावयति—

नानुसार पत्नी-मिलन की आशा से सोलह वर्ष काट कर, अब तक भी मिलन न होने के कारण निराश होकर विकलतावशात्—पर्वत से कूद पड़ा! ॥ ३ ॥

इस प्रकार हम दोनों में वार्ता हो ही रही थी कि उसी समय किसी स्त्री के रोने की आवाज आयी। वह स्त्री कह रही थी—कि हे बाले, जब एक तापस ने बतलाया हो है कि सोलह वर्ष में तुम्हारे पति और पुत्र दोनों मिलेंगे, फिर तो क्यों विरह व्यथा से विकल होकर अग्नि में प्रविष्ट हो रही हो ॥ ४ ॥

तन्निशम्य मनोविदितजनकभावं तमवादिषम्—'तात, भवते विज्ञापनीयानि बहूनि सन्ति। भवतु। पश्चादखिलमाख्यातव्यम्। अधुना नारीकूजितमनुपेक्षणीयं मया। क्षणमात्रम् भवता स्थीयताम्' इति। (५)

तदनु सोऽहं त्वरया किंचिदन्तरमगमम्। तत्र पुरतो भयङ्करज्वालाकुलहुतभुगवगाहनसाहसिकां मुकुलिताञ्जलिपुटां वनितां कांचिदवलोक्य ससम्भ्रम-

---

व्याख्या—तन्निशम्य नाराक्रन्दनम् श्रुत्वा, मनोविदितजनकभावं = मनसा अन्तःकरणेन विदितः ज्ञातः जनकभावः पितृत्वं यस्य सः तम् तथोक्तम्. तम् = पतितं पुरुषं अवादिषम् = प्रोक्तवान्। तात = पितः! भवते = तुभ्यम्, बहूनि = अधिकानि, विज्ञापनीयानि = निवेदनीयानि, सन्ति। भवतु = तिष्ठतु। पश्चात् = तदनन्तरम्, अखिलं = सम्पूर्णम्, आख्यातव्यम् = कथितव्यम्। अधुना = सांप्रतम्, नारीकूजितं = स्त्रीरोदनम्, अनुपेक्षणीयम् = उपेक्षितुमयोग्यम्, मया = पुष्पोद्भवेन। अत्र = अस्मिन् प्रदेशे, भवता = त्वया, क्षणमात्रम् = मुहूर्तमात्रम्, स्थीयताम् = आस्यताम् ॥ ५ ॥

तदनु ·· ··· ••• ·· ··· ···· ·· कथ्यतामिति ॥ ६ ॥

प्रसङ्गः—सुवृत्तायाः वृत्तान्तं पुष्पोद्भवः श्रावयति ॥

व्याख्या - तदनु = तदनन्तरम्, सोऽहम् = पुष्पोद्भवः, किञ्चित्, अन्तरम् = दूरम्. अगमम् = गतवान्। तत्र = तत् प्रदेशे, पुरतः = अग्रे, भयङ्करज्वालाकुलहुतभुगवगाहनसाहसिकाम् = भयङ्कराभिः प्रचण्डाभिः ज्वालाभिः = शिखाभिः आकुले व्याप्ते हुतभुजि = अग्नौ अवगाहने प्रवेशे साहसिकाम् उद्यताम्, मुकुलिताञ्जलिपुटाम् बद्धाञ्जलिम्, काञ्चित् = एकाम्, वनिताम् = नारीम्, अवलोक्य = दृष्ट्वा,

---

यह सुनकर मेरे मन में यह निश्चय हो गया कि ये मेरे पिताजी हैं? मैंने कहा—'पिताजी, आपसे बहुत कुछ कहना है। सारी बात बतलाऊँगा। पहले मैं देख लूँ कि कौन रो रही है! तब तक आप यहीं ठहरे रहें! ॥ ५ ॥

तत्पश्चात् मैं शीघ्रतापूर्वक कुछ दूर आगे चला गया। वहाँ जाकर देखा कि एक स्त्री भयंकर ज्वालामयी अग्नि में कूदने के लिए हाथ जोड़कर तैयार है। मैंने उसे शीघ्रतापूर्वक आग में कूदने से रोक कर पास में स्थित रोती हुई वृद्धा को

मनलादपनीय कूजन्त्या वृद्धया सह मत्पितुरभ्यर्णमभिगमय्य स्थविरामवोचम्——'वृद्धे, भवत्यौ कुत्रत्ये । कान्तारे निमित्तेन केन दुरवस्थानुभूयते । कथ्यताम्' इति । (६)

सा सगद्गदमवादीत्—'पुत्र, कालयवनद्वीपे कालगुप्तनाम्नो वणिजः कस्यचिदेषा सुता सुवृत्ता नाम रत्नोद्भवेन निजकान्तेनागच्छन्ती जलधौ मग्ने प्रवहणे निजधात्र्या मया सह फलकमेकमवलम्ब्य दैवयोगेन कूलमुपेतासन्नप्रसव-

---

ससंभ्रमम् = त्वरितम्, अनलात् = पावकात्, अपनीय = दूरीकृत्य, कूजन्त्या = विलपन्त्या, वृद्धया = स्थविरया, सह = साकम्, मत्पितुः = मज्जनकस्य, अभ्यर्णम् समीपम्, अभिगमय्य = प्रापय्य, स्थविराम् = वृद्धाम्, अवोचम् = उक्तवान् = वृद्धे = स्थविरे !, भवत्यौ युवाम् (त्वम् एषा च) कुत्रत्ये = कस्मात् स्थानात् अत्र = आगते । कान्तारे = अरण्ये, केन निमित्तेन = कारणेन, दुखस्था = दुःस्थितिः, अनुभूयते = प्राप्यते । कथ्यताम् = भण्यताम् ॥ ६ ॥

सा··· ··· ··· ··· ···· ···· ···उद्युक्तासीत् ॥ ७ ॥

प्रसङ्गः—पुष्पोद्भवः वृद्धायाः कथनं प्रस्तौति—

व्याख्या—सा = वृद्धा, सगद्गदम् = रुद्धकण्ठम्, अवादीत् = अकथयत्—पुत्र = वत्स, कालयवनद्वीपे = कालयवनदेशे, कालगुप्तनाम्नः, वणिजः = व्यापारिणः वैश्यस्य वा, एषा, सुवृत्ता नाम, सुता = पुत्री, रत्नोद्भवेन, निजकान्तेन = स्वपतिना (सह) आगच्छन्ती = प्रयान्ती, जलधौ = सिन्धौ, प्रवहणे = पोते, निमग्ने = अन्तर्लीने, निजधात्र्या = स्वोपमात्रा, मया = स्थविरया, सह = साकम्, एकम् = किञ्चित्, फलकं = दारुखण्डम्, अवलम्ब्य = आधृत्य, दैवयोगेन = भाग्य-

---

लेकर अपने पिताजी के पास आकर वृद्धा से कहा—'वृद्धे !, बतलाओ कि तुम कौन हो ? इस जंगल में किस कारण दुःख भोग रही हो ॥ ६ ॥

उस वृद्धा ने गद्गदकण्ठ से कहा—'बेटा, कालयवन द्वीप निवासी किसी बनिया की पुत्री सुवृत्ता, अपने पति रत्नोद्भव के साथ नौका में बैठकर जा रही थी । दुर्भाग्य से नौका समुद्र में डूब गई। मैं इसकी धायी हूँ । संयोग की बात कि मेरे साथ एक पटरे के सहारे तीर पर जा लगी । इसने पूर्णगर्भा होने से, एक

समया कस्याञ्चिदटव्यामात्मजमसूत । मम तु मन्दभाग्यतया बाले वनमातङ्गेन गृहीते मद्‌द्वितीया परिभ्रमन्ती 'षोडशवर्षानन्तरं भर्तृपुत्रसङ्गमो भविष्यति' इति सिद्धवाक्यविश्वासादेकस्मिन्पुण्याश्रमे तावन्तं समयं नीत्वा शोकमपारं सोढुमक्षमा समुज्ज्वलिते वैश्वानरे शरीरमाहुतीकर्तुमुद्युक्तासीत्' इति । (७)

तदाकर्ण्य निजजननीं ज्ञात्वा तामहं दण्डवत्प्रणम्य तस्यै मदुदन्तमखिल-

---

संयोगेन, कूलं = तटम्, उपेता = प्राप्ता, आसन्नप्रसवसमया = आसन्नः समीपस्थः प्रसवः गर्भो यस्याः सा, पूर्णप्रसवसमया, कस्याञ्चित् = एकस्याम्, अटव्यां = वने, आत्मजं = पुत्रम्, असूत = प्रासोष्ट । मम = वृद्धायाः तु, मन्दभाग्यतया = दुर्भाग्येन, बाले = अर्भके, वनमातङ्गेन = वनगजेन, गृहीते = समाक्रान्ते, मद्‌द्वितीया = अहं द्वितीया यस्याः सा, मच्छरणा, भर्तृपुत्रसंगमः = पतिपुत्रसंयोगः, भविष्यति इति, सिद्धवाक्यविश्वासात् = तापसवचनविश्वासात्, एकस्मिन् = कस्मिंश्चित्, पुण्याश्रमे = पवित्रस्थाने, तावन्तं = षोडशवर्षमितम्, समयं = कालम्, नीत्वा = अतिवाह्य, अपारम् = अपरिमितम्, शोकम् = दुःखम्, सोढुम् = अतिक्रमितुम्, अक्षमा = असमर्था, समुज्ज्वलिते = प्रज्ज्वलिते, वैश्वानरे = पावके, शरीरम् = देहम्, आहुतीकर्त्तुम् = भस्मीकर्त्तुम्, उद्युक्ता = तत्परा, आसीत् = अजायत ॥ ७ ॥

तदाकर्ण्य ··· ··· ··· ···· ··· ···· ·· उपाविशताम् ॥ ८ ॥

प्रसङ्गः—पुष्पोद्भवः वृद्धायाः स्वस्य च सम्मेलनं वर्णयन्नाहः—

व्याख्या – तत् = वृद्धया कथितम्, आकर्ण्य = श्रुत्वा, निजजननीं = स्वां मातरम्, ज्ञात्वा = बुद्ध्वा, अहम् = पुष्पोद्भवः, तां = वृद्धाम्, दण्डवत् =

जंगल में पुत्र को जन्म दिया । दुर्भाग्यवशात् एक जंगली हाथी उस बच्चे को ले गया पुनः वह विचारी रोती हुई एक तपस्वी के आश्रम पर गई । तपस्वी ने उसे समझाया कि सोलह वर्षों के बाद तुम्हारे पति और पुत्र दोनों मिल जायेंगे । इस प्रकार उस तपस्वी के कथनानुसार एक पुण्याश्रम में रहने लगी । पर अब वियोग न सह सकने के कारण, सोलह वर्ष बीतने के बाद आग में कूदने के लिए तैयार थी ! ॥ ७ ॥

माख्याय धात्रीभाषणफुल्लवदनं विस्मयविकसिताक्षं जनकमदर्शयम् । पितरौ तौ साभिज्ञानमन्योन्यं ज्ञात्वा मुदितान्तरात्मानौ विनीतं ममानन्दाश्रुवर्षेणाभिषिच्य गाढमाश्लिष्य शिरस्युपाघ्राय कस्यांचिन्महीरुहच्छायायामुपाविशताम् । (८)

'कथं निवसति महीवल्लभो राजहंसः' इति जनकेन पृष्टोऽहं तस्य

साष्टाङ्गम्, प्रणम्य = नमस्कृत्य, तस्यै = स्वजनन्यै, अखिलं = सकलम्, मदुदन्तं = स्वकीयं समाचारम्, आख्याय = व्याहृत्य धात्रीभाषणफुल्लवदनम् = धात्र्याः उपमातुः भाषणेन प्रफुल्लं विकसितं वदनं मुखम् यस्य स तम्, विस्मय-विकसिताक्षम् विस्मयेन आश्चर्यरसेन विकसिते प्रफुल्ले अक्षिणी नयने यस्य सः तं तथोक्तम्, जनकं = पितरम्, अदर्शयम् = दर्शितवान् । तौ = माता च पिता च, पितरौ = माता पितरौ, साभिज्ञानं = अभिज्ञानेन सहितम्, अन्योन्यं = परस्परम्, ज्ञात्वा = परिचित्य, मुदितान्तरात्मानौ = मुदितः हर्षितः अन्तरात्मा अन्तःकरणं ययोस्तौ, विनीतं = विनम्रम्, मां = पुष्पोद्भवम्, आनन्दाश्रुवर्षेण = प्रमोदाश्रु-प्रवाहेण, अभिषिच्य, सिक्त्वा, गाढं = दृढम्, आश्लिष्य = आलिङ्ग्य, शिरसि = मस्तके, उपाघ्राय = घ्रात्वा, कस्याञ्चित् = एकस्याम्, महीरुहच्छायायां = वृक्षस्य छायायाम्, उपाविशताम् = उपविष्टौ ॥ ८ ॥

कथम्··· ··· ···· ··· ··· ··· ···· ···अनयम् ॥ ९ ॥

प्रसङ्गः—पुष्पोद्भवः राजहंसं रत्नोद्भववृत्तान्तं श्रावयन्नाह—

व्याख्या—महीवल्लभः = राजा, राजहंसः = मगधेशः, कथं = केन प्रकारेण, निवसति = निवासं करोति, इति = इत्थम्, जनकेन = तातेन, (रत्नोद्भवेन) पृष्टः = संबोधितः, अहं = पुष्पोद्भवः, तस्य = राजहंसस्य,

---

उस वृद्धा का कथन सुनकर मैंने निश्चय कर लिया कि यह मेरी मां है । पुनः प्रणाम करके सारा समाचार सुनाया और उसे लाकर धायी की बातों से प्रसन्न पिताजी के दर्शन कराया । मेरे वे दोनों माता-पिता आपस में अभिज्ञान के द्वारा पूर्वपरिचित होकर अत्यन्त प्रसन्नतापूर्वक मेरा गाढ़ालिगन करके एक वृक्ष की छाया में बैठ गए ॥ ८ ॥

पुनः पिताजी के पूछने पर कि महाराज राजहंस का क्या समाचार है ?—

राज्यच्युतिं त्वदीयजननं सकलकुमारावाप्तिं तव दिग्विजयारम्भं भवतः मातङ्गा-नुयानमस्माकं युष्मदन्वेषणकारणं सकलमभ्यधाम् । ततस्तौ कस्यचिदाश्रमे मुने-रस्थापयम् । ततो देवस्यान्वेषणपरायणोऽहमखिलकार्यनिमित्तं वित्तं निश्चित्य भवदनुग्रहाल्लब्धस्य साधकस्य साहाय्यकरणदक्षं शिष्यगणं निष्पाद्य विन्ध्यव-नमध्ये पुरातनपत्तनस्थानान्युपेत्य विविधसूचकानां महीरुहाणामधोनिक्षिप्तान्

राज्यच्युतिं = राज्यभ्रंशम, त्वदीयजननम् = युष्मदुत्पत्तिम्, सकलकुमारावाप्तिं = समस्तानां बालकानां अवाप्तिं = प्राप्तिम्, तव = भवतः, दिग्विजयारम्भं = दिग्वि-जयप्रयाणम्, भवतः = श्रीमतः, मतङ्गानुयानम् = मातङ्गनाम्नः ब्राह्मणस्य अनु पश्चात् यानम् गमनम्, अस्माकं = भवतः मित्राणाम्, युष्मत् = तव, अन्वेषण-कारणं = मार्गणहेतुम्, सकलं = सम्पूर्णम्, अभ्यधाम् = अवदम् । ततः = मत्कथ-नानन्तरम्, तौ = मातापितरौ, कस्यचित् = एकस्य, मुनेः = ऋषेः, आश्रमे = पर्णशालायाम्, अस्थापयम् = न्यवासयम्, ततः = तदनन्तरम्, देवस्य = भवतः, अन्वेषणपरायणः = मार्गणतत्परः, अहं = पुष्पोद्भवः, अखिलकार्यनिमित्तं = समस्तकर्मसाधनम्, वित्तं = धनम्, निश्चित्य = निर्णीय, भवदनुग्रहाल्लब्धस्य= तव कृपावशात् प्राप्तस्य, साधकस्य = ऋषेः, साहाय्यकरणदक्षं = सहायता कर्मणि कुशलम्, शिष्यगणं = विद्यार्थिवर्गम्, निष्पाद्य = सहचरीकृत्य, विन्ध्य-वनमध्ये = विन्ध्यारण्यमध्ये, पुरातनपत्तनस्थानानि = प्राचीन नगर प्रदे-शान्, उपेत्य = गत्वा, विविधनिधिसूचकानाम् = विविधाना बहूनां निधीनां धनपूर्णकलशानाम् सूचकानां निर्देशकानाम्, महीरुहाणां = भूरुहाणाम्, अधो-निक्षिप्तान् = तले रक्षितान्, वसुपूर्णान् = धनपूर्णान्, कलशान् = घटान्,

---

मैंने उनकी राज्यच्युति, आपका जन्म, दशकुमारों की प्राप्ति, आपका दिग्विजय-प्रस्थान, मातङ्ग के साथ गमन एवं हम लोगों के द्वारा आपका अन्वेषण, सब कुछ कह सुनाया । फिर उन दोनों को एक मुनि के आश्रम पर ठहरा दिया । फिर मैंने आपको खोजता हुआ 'सारा कार्य धन से ही होता है' ऐसा सोच कर आपकी कृपा से उसी समय कुछ चतुर शिष्य तैयार किये । उनके साथ विन्ध्याचल के एक प्राचीन भग्नावशेष नगर में गया । वहाँ आँखों में सिद्धाञ्जन लगाकर

वसुपूर्णान् कलशान् सिद्धाञ्जनेन ज्ञात्वा रक्षिषु परितः स्थितेषु खननसाधनैरुत्पाट्य दीनारानसंख्यान् राशीकृत्य तत्कालागतमनतिदूरे निवेशितं वणिक्कटकं कञ्चिदभ्येत्य तत्र बलिनो बलीवर्दान् गोणींश्च क्रीत्वान्यद्रव्यमिषेण वसु तद्गोणीसंचितं तैरुह्यमानं शनैः कटकमनयम् । (९)

तदधिकारिणा चन्द्रपालेन केनचिद्वणिक्पुत्रेण विरचितसौहृदोऽहममुनैव

सिद्धाञ्जनेन = नयनयोः प्रदत्तकज्जलविशेषेण, ज्ञात्वा = अवबोध्य, रक्षिषु = प्रहरिषु, परितः = सर्वतः, स्थितेषु = वर्तमानेषु, खननसाधनैः = परशुभिः, उत्पाट्य = खनित्वा, असंख्यान् = प्रचुरान्, दीनारान् = स्वर्णमुद्राः, राशीकृत्य = संहृत्य, तत्कालगतं = तत्समयोपस्थितम्, अनतिदूरे = निकटे, निवेशितं = सुरक्षितम्, वणिक्कटकं = वणिङ्निवासम्, कञ्चित् = एकम्, अभ्येत्य = प्राप्य. तत्र = कटके, बलिनः = शक्तिशालिनः, बलीवर्दान् = वृषभान्, गोणीः = धान्यवाहनार्थरज्जुनिर्मित पात्रविशेषान्, च, क्रीत्वा = विनिमयं कृत्वा, अन्यद्रव्यमिषेण = द्रव्यान्तरमिषेण, तद्गोणीसंचितं = तद्गोणीषु राशीकृतम्, वसु = धनम्, तैः = बलीवर्दैः, उह्यमानं = नीयमानम्, शनैः = मन्दं मन्दम्, कटकं = शिविरम्, अनयम् = नीतवान् ॥ ९ ॥

तदधिकारिणा ... ...कथयिष्यामि ॥ १० ॥

प्रसङ्गः— पुष्पोद्भवः कटकप्रवेशवृत्तान्तं श्रावयन्नाह—

व्याख्या—तदधिकारिणा = कटकमुख्येन, चन्द्रपालेन = चन्द्रपालाभिधेन वणिक्तनयेन, विरचितसौहृदः = विरचितं विहितं सौहृदं सखात्वं येन सः तथाभूतः,अहं = पुष्पोद्भवः, अमुना = अनेन चन्द्रपालेन) एव, साकं = सह, उज्ज-

---

वृक्षों के नीचे गड़े हुए रुपयों से पूर्ण कलश देखे । फिर चारों तरफ से रक्षकों को खड़ा करके उन्हें खनकर असंख्य अशर्फियों की राशि को, पास ही में स्थित एक वणिक् खेमे में जाकर, उन्हीं के बैलों आदि पर, अन्न के बहाने लादकर धीरे-धीरे उन्हीं के पडाव में ले गया ॥ ९ ॥

पुनः उस खेमे के अधिकारी चन्द्रपाल नामक बनिये के पुत्र से मित्रता करके उसी के साथ उज्जयिनी पहुँचा ।

साकमुज्जयिनीमुपाविशम् । मत्पितरावपि तां पुरीमभिगमय्य सकलगुणनिलयेन बन्धुपालनाम्ना चन्द्रपालजनकेन नीयमानो मालवनाथदर्शनं विधाय तदनुमत्या गूढवसतिमकरवम् । ततः काननभूमिषु भवन्तमन्वेष्टुमुद्युक्तं मां परममित्रं बन्धुपालो निशम्यावदत्—'सकलं धरणितलमपारमन्वेष्टुमक्षमो भवान्मनोग्लानिं विहाय तूष्णीं तिष्ठतु । भवन्नायकालोकनकारणं शुभशकुनं निरीक्ष्य कथयिष्यामि, इति । (१०)

यिनीम् = अवन्तीम्, उपाविशम् = गतवान् । मत्पितरौ = मम माता पितरौ, अपि, तां = पूर्वोक्ताम्, पुरीम् = नगरीम्, अभिगमय्य = प्रापय्य, सकलगुणनिलयेन = सकलानां समस्तानां गुणानां दाक्षिण्यादीनां निलयेन निवासास्पदेन, बन्धुपाल-नाम्ना = बन्धुपालाख्येन, चन्द्रपाल जनकेन = चन्द्रपालस्य पित्रा, नीयमानः = प्राप्यमाणः, (अहम्) मालवनाथदर्शनं = उज्जयिन्या राज्ञः, दर्शनम् = साक्षात् कारम् विधाय = कृत्वा, तदनुमत्या = तस्य आज्ञया, गूढवसतिं गूढनिवासम्, अकरवम् = कृतवान् । ततः =साक्षात्कारादनन्तरम्, काननभूमिषु = अरण्यभूमिषु, भवन्तं = त्वाम्, अन्वेष्टुं = मार्गितुम्, उद्युक्तं = तत्परम्, मां = पुष्पोद्भवम्, परममित्रं = उत्कृष्ट सहचरम्, बन्धुपालः = चन्द्रपालस्य पिता, निशम्य = श्रुत्वा, अवदत् = अकथयत्, सकलं = सम्पूर्णम्, अपारं = अमितम्, धरणितलं = वसुधातलम्, अन्वेष्टुं = परिभ्रमितुम्, अक्षमः = असमर्थः, भवान् = पुष्पोद्भवः, मनोग्लानिं = आत्मविषादम्, विहाय = त्यक्त्वा, तूष्णीं = मौनम्, तिष्ठतु = भवतु । भवतः = तव, नायकस्य = राज्ञः, अवलोकनकारण = दर्शनहेतुम्. शुभशकुनं = मंगलचिह्नम्, निरीक्ष्य = विलोक्य, कथयिष्यामि = वदिष्यामि ॥ १० ॥

पुनः अपने माता-पिता को भी वहीं ले जाकर एक दिन सर्व गुण सम्पन्न चन्द्रपाल के पिता बन्धुपाल के साथ मालव नरेश का दर्शन करके उनकी आज्ञा से गुप्त वेश में रहने लगा । एक दिन वनप्रदेश में आपको ढूँढ़ने के लिए उद्यत मुझे सुनकर बन्धुपाल ने कहा—समस्त पृथ्वी मण्डल पर घूमना असम्भव है । अतः आप ग्लानि छोड़कर शान्तिपूर्वक विश्राम करें । आपके राजा के दर्शन कब होंगे, यह मैं शुभ शकुन देख कर बतलाऊँगा ॥ १० ॥

तल्लपितामृताश्वासितहृदयोऽहमनुदिनं तदुपकण्ठवर्ती कदाचिदिन्दुमुखीं नवयौवनालीढावयवां नयनचन्द्रिकां बालचन्द्रिकां नाम तरुणीरत्नं वणिङ्मन्दिरलक्ष्मीं मूर्तामिवावलोक्य तदीयलावण्यावधूतधीरभावो लतान्तबाणबाणलक्ष्यतामयासिषं । (११)

चकितबालकुरङ्गलोचना सापि कुसुमसायकसायकायमानेन कटाक्षवीक्षणेन

तल्लपिता ·· ···· ··· ··· ···· ··· ····अयासिषम् ॥ ११ ॥

प्रसङ्गः--पुष्पोद्भवः बालचन्द्रिकां प्रति स्वकीयाकर्षणवृत्तान्तं वर्णयन्नाहः—

व्याख्या—तस्य = बन्धुपालस्य, लपितं = वचनमेव, अमृतं = पीयूषम्, तेन आश्वासितं = शान्तम्, हृदयं मनो यस्य सः तथोक्तः, अहं = पुष्पोद्भवः, अनुदिनं = प्रतिदिनम्, तदुपकण्ठवर्ती = तस्य समीपवर्ती, कदाचित् = एकदा, इन्दुमुखीं = चन्द्राननाम्, नवयौवनालीढावयवां = नवयौवनेनयुवावस्थया आलीढाः समाक्रान्ताः अवयवाः अङ्गानि यस्याः सा तां तथोक्ताम्, नयनचन्द्रिकां = नेत्रकौमुदीम्, बालचन्द्रिकां = बालचन्द्रिकानाम्नीम्, तरुणीरत्नं नारीशिरोभूषणम्, मूर्तां = सशरीराम्, वणिङ्मन्दिरलक्ष्मीम् = वणिजां व्यापारिणां मन्दिरस्य = भवनस्य लक्ष्मीं शोभाम्, इव, अवलोक्य = निरीक्ष्य, तदीयेन = बालचन्द्रिका सम्बन्धिनां, लावण्येन = सौन्दर्येण, अवधूतः = तिरस्कृतः, धीरभावः = धैर्यम् यस्य सः तथोक्तः, लतान्ताः = पुष्पाणि, बाणाः = शराः, यस्य सः कामदेवः, तस्य बाणलक्ष्यतां = शरोद्देश्यताम्, अयासिषम् = अगमम् ॥ ११ ॥

चकितबालकुरङ्ग···· ··· ··· ···· ··· ····अकथयत् ॥ १२ ॥

प्रसङ्गः—पुष्पोद्भवः बालचन्द्रिकायाः आनुरागिकभावादिकं वर्णयन्नाह—

व्याख्या—चकितस्य = भीतस्य, बालकुरङ्गस्य = शिशुमृगस्य, लोचने = नयने, इव, लोचने यस्याः सा, सा = बालचन्द्रिका, अपि, कुसुमसायकसायकायमानेन = कुसुमसायकस्य—कामस्य सायकः शर इव आचरतीति तेन तथोक्तेन,

---

उसके कथन से आश्वस्त होकर मैं उसी के पास रहने लगा। एक दिन मैंने वैश्यों के घर की लक्ष्मी सी परमसुन्दरी बाला चन्द्रिका नामक नवयौवना तरुणी को देखा। उसे देखकर मेरा धैर्य छूट गया और मैं कामातुर हो उठा! ॥ ११ ॥

मामसकृन्निरीक्ष्य मन्दमारुतान्दोलिता लतेवाकम्पत। मनसाभिमुखैः समाकुञ्चितैरागलज्जान्तरालवर्तिभिः साङ्गवर्तिभिरीक्षणविशेषैर्निजमनोवृत्तिमकथयत्। (१२)

चतुरगूढचेष्टाभिरस्या मनोऽनुरागं सम्यग्ज्ञात्वा सुखसंगमोपायमचिन्तयम्।

कामशरसदृशेन, कटाक्षवीक्षणेन = तिर्यग्विलोकनेन, मां = पुष्पोद्भवम्, असकृत् = मुहुर्मुहुः, निरीक्ष्य = वीक्ष्य मन्दमारुतान्दोलिता = धीरपवनेन कम्पिता, लता = वल्लरी इव, अकम्पत = कम्पितवती। मनसा = अन्तःकरणेन, अभिमुखैः = मयि समर्पितैः, समाकुञ्चितैः = (लज्जया) आकुञ्चितैः शिथिलीकृतैः रागलज्जान्तरालवर्तिभिः = रागः प्रेम लज्जा संकोचः तयो अन्तराले मध्ये वर्तितुं स्थातुं शीलं येषां ते, तैः तथोक्तैः, साङ्गवर्तिभिः = अंगैः सह वर्तमानैः, ईक्षणविशेषैः अपाङ्गविलोकनैः, निजमनोवृत्ति = स्वान्तःकरणव्यापारम्, कामेच्छाम् वा, अकथयत् = सूचितवती ॥ १२ ॥

विशेषः—अत्र दण्डिनः शृङ्गाररसानुगुणं शब्दसंगुम्फनं श्लाघ्यम्। शृङ्गाररसः आस्वाद्यते।

चतुरगूढ... ... ...शृण्वन्नतिष्ठत् ॥ १३ ॥

प्रसङ्गः—पुष्पोद्भवः बालचन्द्रिकायाः शृङ्गारचेष्टाभिः प्रभावितं स्वात्मानं वर्णयति—

व्याख्या—चतुरगूढचेष्टाभिः = चतुराः ललिताः गूढाः सरसाश्च या चेष्टाः शृङ्गारव्यञ्जका हावभावादयः ताभिः, अस्याः = बालचन्द्रिकायाः, मनोऽनुरागं = मानसप्रेमाणम्, सम्यक् = सुष्ठुतया, ज्ञात्वा = अवबोध्य, सुखसङ्गमोपायं = सम्मिलनविधिम् अचिन्तयम् = अविचारयम्। अन्यदा = अन्यस्मिन् काले, बन्धुपालः,

---

चकितबालकुरङ्गलोचना वह तरुणी भी काम के बाण सदृश अपने कटाक्षों से बार-बार मुझे देखकर पवनान्दोलित लता सी काँप उठी। उसने लज्जामिश्रित हाव-भावों से अपने मन का कामाभिलाष व्यक्त कर दिया॥ २॥

मै उसकी चतुर-गूढ़ चेष्टाओं से अपने प्रति अनुराग को भली भाँति जानकर परस्पर मिलन का उपाय सोचने लगा। एक दिन मेरा मित्र बन्धुपाल आपकी

अन्यदा बन्धुपालः शकुनैर्भवद्गतिं प्रेक्षिष्यमाणः पुरोपान्तविहारवनं मया सहोपेत्य कस्मिंश्चिन्महीरुहे शकुन्तवचनानि शृण्वन्नतिष्ठत् । (१३)

अहमुत्कलिकाविनोदपरायणो वनान्तरे परिभ्रमन्सरोवरतीरे चिन्ताक्रान्तचित्तां दीनवदनां मन्मनोरथैकभूमिं बालचन्द्रिकां व्यलोकयम् । (१४)

शकुनैः = मङ्गलचिन्हैः, भवद्गतिं = तव व्यापारम्, प्रेक्षिष्यमाणः = अवलोकयिष्यन्, पुरोपान्तविहारवनं = पुरस्य नगरस्य उपान्ते निकटे यद् विहारवनं क्रीडोद्यानम् तत्, मया = पुष्पोद्भवेन, सह = साकम्, उपेत्य = गत्वा, कस्मिंश्चित् = एकस्मिन्, महीरुहे = तरौ, शकुन्तवचनानि = पक्षिणः कलरवान्, शृण्वन् = आकर्णयन्, अतिष्ठत् = अवस्थितः अभूत् ॥ १३ ॥

अहम्··· ··· ···· ··· ···· ···· ··· ···व्यलोकयम् ॥ १४ ॥

प्रसङ्गः—पूर्वोक्त एव ।

व्याख्या—अहं = पुष्पोद्भवः, उत्कलिकाविनोदपरायणः = उत्कलिका उत्कण्ठा तस्याः अपनयनं दूरीकरणम् तस्मिन् परायणः संलग्नः, वनान्तरे = अरण्यान्तराले, परिभ्रमन् = पर्यटन्, सरोवरतीरे = सरः पुलिने, चिन्ताक्रान्तचित्तां= चिन्तया ध्यानेन आक्रान्तं व्याकुलं चित्तं मनो यस्याः सा ताम्, दीनवदनां = म्लानमुखीम्, मन्मनोरथैकभूमिम् मम पुष्पोद्भवस्य मनोरथस्य मनोकामस्य एका भूमिः आश्रयीभूता या ताम् तथोक्ताम्, बालचन्द्रिकाम् = प्रियाम्, व्यलोकयम् = दृष्टवान् ॥ १४ ॥

तस्याः··· ··· ··· ··· ··· ··· ··· कथय इति ॥ १५ ॥

प्रसङ्गः—पुष्पोद्भवः बालचन्द्रिकामेकान्तं लब्ध्वा किमकथयदिति तेन वर्ण्यते—

प्राप्ति के निमित्त शकुन जानने के लिए मेरे साथ वन में जाकर एक वृक्ष के नीचे खड़ा होकर पक्षियों की बोली सुनने लगा ॥ १३ ॥

मैं बालचन्द्रिका के विषय में उत्कण्ठित हुआ दूसरे वन में घूमने लगा। वहाँ एक सरोवर के किनारे चिन्तितावस्था में पड़ी अपनी अभिलाषा स्वरूपा खिन्न मानसा बालचन्द्रिका को देखा ॥ १४ ॥

तस्याः ससंभ्रमप्रेमलज्जाकौतुकमनोरमं लीलाविलोकनसुखमनुभवन् सुदत्या वदनारविन्दे विषण्णभावं मदनकदनखेदानुभूतं तन्निमित्तं ज्ञास्यंल्लीलया तदुपकण्ठमुपेत्यावोचम्—'सुमुखि, तव मुखारविन्दस्य दैन्यकारणं कथय' इति।
(१५)

सा रहस्यसंजातविश्रम्भतया विहाय लज्जाभये शनैरभाषत—'सौम्य,

व्याख्या—तस्याः = बालचन्द्रिकायाः, ससंभ्रमप्रेमलज्जाकौतुकमनोरमं = ससंभ्रमेण शीघ्रत्वया सह वर्तमानानि ससंभ्रमाणि प्रेम अनुरागश्च लज्जा संकोचश्च कौतुकञ्च औत्सुक्यञ्च, प्रेम-लज्जा-कौतुकानि ससंभ्रमाणि च तानि प्रेम-लज्जा-कौतुकानि तानि ससंभ्रमप्रेमलज्जाकौतुकानि, तैः मनोरमं = मनोमोहकम् तथोक्तम्, लीलाविलोकनसुखं = लीलया विलासेन यद् विलोकनं निरीक्षणम् तेन यत् सुखम् प्रमोदः तत् तथोक्तम्, अनुभवन् = मनसि विषयीकुर्वन्, सुदत्याः = सुदत्याः, वदनारविन्दे = मुखाम्बुजे, मदनकदनखेदानुभूतं = मदनस्य कामस्य यत् कदनं पीडनम् तस्य खेदेन क्लेशेन अनुभूतं विषयीकृतम्, विषण्णभावम् = मालिन्यवैभवम्, ज्ञात्वा = अनुनीय, तन्निमित्तं = मालिन्यहेतुम्, ज्ञास्यन् = अवगमयिष्यन्, लीलया = विलासेन, तदुपकण्ठं = तस्याः निकटम्, उपेत्य = यात्वा, अवोचम् = अवादिषम्, सुमुखि = सुन्दरि, तव = स्वकीयस्य, मुखारविन्दस्य = आस्यकमलस्य, दैन्यकारणं = विषण्णताहेतुम्, कथय = व्याहर, इति ॥ १५ ॥

सा... .... अभ्यगात् ॥ १६ ॥

प्रसङ्गः—पुष्पोद्भवेन पृष्टा सती बालचन्द्रिका किं कथितवतीति वर्ण्यते तेनैव—

व्याख्या—सा = बालचन्द्रिका, रहस्यसंजातविश्रम्भतया = रहस्ये गोप्य-

---

उस सुन्दर दाँतों वाली सुन्दरी बालचन्द्रिका के लज्जा एवं प्रेमयुक्त मधुमय अवलोकन का सुख लेता हुआ, उसके मुख पर विषाद एवं कामजनित खेद को जानकर, समीप पहुँच कर पूछा—'सुन्दरी ! अपने मुख के कुम्हलाने का कारण बताओ' ॥ १५ ॥

एकान्त होने से उसने लज्जा और भय छोड़कर धीरे से कहा—'भद्र !,

मानसारो मालवाधीश्वरो वार्धक्यस्य प्रबलतया निजनन्दनं दर्पसारमुज्जयिन्या-मभ्यषिञ्चत् । स कुमारः सप्तसागरपर्यन्तं महीमण्डलं पालयिष्यन्निजपैतृष्वस्रेया उद्दण्डकर्माणौ चण्डवर्मदारुवर्माणौ धरणीभरणे नियुज्य तपश्चरणाय राजराज-गिरिमभ्यगात् । (१६)

राज्यं सर्वमसपत्नं शासति चण्डवर्मणि दारुवर्मा मातुलाग्रजन्मनोः शासन-

---

वस्तुनि संजातः उत्पन्नः विश्रम्भः विश्वासः यस्याः सा तस्याः भावः तत्ता तया पूर्वोक्तया, लज्जाभये लज्जात्रपा च भयञ्च ते त्रपाभये, विहाय = हित्वा, शनैः = मन्दम् यथा स्यात्तथा, अभाषत = उक्तवती, सौम्य = भद्र, मालवाधीश्वरः = मालवेशः मानसारः, वार्धक्यस्य = जरावस्थायाः, प्रबलतया = आधिक्येन, निज-नन्दनं = स्वकीयं तनयम्, दर्पसारम् उज्जयिन्यां = राजधान्याम्, अभ्यषिञ्चत् = अभिषिक्तवान् । सः = दर्पसारः, कुमारः = राजपुत्रः, सप्तसागरपर्यन्तं = सप्त-समुद्रपर्यन्तम्, महीमण्डलं = भूमण्डलम्, पालयिष्यन् = शासन्, निजपैतृष्वस्रीयौ = स्वपितुः भगिन्याः पुत्रौ, उद्दण्डकर्माणौ = कुत्सितकर्माणौ, चण्डवर्मदारुवर्माणौ, धरणीभरणे = भूपालने, नियुज्य =निश्चित्य, तपश्चरणाय = तपःसाधयितुम्, राज-राजगिरिम् = राजराजस्य कुवेरस्य गिरिम् पर्वतम् कैलासम् अभ्यगात् = गत-वान् ।। १६ ।।

राज्यं··· ···· ···· ··· ···· ···· ···· ···दैन्यमगच्छम् ।। १७ ।।

प्रसङ्गः—बालचन्द्रिकया निवेदितं दैन्यकारणं पुष्पोद्भवः कथयति —

व्याख्या—असफलं = रिपुरहितम्, सर्वं = सम्पूर्णम्, राज्यं = देशम्, शासति = पालयति, चण्डवर्मणि = राजनि, दारुवर्मा = चण्डवर्मणः अनुजः, मातुलाग्र-

---

मालवेश्वर मानसार ने वृद्ध होने के कारण, अपने पुत्र को उज्जयिनी का युवराज बना दिया । वह युवराज कुमार सप्तसागर पृथ्वी के पालन का भार अपनी बूआ के उद्दण्ड लड़कों (चण्डवर्मा और दारुवर्मा) पर सौंप कर तपस्या करने के लिए कैलास पर्वत पर चला गया ।। १६ ।।

चण्डवर्मा शत्रुरहित राज्य का शासन करने लगा । उद्दण्ड दारुवर्मा अपने भाई तथा मामा की आज्ञा न मान कर परद्रव्य तथा परस्त्रीगमन आदि दुष्कर्म में

मतिक्रम्य पारदार्यपरद्रव्यापहरणादिदुष्कर्म कुर्वाणो मन्मथसमानस्य भवतो लावण्यात्तचित्तां मामेकदा विलोक्य कन्यादूषणदोषं दूरीकृत्य बलात्कारेण रन्तुमुद्युङ्क्ते । तच्चिन्तया दैन्यमगच्छम्' इति । (१७)

तस्या मनोगतम्, रागोद्रेकं मन्मनोरथसिद्ध्यन्तरायं च निशम्य वाष्पपूर्णलोचनां तामाश्वास्य दारुवर्मणो मरणोपायं च विचार्य बल्लभामवोचम् 'तरुणि,

---

जन्मनोः = दर्पसारचण्डवर्मणोः, शासनं = आदेशम्, अतिक्रम्य = उल्लंघ्य, पारदार्यपरद्रव्यापहरणादिदुष्कर्म = पारदार्यं परस्त्रीविमर्शः, परद्रव्यापहरणं = चौर्यम्, पारदार्यञ्च परद्रव्यापहरणञ्च पारदार्यपरद्रव्यापहरणे ते आदिनी यस्य तत् तथोक्तम्, दुष्कर्म = कुकार्यम्, कुर्वाणः = समाचरन्, मन्मथसमानस्य = कामदेवसदृशस्य, भवतः = पुष्पोद्भवस्य, लावण्यात्तचित्तां = लावण्येन सौन्दर्येण आत्तं अधीनीकृतं चित्तं मनः यस्याः सा ताम्, मां = वालचन्द्रिकाम्, एकदा = एकस्मिन् दिने, विलोक्य = दृष्ट्वा, कन्यादूषणदोषं = कन्यायाः अपरिणीतायाः दूषणं घर्षणमेव दोषः तम्, दूरीकृत्य = अपाकृत्य, बलात्कारेण = शक्तिप्रयोगेण, रन्तुं = कामक्रीडां कर्त्तुम्, उद्युंक्ते = उद्यतोऽस्ति । तच्चिन्तया = तन्निर्वेदेन, दैन्यं = मालिन्यम्, अगच्छम् = प्राप्तास्मि ॥ १७ ॥

तस्याः··· ···· ··· ··· ··· ···· ···· ···वाच्यः ॥ १८ ॥

प्रसङ्गः—वालचन्द्रिकायाः दैन्यकारणं श्रुत्वा पुष्पोद्भवः स्वता निर्दिष्ट मुपायं वर्णयन्नाह—

व्याख्या—तस्याः = वालचन्द्रिकायाः, मनोगतं = हृद्गतम्, रागोद्रेकं = प्रेमाङ्कुरणम्, मन्मनोरथसिद्ध्यन्तरायञ्च = मम पुष्पोद्भवस्य मनोरथस्य कामस्य सिद्धेः निष्पत्तेः अन्तरायं विघ्नञ्च, निशम्य = श्रुत्वा, वाष्पपूर्णलोचनां = अश्रुपूर्णनयनाम्, तां = वालचन्द्रिकाम्, आश्वस्य = सान्त्वयित्वा, दारुवर्मणः = चण्डवर्मणः कनिष्ठभ्रातुः, मरणोपायं = मृत्योः विधिञ्च, विचार्य = विमृश्य, वल्लभां = प्रेयसीम्,

---

प्रवृत्त हो गया । उसने एक दिन कामदेव सदृश सुन्दर आप पर अनुरक्त मेरे साथ बलात्कार करना चाहा । उसी की चिन्ता से मैं विकल हो रही हूँ ॥ १७ ॥

उस बालचन्द्रिका के मनोऽनुराग एवं अपने सम्मिलन में विघ्न सुनकर, मैंने

भवदभिलाषिणं दुष्टहृदयमेनं निहन्तुं मृदुरुपायः कश्चिन् मया चिन्त्यते । यक्षः कश्चिदधिष्ठाय बालचन्द्रिकां निवसति । तदाकारसंपदाशाशृङ्खलितहृदयो यः संबन्धयोग्यः साहसिको रतिमन्दिरे तं यक्षं निर्जित्य तया एकसखीसमेतया मृगाक्ष्या संलापामृतसुखमनुभूय कुशली निर्गमिष्यति, तेन चक्रवाकसंशयाकार-पयोधरा विवाहनीयेति सिद्धेनैकेनावादीति पुरजनस्य पुरतो भवदीयैः सत्य-

---

बालचन्द्रिकाम्, अवोचम् = अवदम्, तरुणि = प्रिये, भवदभिलाषिणं = त्वत्काम-नापरम्, दुष्टहृदयं = दुर्जनम्, एनं = दारुवर्माणम्, निहन्तुं = मर्त्तुम्, कश्चित् = एकः, मृदुः = सरलः, उपायः = विधिः, मया = पुष्पोद्भवेन, चिन्त्यते = विचार्यते । बालचन्द्रिकां = तन्नाम्नीं तरुणीम्, अधिष्ठाय = समाक्रम्य, कश्चित् = एकः, यक्षः = पिशाचः प्रेतो वा, निवसति = वर्तते । तदाकारसम्पदाशाशृंखलितहृदयः = तस्याः बालचन्द्रिकायाः आकार सम्पदः स्वरूपस्य आशया वाञ्छया शृंखलितं बद्धं हृदयं यस्य सः तथोक्तः, यः कश्चित्, सम्बन्धयोग्यः = रमणयोग्यः, साहसिकः = सामर्थ्यसम्पन्नः, रतिमन्दिरे = केलिगृहे, तं = बालचन्द्रिकाधिष्ठितम्, यक्षं = पिशाचम्, निर्जित्य = व्यापाद्य, एकसखीसमेतया = एकया एकमात्रया सख्या वयस्यया समेतया सहितया, तया, मृगाक्ष्या = हरिणनयनया संलापामृतसुखं = आलापसुधानन्दम्, अनुभूय = प्राप्त्वा, कुशली = अक्षतदेहः, निर्गमिष्यति, तेन = वीरपुरुषेण, चक्रवाकसंशयाकारपयोधरा = चक्रवाकस्य पक्षिविशेषस्य संशयः सन्देहः यस्मिन् तादृशः आकारः आकृतिः ययोः तादृशौ पयोधरौ स्तनौ यस्याः सा तथोक्ता (बालचन्द्रिका) विवाहनीया = परिग्रहक्षमा, इति = एवम्, एकेन = केनचित्, सिद्धेन = तपस्विना, अवादि = उक्तम्, इति, पुरजनस्य = ग्रामनिवासिनः, पुरतः = समक्षम्. भवदीयैः = त्वत्पक्षसमर्थकैः, सत्यवाक्यैः = प्रामाणिकैः,

---

दारुवर्मा के मरण का उपाय शोचकर चन्द्रमुखी प्रिया से कहा—'प्रिये, तुम्हारे लिए लालायित दुष्टात्मा दारुवर्मा के मरण का मैंने एक उपाय सोचा है। वह यह कि तुम प्रामाणिक लोगों से यह अफवाह फैला दो कि 'बालचन्द्रिका के ऊपर एक पिशाच रहता है। जो कोई साहसी पुरुष एक सखी से युक्त उस मृगाक्षी के साथ रतिमन्दिर में उससे बात करके सकुशल निकल आएगा उसी के साथ

वाक्यैर्जनैरसकृत् कथनीयम् । तदनु दारुवर्मा वाक्यानीत्थंविधानि श्रावंश्रावं तूष्णीं यदि भिया स्थास्यति तर्हि वरम्, यदि वा दौर्जन्येन त्वया संगमंगीकरिष्यति, तदा स भवदीयैरित्थं वाच्यः—

'सौम्य, दर्पसारवसुधाधिपामात्यस्य भवतोऽस्मन्निवासे साहसकरणमनुचितम् । पौरजनसाक्षिकभवन्मन्दिरमानीतया अनया तोयजाक्ष्या सह क्रीडन्नायुष्मान्

जनैः = मनुष्यैः, असकृत् = मुहुर्मुहुः, कथनीयम् = प्रचारणीयम् । तदनु = तत्पश्चात्, दारुवर्मा, इत्थंविधानि = पुष्पोद्भवेनउपायरूपेणनिर्दिष्टानि, वाक्यानि = वचनानि, श्रावं-श्रावम् = श्रुत्वा-श्रुत्वा, यदि, भिया = भयेन, तूष्णीं = मौनम्, स्थास्यति = भविष्यति, तर्हि = तु, वरम् = उचितम् अस्ति, यदि वा, अथवा, दौर्जन्येन = दुष्टतया, त्वया = बालचन्द्रिकया, सह = साकम्, संगमं = अनुरक्तिम्, अंगीकरिष्यति = आचरिष्यति, तदा, सः = दारुवर्मा = दर्पसारभागिनेयः, भवदीयैः = त्वदीयैः, इत्थं = वक्ष्यमाणप्रकारेण, वाच्यः = कथनीयः ।। १८ ।।

सौम्य ... ... मह्यम् इति ।। १९ ।।

प्रसङ्गः—पुष्पोद्भवो बालचन्द्रिकायै स्वता निर्दिष्टं कथनोपायं राजहंसं श्रावयतिः—

व्याख्या—सौम्य ! = भद्र !, दर्पसारवसुधाधिपामात्यस्य = दर्पसारश्चासौ वसुधाधिपश्चेति दर्पसारवसुधाधिपः तस्य अमात्यस्य = मन्त्रिणः, भवतः = तव, अस्मन्निवासे = अस्मद्भवने, साहसकरणं = साहसकर्माचरणम्, अनुचितम् = निन्द्यम्, पौरजनसाक्षिकम् = पौरजनाः नगरनिवासिनः साक्षिणः प्रत्यक्षदर्शिनः यस्मिन् तत् तथोक्तम्, पौराणां समक्षम्, भवन्मन्दिरं = तव गृहम्, आनीतया = प्रापया, अनया, तोयजाक्ष्या = तोयजे कमले इव अक्षिणी नयने यस्याः सा तया, सह = साकम्, क्रीडन् = केलिं कुर्वन्; यदि = चेत्, आयुष्मान् = दीर्घजीवी,

---

उसका विवाह होगा ।' ऐसा एक तपस्वी ने कहा है । यह सुनकर यदि दारुवर्मा डर जाता है तो ठीक है, अन्यथा संगम के लिए उत्सुक उससे तुम्हारे आत्मीयजन ऐसा कहें ।। १८ ।।

'हे सौम्य !, दर्पसार राजा के मन्त्री आपका हमारे घर में इस प्रकार का

यदि भविष्यति तदा परिणीय तरुणीं मनोरथान् निर्विश' इति। सोऽप्येतदङ्गीकरिष्यति। त्वं सखीवेषधारिणा मया सह तस्य मन्दिरं गच्छ। अहमेकान्तनिकेतने मुष्टिजानुपादाघातैस्तं रभसान्निहत्य पुनरपि वयस्यामिषेण भवतीमनु निःशंकं निर्गमिष्यामि। तदेनमुपायमङ्गीकृत्य विगतसाध्वसलज्जा भवज्जनकजननीसहोदराणां पुरत आवयोः प्रेमातिशयमाख्याय सर्वथास्मत्परिणयकरणे

भवान्, भविष्यति = स्थास्यति, तदा = तर्हि; तरुणीम् = युवतीम्, परिणीय = विवाह्य, मनोरथान् = मनोकामान्, निर्विश = लभस्व, इति। सोऽपि = दारुवर्मापि, एतत् = नागरैः कथितम्, यदि, अंगीकरिष्यति = स्वीकरिष्यति, तदा, त्वम् = बालचन्द्रिका, सखीवेषधारिणा = सहचरीरूपिणा, मया = पुष्पोद्भवेन, सह = साकम्, तस्य = दारुवर्मणः, मन्दिरं = गृहम्, गच्छ = याहि। अहं = पुष्पोद्भवः, एकान्तनिकेतने = शून्यभवने, मुष्टिजानुपादाघातैः = मुष्टिजानुपादानां प्रहारैः, रभसात् = शीघ्रतापूर्वकम्, तं दारुवर्माणम्, निहत्य = व्यापाद्य, पुनरपि = भूयोऽपि, वयस्यामिषेण = सहचरीव्याजेन, भवतीं = त्वाम्, अनु = पश्चात्, निःशंकम् = निर्भयम्, निर्गमिष्यामि = निःसरणं करिष्यामि। तदेनम् = तदमुम्, उपायं = विधिम्, अंगीकृत्य = स्वीकृत्य, विगतसाध्वसलज्जा = विगते साध्वसलज्जे भयत्रपे यस्याः सा तथाभूता, सा = त्वम्, भवज्जनकजननीसहोदराणां = तव पितामाताबन्धूनाम्, पुरतः = समक्षम्, आवयोः = मम तव च, प्रेमातिशयम् = प्रीत्याधिक्यम्, आख्याय = उक्त्वा, सर्वथा = सर्वप्रकारेण, अस्मत्परिणयकरणे = आवयोः पाणिग्रहणे, तान् = जनकादीन्, अनुनयैः = अनुसाधयैः, तेऽपि

दुस्साहस करना ठीक नहीं है। नागरिकों के सामने आप इस पङ्कजाक्षी को अपने घर ले जायं। वहाँ यदि आप सकुशल रहें तो इसके साथ विवाह करके सुख भोगें! वह यह स्वीकार कर लेगा। तुम सखी वेशधारी मेरे साथ उसके घर जाना। मैं लात-घूसों से उसे मार कर तुम्हारे साथ निकल आऊँगा। फिर तुम इन बातों को, अपने माता-पिता तथा भाइयों से बतलाकर, अपना प्रेम बतलाना और मुझसे विवाह करने के लिए उन्हें राजी करना। तुम्हारे गुरुजन वंश आदि की दृष्टि से योग्य मेरे साथ विवाह कर देंगे। अच्छा, अब जाओ? दारुवर्मा के

तानुनुनयेः । तेऽपि वंशसंपल्लावण्याढ्याय यूने मह्यं त्वां दास्यन्त्येव । दारुवर्मणो मारणोपायं तेभ्यः कथयित्वा तेषामुत्तरमाख्येयं मह्यम्' इति । (१९)

सापि किञ्चिदुत्फुल्लसरसिजानना मामब्रवीत्—'सुभग, क्रूरकर्माणं दारुवर्माणं भवानेव हन्तुमर्हति । तस्मिन् हते सर्वथा युष्मन्मनोरथः फलिष्यति । एवं क्रियताम् । भवदुक्तं सर्वमहमपि तथा करिष्ये' इति मामसकृद्विवृत्तवदना-

= जनकादयोऽपि, वंशसम्पल्लावण्याढ्याय = वंशसम्पदा कुलगौरवेण, लावण्येन सौन्दर्येण आढ्याय युक्ताय, यूने = तरुणाय, मह्यं = पुष्पोद्भवाय, त्वां = बालचन्द्रिकाम्, दास्यन्ति = समर्पयिष्यन्ति, एव । इत्थम् दारुवर्मणः = दर्पसारभागिनेयस्य, मारणोपायं = वधसाधनम्, तेभ्यः = पित्रादिभ्यः, कथयित्वा = व्याहृत्य, तेषां = पित्रादीनाम्, उत्तरं = प्रतिवाक्यम्, मह्यं पुष्पोद्भवाय आख्येयम् = श्रावणीयम्, इति ॥ १९ ॥

साऽपि ·· ···· ···· ···· ··· ··· ···· विससर्ज ॥ २० ॥

प्रसङ्गः— पुष्पोद्भवः तस्योपायं श्रुत्वा बालचन्द्रिका किमब्रवीदिति कथयतिः -

व्याख्या—साऽपि = बालचन्द्रिकाऽपि, किञ्चित् = स्वल्पम्, उत्फुल्लसरसिजानना = उत्फुल्लं विकचं सरसिजं पुण्डरीकमिव आननं मुखम् यस्याः सा, मां = पुष्पोद्भवम्, अब्रवीत् = अवादीत्, सुभग ! सौम्य !, क्रूरकर्माणं = कुटिलम्, दारुवर्माणम्, भवानेव = त्वमेव, हन्तुं = मारयितुम्, अर्हति = क्षमोऽस्ति । तस्मिन् = दारुवर्मणि, हते = पञ्चत्वं गते, सर्वथा = सर्वप्रकारेण, युष्मन्मनोरथः= तव अभिलाषः, फलिष्यति = सिद्धो भविष्यति । एवं = यथोक्तम्, क्रियताम् = समाचरतु । भवदुक्तं = त्वत्कथितम्, सर्वम् = सम्पूर्णम्, अहमपि = बालचन्द्रिकाऽपि, तथा = तेनैव प्रकारेण, करिष्ये = विधास्यामि, इत्युक्त्वा, विवृत्तवदना

मरण का उपाय अपने घरवालों से बतलाकर उनका उत्तर मुझसे कहना ॥ १९ ॥

मेरी बातें सुन कर प्रफुल्लित भुवाली बालचन्द्रिका ने कहा—'हे सुभग !, क्रूरकर्मा दारुवर्मा को मारने में आप ही समर्थ हैं ।' उसके मर जाने पर आपका सारा मनोरथ पूर्ण हो जायगा । आप ऐसा ही करें । मैं भी आपका आदेश पालन

विलोकयन्ती मन्दं मन्दमगारमगात् । अहमपि बन्धुपालमुपेत्य शकुनज्ञात्तस्मात् 'त्रिंशद्दिवसानन्तरमेव भवत्सङ्गः संभविष्यति इत्यश्रृणवम् । तदनु मदनुगम्यमानो बन्धुपालो निजावासं प्रविश्य मामपि निलयाय विससर्ज । (२०)

मन्मायोपायवागुरापाशलग्नेन दारुवर्मणा रतिमन्दिरे रन्तुं समाहूता बालचन्द्रिका तं गमिष्यन्ती दूतिकां मन्निकटमभिप्रेषितवती । अहमपि मणिनूपुर-

---

= विवृत्तं परावृत्तं वदनं मुखम् यस्याः, सा, असकृत् = भूयोभूयः, मां = पुष्पोद्भवम्, विलोकयन्ती = पश्यन्ती, मन्दं मन्दं = शनैः शनैः, अगारम् = स्वगृहम्, अगात् = गतवती । अहमपि = पुष्पोद्भवोऽपि, बन्धुपालं = चन्द्रपालजनकम्, उपेत्य = गत्वा, शकुनज्ञात् = निमित्तज्ञानदक्षात्, तस्मात् = बन्धुपालात् त्रिंशद्दिवसानन्तरमेव = एकमासादूर्ध्वमेव, भवत्संगः = तव राजवाहनस्य च सम्मेलनम्, संभविष्यति = भविष्यति, इति = एवम्, अश्रृणवम् = अश्रौषम् । तदनु = तदनन्तरम्, मदनुगम्यमानः = मया अनुष्ठीयमानः, बन्धुपालः = शकुनवक्ता चन्द्रपालजनकः, निजावासं = स्वभवनम्, प्रविश्य = गत्वा, मामपि = पुष्पोद्भवमपि, निलयाय = भवनाय, विससर्ज = विसर्जितं कृतवान् ॥ २० ॥

मन्मायोपाय... ... ...अगच्छम् ॥ २१ ॥

प्रसङ्गः—पुनः ताभ्यां किम् कृतमिति पुष्पोद्भवेन वर्ण्यते—

व्याख्या — मन्मायोपायवागुरापाशलग्नेन = मम पुष्पोद्भवस्य मायया कपटेन यः उपायः विधिः स एव, वागुरा = मृगबन्धिनी तद्रूपः यः पाशः बन्धनम् तस्मिन् लग्नः निबद्धः तेन तथोक्तेन, दारुवर्मणा = दर्पसारभागिनेयेन, रतिमन्दिरे = केलिगृहे, रन्तुं = क्रीडितुम्, समाहूता = आकारिता, बालचन्द्रिका, तं = दारुवर्माणम्, गमिष्यन्ती = प्रस्थास्यमाना, मन्निकटं = मत्पार्श्वे, दूतिकां = चेटिकाम्, अभि-

---

करूँगी । ऐसा कह कर वह उत्सुक आँखों से बार-बार घूम-घूमकर मुझे देखती हुई अपने घर चली गई । मैंने भी, बन्धुपाल के पास आकर उसका शकुन—'एक मास के बाद ही आप मिलेंगे, सुना । पश्चात्, मुझसे अनुगत बन्धुपाल ने, घर पहुंच कर, मुझे भी घर जाने की अनुमति दे दी ॥ २० ॥

मेरे युक्तिरूपी मायाजाल में फँसे दारुवर्मा के द्वारा रमण करने हेतु रति-

मेखलाकंकणकटकताटंकहारक्षौमकज्जलं वनितायोग्यं मण्डनजातं निपुणतया तत्तत्स्थानेषु निक्षिप्य सम्यगङ्गीकृतमनोज्ञवेशो बल्लभया तया सह तदागाऽरद्वारोपान्तमगच्छम्। (२१)

द्वाःस्थकथितास्मदागमनेन सादरं विहिताभ्युद्गतिना तेन द्वारोपान्तनिवारिताशेषपरिवारेण मदन्विता बालचन्द्रिका संकेतागारमनीयत। नगरव्याकुलां

प्रेषितवती = प्राहिणोत्। अहमपि = पुष्पोद्भवोऽपि, मणिनूपुरः = मञ्जीरः, मेखला = रसना, कंकणकटके = वलयभेदौ, ताटंकं = श्रवणाभूषणम्, हारः = मुक्ताहारः, क्षौमं = दुकूलम्, कज्जलं = अञ्जनम्, चेति, वनितायोग्यं = स्त्रीजनानुकूलम्, मण्डनजातं = आभूषणसमूहम्, निपुणतया = कौशलेन, तत्तत्स्थानेषु = तत्तदवयवेषु, निक्षिप्य = परिधाय, सम्यक् = सर्वप्रकारेण, अंगीकृतः धृतः मनोज्ञः सुन्दरः वेषः प्रसाधनम् येन सः तथोक्तः, अहम्, वल्लभया = मदनुरक्तया तया बालचन्द्रिकया, सह = साकम्, तदागारद्वारोपान्तं = तस्य दारुवर्मणः आगारस्य भवनस्य द्वारस्य उपान्तं समीपम्, अगच्छम् = अगमम्॥ २१॥

द्वाःस्थ··· ··· ··· ···· ··· ··· ··· ···अगमत्॥ २२॥

प्रसङ्गः—पुष्पोद्भवः सखीवेषः बालचन्द्रिकया सह कथमगच्छत् दारुवर्मणः गृहमिति तेनैव कथ्यते—

व्याख्या—द्वाःस्थकथितास्मदागमनेन = द्वास्थैः द्वाररक्षकैः कथितं श्रावितम् अस्मदागमनं अस्मदुपस्थितिः यस्मै सः तेन तथोक्तेन, सादरं = सबहुमानम्, विहिता = कृता, अभ्युदगतिः = अभ्युत्थानं येन सः तेन तथोक्तेन, तेन = दारुवर्मणा, द्वारोपान्ते = द्वारनिकटे, निवारिताः निरुद्धाः अशेषाः निखिलाः परिवाराः परिचारिकाः येन सः तेन तथोक्तेन, मदन्विता = मया सहिता, बालचन्द्रिका, संकेतागारं = केलिभवनम्, अनीयत = नीता। नगरव्याकुलां = नगरं पुरे व्याकुलां

मन्दिर में आहूत बालचन्द्रिका ने मेरे पास अपनी एक दासी भेजी। समाचार सुनकर मैं भी अपने प्रत्येक अंग में स्त्रियोचित अलङ्कारादि से शृङ्गार करके सुन्दर वेश में प्रियाबालचन्द्रिका के साथ दारुवर्मा के द्वार पर पहुँच गया॥ २१॥

द्वारपाल के द्वारा सूचना प्राप्त करके दारुवर्मा स्वयं आकर हम दोनों को

यक्षकथां परीक्षमाणो नागरिकजनोऽपि कुतूहलेन दारुवर्मणः प्रतीहारभूमिमगमत् । (२२)

विवेकशून्यमतिरसौ रागातिरेकेण रत्नखचितहेमपर्यंके हंसतूलगर्भशयनमानीय तरुणीं तस्यै मह्यं तमिस्रासम्यगनवलोकितपुंभावाय मनोरमस्त्रीवेशाय च चामीकरमणिमण्डनानि सूक्ष्माणि चित्रवस्त्राणि कस्तूरिकामिलितं हरिचन्दनं

प्रचारिताम्, यक्षकथां = पिशाचवृत्तान्तम्, परीक्षमाणः = प्रतीक्षमाणः, नागरिकजनः = नगरनिवासिसमूहः, अपि, कुतूहलेन = कौतुकेन, दारुवर्मणः = दर्पसारभागिनेयस्य, प्रतीहारभूमिम् = द्वारदेशम्, अगमत् = अगच्छत्, एकत्रिता अभूत् ॥ २२ ॥

विवेकशून्यमतिः···· ···· ··· ···· ··· ··· ···अतिष्ठत् ॥ २३ ॥

प्रसंगः—बालचन्द्रिकां प्राप्य दारुवर्मणा कथमाचरितमिति पुष्पोद्भवेन वर्ण्यते—

व्याख्या—विवेकशून्यमतिः = विवेकेन तत्त्वनिर्णयेन शून्या रहिता मतिः बुद्धिः यस्यासौ = दारुवर्मा, रागातिरेकेन = प्रेमातिशयेन, रत्नखचितहेमपर्यंके = रत्नैः मणिभिः खचिते स्यूते हेम्नः सुवर्णस्य पर्यंके तल्पे, हंसतूलगर्भशयनं = हंसेन तुल्यः उज्ज्वलः हंसवत् शुभ्रः, हंसतूलः सः गर्भे मध्ये यस्य तादृशं शयनं पर्यंकम्, तरुणीं = युवतीम्, बालचन्द्रिकाम्, आनीय = उपस्थाप्य, तस्यै = तरुण्यै, तमिस्रासम्यगनवलोकितपुंभावाय = तमिस्रायां तमसि, सम्यक् = स्पष्टम्, अनवलोकितः अदृष्टः पुंभावः पुरुषभावो यस्य सः तस्मै तथोक्ताय, मनोरमस्त्रीवेषाय = मनोरमः मनोज्ञः स्त्रीवेषः नारीजनोचित प्रसाधनम् यस्य सः तस्मै, मह्यं = पुष्पोद्भवाय, च, चामीकरमणिमयमण्डनानि = चामीकरं सुवर्णम्, मणिः रत्नञ्च, ताभ्यां प्रचुराणि, मण्डनानि = आभूषणानि, सूक्ष्माणि = श्लक्ष्णानि, चित्रवस्त्राणि

संकेतागार में ले गया । बालचन्द्रिका के ऊपर रहनेवाले यक्ष का प्रभाव देखने के लिए भारी संख्या में नागरिक भी दारुवर्मा के दरवाजे पर आकर एकत्र हो गये ॥ २२ ॥

विवेकशून्य दारुवर्मा रागातिरेक के कारण रत्नजड़ित पलंग पर बिछे स्वच्छ

कर्पूरसहितं ताम्बूलं सुरभीणि कुसुमानीत्यादिवस्तुजातं समर्प्य मुहूर्तद्वयमात्रं हासवचनैः संलपन्नतिष्ठत्। (२३)

ततो रागान्धतया सुमुखीकुचग्रहणे मतिं व्यधत्त। रोषारुणितोऽहमेनं पर्यंकतलान्निःशंको निपात्य मुष्टिजानुपादघातैः प्राहरम्। नियुद्धरभसविकलालंकारं पूर्ववन्मेलयित्वा भयकम्पितां नताङ्गीमुपलालयन्मन्दिराङ्गणमुपेतः साध्व-

---

= साटिकावस्त्राणि, कस्तूरिकामिलितं = मृगमदामोदितन्, हरिचन्दनं = मलयचन्दनम्, कर्पूरसहितं = घनसारयुक्तम्, ताम्बूलं = नागवेलिम्, सुरभीणि = सुगन्धीनि, कुसुमानि = पुष्पाणि, इत्यादि, वस्तुजातं = सामग्रीसंकलनम्, समर्प्य = उपायनीकृत्य, मुहूर्तद्वयमात्रम् = चतुर्विंशतिक्षणपर्यन्तम्, हासवचनैः = परिहासवार्ताभिः संलपन् = भाषमाणः, अतिष्ठत् = वर्तते स्म ॥ २३ ॥

विशेषः—अत्र शृंगारो रसः आस्वाद्यते ।

ततः ... . पश्यतेमम् इति ॥ २४ ॥

प्रसङ्गः—बालचन्द्रिकादारुवर्मणोः मिथः मिलनं वर्णयन्नाह पुष्पोद्भवः—

व्याख्या—ततः = तदनन्तरम्, रागान्धतया = कामभावनोद्दामतया, सुमुखीकुचग्रहणे =सुमुख्याः सुन्दर्याः कुचयोः उरोजयोः ग्रहणे = मर्दने, मति = मनाः, व्यधत्त = कृतवान्, रोषारुणितः = क्रोधेन आरक्तः, अहं = पुष्पोद्भवः, एनं = दारुवर्माणम्, पर्यङ्कतलात् = शय्यातलात्, निःशङ्कः = निर्भयः, निपात्य = बलादवतार्य, मुष्टिजानुपादाघातैः = घातकर्तृणां अङ्गानां आघातैः = प्रहारैः, प्राहरम्= ताडितवान्। नियुद्धरभसविकलं = नियुद्धे = मल्लयुद्धे यः रभसः वेगः तेन विकलं व्यत्यस्तम्, अलङ्कारं = मण्डनम्, पूर्ववत् = प्राग्वत्, मेलयित्वा = सुनियोज्य, भयकम्पितां = युद्धभयेन वेपमानाम्, नताङ्गीम् = विनतावयवाम्

गद्दे पर बालचन्द्रिका को बिठा कर उसे एवं स्त्री वेशधारी मुझे सुन्दर-सुन्दर आभूषण, वस्त्र एवं पान देकर दो घड़ी तक प्रेमालाप करते हुए बैठा रहा ॥२३॥

उसके बाद दारुवर्मा ने प्रेमोन्मत्त होकर बालचन्द्रिका के स्तन को पकड़ना चाहा। यह देख कर मैं तत्काल क्रुद्ध हो गया और निर्भयतापूर्वक उसे पलंग से नीचे गिराकर लात-घूसों से मार-मारकर निष्प्राण कर दिया। दारुवर्मा के साथ

सकम्पित इवोच्चैरकूजमहम्—'हा, बालचन्द्रिकाधिष्ठितेन घोराकारेण यक्षेण दारुवर्मा निहन्यते। सहसा समागच्छत। पश्यतेमम् इति। (२४)

तदाकर्ण्य मिलिता जना समुद्यद्बाष्पा हाहानिदानेन दिशो बधिरयन्तः बालचन्द्रिकामधिष्ठितं यक्षं बलवन्तं शृण्वन्नपि दारुवर्मा मदान्धस्तामेवायाचत।

बालचन्द्रिकाम्, उपलालयन् समाश्वासयन्, मन्दिराङ्गणम् = गृहस्य चत्वरम्, उपेतः = अवस्थितः, साध्वसकम्पितः = भयेन वेपमानः, इव, नहि यथार्थः, अहं = पुष्पोद्भवः, उच्चैः = उच्चैस्वरैः, अकूजम् = अस्पष्टस्वरम् अकार्षम्'—हा ! कष्टम् ?, बालचन्द्रिकाधिष्ठितेन = बालचन्द्रिकामाक्रम्य स्थितेन, घोराकारेण = भयङ्करेण स्वरूपेण यक्षेण = पिशाचेन, दारुवर्मा = दर्पसारभागिनेयः निहन्यते = निःशेषेण ताड्यते,। सहसा = शीघ्रम्, समागच्छत = आयात, इमम् = दारुवर्माणम्, पश्यत = विलोकयत, इति ॥ २४ ॥

तदाकर्ण्य ·· ··· ··· ··· ···· ······निवासमगात् ॥ २५ ॥

प्रसङ्गः—पुष्पोद्भवः क्रन्दनम् श्रुत्वा आगतानां जनानां वृत्तम् वर्णयन्नाहः—

व्याख्या—तत् = मम क्रन्दनम्, आकर्ण्य = श्रुत्वा, मिलिताः = तत्र एकत्रीभूताः, जनाः = मनुष्याः, समुद्यद्बाष्पाः = समुद्यत् नेत्राभ्यां पतितुं उच्छलत् बाष्पं अश्रु येषां ते, हा-हा निनादेन = हा-हा इति कोलाहलेन, दिशः = काष्ठाः, बधिरयन्तः = पूरयन्तः बालचन्द्रिकाम्, अधिष्ठितम् = आक्रम्य स्थितम्, बलवन्तं = शक्तिशालिनम्, यक्षं = पिशाचम्, शृण्वन् = आकर्णयन्, अपि, मदान्धा = कामान्धः, दारुवर्मा, तामेव = बालचन्द्रिकामेव, अयाचत = अभ्यलषत्। तदसौ

लड़ाई करने से इधर-उधर खिसके हुए अपने आभूषणों को ठीक-ठाक करके भयभीत बालचन्द्रिका को आश्वस्त करता हुआ स्वयं भय से काँपते हुए आँगन में आकर उच्च स्वर में कह उठा—बालचन्द्रिका के शिर पर रहनेवाले पिशाच ने दारुवर्मा को मार डाला ! हाय ! आप लोग शीघ्र आकर देखिए ! ॥ २४ ॥

मेरी आवाज सुनकर आँसू बहाते और हाय ! हाय ! करते हुए लोग वहाँ जुटकर कहने लगे—बालचन्द्रिका के ऊपर आरूढ़ पिशाच की कथा सुनकर भी दारुवर्मा उसी को पाना चाहा। अतः अपने ही कर्म से मारा गया है। उसके लिए

तदसौ स्वकीयेन कर्मणा निहतः। 'किं तस्य विलापेन' इति मिथो लपन्तः प्राविशन्। कोलाहले तस्मिश्चटुललोचनया सह नैपुण्येन सहसा निर्गतो निजामप्यनुवासमगाम्। (२५)

ततो गतेषु कतिपयदिनेषु पौरजनसमक्षं सिद्धादेशप्रकारेण विवाह्य तामिन्दुमुखीं पूर्वसंकल्पितान् सुरतविशेषान् यथेष्टमन्वभूवम्। बन्धुपालशकुननिर्दिष्टे दिवसेऽस्मिन्निर्गत्य पुराद्बहिर्वर्तमानो नेत्रोत्सवकारि भवदवलोकनसुख-

---

= दारुवर्मा, स्वकीयेन = निजेन, कर्मणा = आचरणेन, निहतः = व्यापादितः। तस्य = दारुवर्मणः मृत्योः कृते, विलापेन = रोदनेन, किम् प्रयोजनम्, इति = एवम्, मिथः = परस्परम्, लपन्तः = वदन्तः, प्राविशन् = प्राङ्गणे अगच्छन्, कोलाहले = कलकले, चटुललोचनया = चपलनेत्रया, बालचन्द्रिकया, सह = साकम्, नैपुण्येन = कौशलेन, सहसा = शीघ्रम्, निर्गतः = निःसृतः अहम्, निजावासम = स्वभवनम्, अगाम् = गतवान्॥ २५॥

ततः... ... ...अनुभवामि इति॥ २६॥

प्रसङ्गः—पुष्पोद्भवः बालचन्द्रिकया सह स्वपरिणयं वर्णयन्नाह—

व्याख्या—ततः = तद् घटनायाः अनन्तरम्, गतेषु = अतीतेषु, कतिपयदिनेषु = कतिचिद्दिवसेषु, पौरजनसमक्षं = नगरनिवासिनां सम्मुखे, सिद्धादेशप्रकारेण = तपस्विनः आज्ञानुसारेण, तां = पूर्ववर्णिताम्, इन्दुमुखीं = बालचन्द्रिकाम् सुन्दरीम्, विवाह्य = परिणीय, पूर्वसंकल्पितान् = विवाहात्प्राक् मनसि कल्पितान्, सुरतविशेषान् = रतिक्रीडासुखम्, यथेष्टम् = यथेच्छम्, अन्वभूवम् = अनुभूतवान्। बन्धुपालशकुननिर्दिष्टे = चन्दपालपितुः मङ्गलसूचकेन व्याहृते, अस्मिन्नेव = अद्यैव, दिने = दिवसे, पुरात् = नगरात्, निर्गत्य = निःसृत्य, बहिः = बाह्य-

---

रोने से क्या लाभ? उस शोर गुल में ही चपलनयना सुन्दरी के साथ निकलकर मैं अपने घर चला गया॥ २५॥

उसके बाद कुछ दिन बीतने पर, मैं नागरिकों के समक्ष, सिद्ध के कथनानुसार, बालचन्द्रिका से विवाह कर के जी भर सुरत सुख भोगने लगा। बन्धुपाल के कहे हुए शकुन के अनुसार आज नगर के बाहर आकर नेत्रोत्सव स्वरूप आप के सम्मि-

भवामि इति । (२६)

एवं मित्रवृत्तान्तं निशम्याम्लानमानसो राजवाहनः स्वस्य च सोमदत्तस्य च वृत्तान्तमस्मै निवेद्य सोमदत्तं 'महाकालेश्वराराधनानन्तरं भवद्वल्लभां सपरिवारां निजकटकं प्रापय्यागच्छ' इति नियुज्य पुष्पोद्भवेन सेव्यमानो भूस्वर्गायमानमवन्तिकापुरं विवेश । तत्र 'अयं मम स्वामिकुमारः' इति बन्धुपालादये बन्धुजनाय

प्रदेशे, वर्तमानः = उपस्थितः सन्, नेत्रोत्सवकारि = नयनामोदजनकम्, भवदवलोकनसुखं = भवतः राजवाहनस्य अवलोकनेन दर्शनेन सुखम् आनन्दम्, अपि, अनुभवामि = विषयीकरोमि ॥ २६ ॥

एवम् ·· ··· ··· ···· ··· ···· ··· ···कारयामास ॥ २७ ॥

प्रसङ्गः—पुष्पोद्भवेन कथितं सर्वं वृत्तान्तं श्रुत्वा राजवाहनः किमकरोदिति कविना वर्ण्यते :—

व्याख्या--एवं = पूर्वोक्तप्रकारम्, मित्रवृत्तान्तं = सखा पद्मोद्भवस्य वृत्तम्, निशम्य = आकर्ण्य, अम्लानमानसः = प्रसन्नचित्तः, राजवाहनः = राजहंससुतः, स्वस्य = निजस्य, सोमदत्तस्य च, वृत्तान्तं= समाचारम् अस्मै = पुष्पोद्भवाय, निवेद्य = व्याहृत्य, महाकालेश्वराराधनानन्तरम्= महाकालस्य उज्जयिनीस्थितस्य शंकरस्य आराधनं पूजनम् तस्य अनन्तरं पश्चात्, भवद्वल्लभां भवदीयां वल्लभां = प्रेयसीम्, सपरिवाराम् = सेवकसमूहसहिताम्, निजकटकं = स्वसेनाशिविरम्, प्रापय्य = संगमय्य, आगच्छ = आगम्यताम्, इति = एवम्, सोमदत्तम् नियुज्य = समादिश्य, पुष्पोद्भवेन = पुष्पोद्भवनाम्ना मित्रेण, सेव्यमानः = आराध्यमानः, भूस्वर्गायमानं = पृथ्वीस्वर्गसदृशम्, अवन्तिकापुरं = उज्जयिनी नगरम्, विवेश = प्रविष्टः । तत्र = उज्जयिन्याम्, अयं = असौ, मम = पुष्पोद्भवस्य, स्वामिकुमारः = राज्ञः सुतः, इति = एवम्, बन्धुपालादये = बन्धुपालप्रभृतये,

---

लन का भी आनन्द पा रहा हूँ ॥ २६ ॥

इस प्रकार अपने मित्र पुष्पोद्भव की जीवन कथा सुनकर प्रसन्न हृदय राजवाहन ने, अपना और सोमदत्त का वृत्तान्त सुनाकर, महाकाल की आराधना के बाद सेवकों सहित अपनी धर्मपत्नी को शिविर में पहुँचाकर आओ, ऐसा सोमदत्त

कथयित्वा तेन राजवाहनाय बहुविधां सपर्यां कारयन् सकलकलाकुशलो महीसुरवर इति पुरि प्रकटयन् पुष्पोद्भवोऽमुष्य राज्ञो मज्जनभोजनादिकमनुदिनं स्वमन्दिरे कारयामास । (२७)

इति श्रीदण्डिनः कृतौ दशकुमारचरिते पुष्पोद्भवचरितं नाम
चतुर्थ उच्छ्वासः ।

वन्धुजनाय = मित्रवर्गाय, कथयित्वा = निवेद्य, तेन = वन्धुजनेन, राजवाहनाय, बहुविधाम् = बहुप्रकाराम्, सपर्यां = सेवार्चनाम्, कारयन् = सम्पादयन्, सकलकलाकुशलः = सकलासु = निखिलासु कलासु = विद्यासु कुशलः = पारंगतः, अयं = असौ, महीसुरवरः = ब्राह्मणश्रेष्ठः इति = एवम्, पुरि=नगरे, प्रकटयन् = प्रचारयन्, पुष्पोद्भवः, अमुष्य = एतस्य, राज्ञः = राजवाहनस्य मज्जनभोजनादिकम् मज्जनं च भोजनं आहारश्च मज्जनभोजने ते आदिनी यस्य तत् स्नानाहारादिकम्, अनुदिनं = प्रतिवासरम्, स्वमन्दिरे = निजावासगृहे, कारयामास = कारितवान् ॥ २७ ॥

इति त्रिपाठियमुनेशचातकेन कृतायां महाकविदण्डिविरचित
दशकुमारचरितस्य पूर्वपीठिकायाः 'प्रदीपिका' व्याख्यायां
चतुर्थ उच्छ्वासः ।

को आदेश देकर, पुष्पोद्भव के साथ-साथ उज्जयिनी में प्रवेश किया । वहाँ पहुँचकर पुष्पोद्भव ने वन्धुपाल आदि मित्रों से कहा कि ये मेरे राजा के सुपुत्र हैं । यह सुनकर उन सभी ने राजवाहन का अतिशय सत्कार किया । पुनः पुष्पोद्भव ने सारे नगर में— ये सकलकलाप्रवीण ब्राह्मण हैं' ऐसा प्रचार करके अपने घर में स्नान, भोजनादि कराता हुआ निवास दिया ॥ २७ ॥

पञ्चमोच्छ्वासः

अथ मीनकेतनसेनानायकेन मलयगिरिमहीरुहनिरन्तरावासिभुजङ्गमभुक्तावशिष्टेनेव सूक्ष्मतरेण धृतहरिचन्दनपरिमलभरेणेव मन्दगतिना दक्षिणानिलेन वियोगिहृदयस्थं मन्मथानलमुज्ज्वलयन्, सहकारकिसलयमकरन्दास्वादनरक्त-

---

अथ ·· ···· ···· ··· · ···· ··· ·· समाजगाम ॥ १ ॥

प्रसङ्गः—महाकविर्दण्डी वसन्तऋतुं वर्णयन्नाह—

व्याख्या—अथ अवन्तिकायां निवासानन्तरम्, मीनकेतनसेनानायकेन = मीनः मत्स्यः केतनं ध्वजो यस्य सः कामदेवः, तस्य सेनायाः अनीकिन्याः नायकः प्रधान भटः तेन तथोक्तेन, मलयगिरिमहीरुहनिरन्तरावासिभुजंगमभुक्तावशिष्टेन = मलयगिरेः = मलयाचलस्य, महीरुहेषु = तरुषु, निरन्तरं = अनवकाशम्, आवासिनां = निवासिनाम्, भुजंगमानां = सर्पाणाम्, भुक्तस्य = पीतस्य, अवशिष्टेन = शेषेण, अत एव सूक्ष्मतरेण = मन्दतरेण, धृतहरिचन्दनपरिमलभरेण—धृतः = = मिश्रितः, हरिचन्दनस्य = वृक्षविशेषस्य, परिमलभरः = सुगन्धातिशयः येन सः तथोक्तेन, मन्दगतिना = मन्थरजवेन, दक्षिणानिलेन = मलयवातेन, वियोगि हृदयस्थं = विरहिजनमानसगतम्, मन्मथानलं = कामाग्निम्, उज्ज्वलयन् = संवर्धयन्, सहकारकिसलयमकरन्दास्वादनरक्तकण्ठानां = सहकाराणां=आम्राणां, किसलयस्य = नवोदितपल्लवस्य, मकरन्दस्य = परागस्य च तयोः आस्वादनेन

कुछ दिनों के वाद वसन्त ऋतु का आगमन हुआ। सेनापति स्वयं कामदेव ही था। मलयाचलाधिरूढ़ वृक्षों पर निवास करने वाले सर्पों के पीने से अवशिष्ट, चन्दन के सौरभ से मिश्रित मन्द वायु दक्षिण पवन के साथ मिलकर चलता हुआ वियोगियों के मानस में कामोद्दीपन करने लगा। रसाल मंजरी के उपभोग से

कण्ठानां मधुकरकलकण्ठानां काकलीकलकलेन दिक्चक्रं वाचालयन् मानिनीमानसोत्कलिकामुपनयन् माकन्दसिन्दुवाररक्ताशोककिंशुकतिलकेषु कलिकामुपपादयन्, मदनमहोत्सवाय रसिकमनांसि समुल्लासयन्, वसन्तसमयः समाजगाम।(१)

तस्मिन्नतिरमणीये कालेऽवन्तिसुन्दरी नाम मानसारनन्दिनी प्रियवयस्यया

= उपभोगेन, रक्तः = मृदुरवयुक्तः कण्ठस्वरः येषां ते तेषां तथोक्तानां, मधुकरकलकण्ठानां = मधुकरः = मधुपाः कलकण्ठाः = पिकाश्च ते तेषाम्, काकलीकलकलेन = कूजितकोलाहलेन दिक्चक्रम् = आशासमूहम्, वाचालयन् = मुखरयन् मानिनीमानसोत्कलिकां मानिनीनां = मानवतीनाम् मानसस्य = हृदयस्य, उत्कलिकां = उत्कण्ठां उपनयन् = विवर्धयन्, माकन्दसिन्दुवाररक्ताशोककिंशुकतिलकेषु = माकन्दः रसालः, सिन्दुवारश्च = निर्गुण्डी, रक्ताशोकः किंशुकः= पलाशश्च तिलकश्च = तिलवृक्षश्च ते तेषु तथोक्तेषु, कलिकां = मुकुलम्, उत्पादयन् = जनयन्, मदनमहोत्सवाय = काममहोत्सवाय, रसिकमनांसि = कामिजनानां हृदयानि, समुल्लासयन् = उत्साहयन्, वसन्तसमयः = मधुमासः, समाजगाम = प्राप्तः ॥ १ ॥

विशेषः—कोमल पदावली 'द्रष्टव्या। शृङ्गारस्योद्दीपनानि वर्णितानि सन्ति।

तस्मिन् ·· ···· ··· ···· ··· ··· ···· ···· ·· रेमे ॥ २ ॥

प्रसङ्गः—अवन्तिसुन्दर्याः वर्णनं क्रियते—

व्याख्या—अतिरमणीये = अत्यन्ताकर्षके, तस्मिन् = पूर्ववर्णिते, वसन्ते, काले = समये, अवन्तिसुन्दरी नाम, अवन्तिसुन्दरीति नाम्ना प्रसिद्धा, मानसारनन्दिनी = मानसारस्य पुत्री, प्रियवयस्यया = प्रियसख्या; बालचन्द्रिकया =

मधुर स्वर वाली कोकिलों के कूजन एवं भ्रमर-गुंजार से कामदेव दिशाओं को ध्वनित कर उठा। मानिनी नायिकाओं का मन उत्कण्ठित हो गया। कामदेव ने आम्र, रक्ताशोक आदि वृक्षों को पल्लवित करके मदनोत्सव मनाने के लिए रसिकों का हृदय उल्लसित कर दिया ॥ १ ॥

इसी रमणीय वसन्त काल में मालवेश्वर मानसार की 'अवन्ति सुन्दरी' नामक कुमारी अपनी प्रिय सखी बालचन्द्रिका के साथ नगर के समीप उद्यान में

बालचन्द्रिकया सह नगरोपान्तरम्योद्याने विहारोत्कण्ठया पौरसुन्दरीसमवायसमन्विता कस्यचिच्चूतपोतकस्य छायाशीतले सैकततले गन्धकुसुमहरिद्राक्षतचीनाम्बरादिनानाविधेन परिमलद्रव्यनिकरेण मनोभवमर्चयन्ती रेमे। (२)

तत्र रतिप्रतिकृतिमवन्तिसुन्दरीं द्रष्टुकामः काम इव वसन्तसहायः पुष्पोद्भवसमन्वितो राजवाहनस्तदुपवनं प्रविश्य तत्र तत्र मलयमारुतान्दोलितशाखानिर-

---

पुष्पोद्भवस्य स्त्रिया, सह = साकम्, नगरोपान्तरम्योद्याने = नगरस्य = पुरस्य उपान्ते = निकटे, रम्यं = सुन्दरम्, यत् उद्यानं = वाटिका, तस्मिन्, तथोक्ते, विहारोत्कण्ठया = रमणार्थं व्याकुलया, पौरसुन्दरीसमवायसमन्विता = पौरसुन्दरीणां = नगररमणीनाम् समवायेन = समूहेन, समन्विता = युक्ता, कस्यचित् = एकस्य, चूतपोतकस्य = लघुरसालवृक्षस्य, छायाशीतले = छायया शिशिरे, सैकततले = वालुकामयप्रदेशे, गन्धः = चन्दनम्, कुसुमं = पुष्पम्, हरिद्रा, अक्षताः = तण्डुलाः, चीनाम्बरम् = कौशेयवस्त्रम्, आदिनानाविधेन = बहुप्रकारेण, परिमलद्रव्यनिकरेण = सुगन्धिद्रव्यसमूहेन, मनोभवं = मदनम् अर्चयन्ती = आराधयन्ती, रेमे = चिक्रीडे ॥ २ ॥

तत्र ··· ··· ···· ··· ··· ···· ··· ··· अवाप ॥ ३ ॥

प्रसङ्गः—अवन्तिसुन्दर्याधिष्ठिते उपवने सपुष्पोद्भवस्य राजवाहनस्योपस्थितिः वर्ण्यते:—

व्याख्या—तत्र = तस्मिन्नवसरे, रतिप्रतिकृतिं = रतेः प्रतिमूर्तिम्, अवन्तिसुन्दरीम् = मानसारतनुजाम्, द्रष्टुकामः = द्रष्टुम् इच्छुकः, काम इव = मन्मथसदृशः, वसन्तसहायः = वसन्तः सहायः द्वितीयो यस्य सः तथोक्तः, पुष्पोद्भवसमन्वितः = पुष्पोद्भवेन युक्तः, राजवाहनः = मगधेश्वरसुतः, तदुपवनं = अवन्तिसुन्दर्या युक्तमुद्यानम्, प्रविश्य = गत्वा, तत्र-तत्र = तेषु-तेषु, मलयमारु-

---

विहार करने की इच्छा से जाकर पौरसुन्दरियों के साथ किसी आम्रपादप के नीचे बालुकामय भूमि पर कुसुम आदि सुगन्धित द्रव्यों से कामदेव की पूजा करती हुई क्रीडा करने लगी ॥ २ ॥

इसी समय राजवाहन वसन्तसदृश मित्र पुष्पोद्भव के साथ रतिसदृश सुन्दरी

न्तरसमुद्भिन्नकिसलयकुसुमफलसमुल्लसितेषु रसालतरुषु कोकिलकीरालिकुलमधुकराणामालापाञ्श्रावं श्रावं किञ्चिद्विकसदिन्दीवरकह्लारकैरव-राजीवराजीकेलि-लोल-कलहंस-सारस-कारण्डवचक्रवाकचक्रवालकलरवव्याकुलविमलशीतलसलिल-ललितानि सरांसि दर्शंदर्शममन्दलीलया ललनासमीपमवाप। (३)

बालचन्द्रिकया 'निःशङ्कमित आगम्यताम्' इति हस्तसंज्ञया समाहूतो निज-

---

तेन = मलयवातेन, आन्दोलितासु = चालितासु, शाखासु = स्कन्धेषु, निरन्तरं= अनवकाशं सघनम्, समुद्भिन्नैः = सुविकसितैः, किसलयकुसुमफलैः = नवपल्लव-प्रसूनफलैः, समुल्लसितेषु = सुशोभितेषु, रसालतरुषु = आम्रपादपेषु, कोकिल-कीरालिकुलमधुकराणाम् = कोकिलानां = पिकानाम्, कीरालीनां = शुकपंक्तीनां मधुकराणां = मिलिन्दानाम्, आलापान् = स्वरान्, श्रावं-श्रावं = मुहुः श्रुत्वा, किञ्चित् = ईषत्, विकसन्तीषु = स्फुटन्तीषु, इन्दीवरकह्लाराणां = नीलकमल कोरकाणाम्, कैरवाणां=कुमुदानाम्, राजीवानां = कमलानाम्, च राजिषु=पंक्तीषु, केलिलोलाः = क्रीडाचलाः, ये कलहंसाः = कादम्बाः, सारसाः = पुष्कराह्वः, कारण्डाः = मद्गवः, चक्रवाकाः = चक्राख्यपक्षिविशेषाः, तेषां यच्चक्रवातं = समुदायः, तस्य कलरवेण = अस्फुटमधुरगिरा, व्याकुलानि = व्याप्तानि, विमलानि = निर्मलानि, शीतलानि = शिशिराणि, यानि, सलिलानि = पानी-यानि, तैः ललितानि = रम्याणि, सरांसि = सरोवराणि, दर्शं-दर्शं = मुहुर्मुहुः विलोक्य, अमन्दलीलया = न मन्दः अमन्दः अमन्दा चासौ लीला च अमन्दलीला तया त्वरया, ललनायाः = अवन्तिसुन्दर्याः, समीपं = निकटन्, अवाप = समागतः ॥ ३ ॥

विशेषः—अत्र अनुच्छेदे दीर्घसमासबन्धाः द्रष्टव्याः। अनुप्रासच्छटा मनोहरा वर्तते।

बालचन्द्रिकया ... ... समाजगाम ॥ ४ ॥

प्रसङ्गः—राजवाहनस्य अवन्तिसुन्दर्याः अन्तिकं गमनं वर्ण्यते।

अवन्तिसुन्दरी को देखने की लालसा से, उपवन की रमणीय शोभा देखते हुए उसके (अवन्तिसुन्दरी) पास पहुँच गया॥ ३ ॥

तेजर्निर्जितपुरुहूतो राजवाहनः कृशोदर्या अवन्तिसुन्दर्या अन्तिकं समाजगाम। (४)

या वसन्तसहायेन समुत्सुकतया रते केलीशालभञ्जिकाविधित्सया कञ्चन नारीविशेषं विरच्यात्मनः क्रीडाकासारशारदारविन्दसौन्दर्येण पादद्वयम्, उद्यानवन-

---

व्याख्या— निःशङ्कं = विना सन्देहम्, इतः = अत्र स्थाने, आगम्यताम् = उपस्थीयताम्, इति = एवम्, हस्तसंज्ञया = करसंकेतेन, बालचन्द्रिकया = पुष्पोद्भवस्य स्त्रिया, समाहूतः = आकारितः, निजतेजोनिर्जितपुरुहूतः = निजतेजसा =स्वप्रतापेन, निर्जितः = परास्तः, पुरुहूतः = वासवः येन सः तथोक्तः, राजवाहनः = मगधेश्वरकुमारः कृशोदर्याः = क्षीणमध्यभागायाः, अवन्तिसुन्दर्याः = मानसारकुमार्याः, अन्तिकं = पार्श्वे, समाजगाम = उपस्थितोऽभूत् ॥ ४ ॥

या ... ... रराज ॥ ५ ॥

प्रसङ्गः—महाकविदण्डिना अवन्तिसुन्दर्याः सौन्दर्यवर्णनम् क्रियतेः—

व्याख्या—या रराजेति दूरान्वयः ! या = अवन्तिसुन्दरी, वसन्तसहायेन = वसन्तः सहायः मित्रम् यस्य सः कामदेवः, तेन कामेन, समुत्सुकतया = रन्तुमुत्कण्ठिततया, रतेः = कामपत्न्याः, केली = कामक्रीडा तदर्थं या शालभञ्जिका = कृत्रिमपुत्तलिका, तस्याः विधित्सा = निर्माणेच्छा तया तथोक्तया, कञ्चन= अपूर्वम्, एकं, नारीविशेषं = स्त्रीविशेषम्, विरच्य = विधाय, आत्मनः = निजस्य, क्रीडायाः = विहरणस्य, कासारः सरोवरः तत्र क्रीडाकासारं यत् शारदं = शरत् सम्बन्धि, अरविन्दं = पंकजम्, तस्य सौन्दर्येण = दीप्त्या, पादद्वयं = चरणद्वयम्, (नारीविशेषं विधायेत्यग्रिमेण सर्वत्र सम्बन्धः) उद्यानवने = उपवने,

---

दूर से ही राजवाहन को देखकर बालचन्द्रिका के द्वारा 'आप निःशङ्क होकर इधर ही आइए।' ऐसा संकेत पाकर इन्द्र को भी तिरस्कृत करनेवाला राजवाहन अवन्तिसुन्दरी के बिल्कुल पास पहुँच गया ॥ ४ ॥

उस समय अवन्तिसुन्दरी का स्वरूप ऐसा लगता था—मानो कामदेव ने अपनी पत्नी रति के विनोदार्थ गुड़िया बनाने की इच्छा से उस स्त्री (अवन्तिसुन्दरी) की रचना की हो ! उसके दोनों चरण मानो शरत् कालीन कमल से बने थे। राजहंस सदृश चाल को मानो हंसिनी से लेकर बनाया गया था। दोनों

दीर्घिकामत्तमरालिकागमनरीत्या लीलालसगतिविलासम्, तूणीरलावण्येन जङ्घे, लीलामन्दिरद्वारकदलीलालित्येन मनोज्ञमूरुयुगम्, जैत्ररथचातुर्येण घनं जघनम्-किञ्चिद्विकसल्लीलावतंसकह्लारकोरककोटरानुवृत्त्या गङ्गावर्तसनाभि नाभिम्, सौधारोहणपरिपाट्या बलित्रयम्, मौर्वीमधुकरपङ्क्तिनीलिमलीलया रोमावलिम् पूर्णसुवर्णकलशशोभया कुचद्वन्द्वम्, (लतामण्डपसौकुमार्येण बाहू), जयशङ्ख-

---

या दीर्घिका = वापिका, तस्यां या मत्तमरालिका = कामातुरा हंसिनी, तस्याः गमनरीतिः = संचरणप्रकारः, तया तथोक्तया, लीलया = विलासेन, अलसं = मन्थरम्, गतिविलासम् = गमनविधिः, तूणीरलावण्येन = तूणीरयोः = निषङ्गयोः, लावण्येन = सुषमया, जङ्घे = जानू (विरच्य), लीलामन्दिरस्य = केलिगृहस्य-द्वारे ये कदल्यौ = रम्भापादपौ, तयोः लालित्येन = सौन्दर्येण, मनोज्ञं = हृदयहारि, उरुद्वयं = सक्थियुगलम् जैत्ररथचातुर्येण = जैत्रः जयनशीलः रथः = स्यन्दनम्, तस्य चातुर्येण = सृजनविधिना, घनं = पृथु, जघनं = नितम्बपुरोभागम् (विधाय); किञ्चित् = ईषत्, विकसन् = प्रस्फुटन्, लीलावतंसः = विलासकर्णाभूषणम्, यः कह्लारकोरकः = सौगन्धिकमुकुलम्, रक्तकमलकलिका, तस्य कोटरं = मध्यभागः, तस्य अनुकृत्या = सादृश्येन, गङ्गायाः आवर्तः = भ्रमिः, तस्य सनाभिः = समानाभः सदृशः, तं तथोक्तम्, नाभिम् (विधाय), सौधारोहण परिपाट्या = सौधस्य = प्रसादस्य यत् आरोहणं = आरुह्यते अनेन इति आरोहणं सोपानम्, तस्य परिपाट्या रचनाप्रकारेण, बलित्रयं = वलीनां त्रयं बलित्रयम्, (विधाय), मौर्वी = ज्या एव मधुकरपंक्तिः = भ्रमरमाला तस्याः या नीलिमा= श्यामता, तस्याः लीलया = विलासेन, रोमावलिम् = रोमराजिम् (विधाय) पूर्णः = सलिलसम्भृतः, यः सुवर्णकलशः = कुन्दनकुम्भः तस्य शोभया =

जाँघे अपने तूणीर की कान्ति से, रति मन्दिर के द्वार पर लगे कदली स्तम्भ से दोनों ऊरु तथा जैत्ररथ के निर्माण की कला से जघन स्थल बनाये। रति के कर्णाभूषण स्वरूप कलिका के मध्य गंगा के आवर्त के समान नाभि का निर्माण किया। सौधारोहण हेतु निर्मित सोपान परम्परा की भाँति त्रिवली बनायी। प्रत्यञ्चा स्वरूप भ्रमर पंक्तियों से रोमराजि तथा जल पूर्ण स्वर्ण कलश की

भिख्यया कण्ठम्, कमनीयकर्णपूरसहकारपल्लवरागेण प्रतिविम्बीकृतबिम्बं रदनच्छदनं बाणायमानपुष्पलावण्येन शुचि स्मितम्, अग्रदूतिकाकलकण्ठिकाकलालापमाधुर्येण वचनजातम्,सकलसैनिकनायकमलयमारुतसौरभ्येण निःश्वासपवनम् जयध्वजमीनदर्पेण लोचनयुगलम्, चापयष्टिश्रिया भ्रूलते, प्रथमसुहृदसुधाकरस्यापनीतकलङ्कया कान्त्या वदनम्, (लीलामयूरबर्हभङ्ग्या केशपाशं) च विधाय

कान्त्या, कुचद्वयं = चूचुकयुगलम् (विधाय) लतामण्डपस्य = वल्लरीसमूहस्य, सौकुमार्येण = पेशलतया, बाहू = भुजयुगलम् (विधाय) जयशंखाभिख्यया = जयशंखस्य = विजयशंखस्य, अभिख्यया = शोभया, कण्ठं = ग्रीवाम्, कमनीयः= सुभगः, यः कर्णपूरः = कर्णावतंसीभूतः, सहकारपल्लवः = आम्रपल्लवः, तस्य रागेण = लालिमया, प्रतिविम्बीकृतं = प्रतिविम्बवत् कृतं विम्बं = बिम्बफलम् येन सः तं तथोक्तम्, रदनच्छदम् = अधरोष्ठम्; वाणवत् आचरतीति बाणायमानं यत् पुष्पम् = कुसुमम् तस्य लावण्येन = सौन्दर्येण, शुचि = धवलितं स्मितं = हास्यम्, अग्रदूतिका = मदनस्य प्रथमा दूती या कलकण्ठिका = कोकिला तस्याः यः कलः = मृदु, आलापः = स्वरः तस्य माधुर्येण = मधुरतया बचनजातं = वाणीसमूहम्, सकलसैनिकानां = मदनस्य सम्पूर्णवीराणाम्, नायकः = अग्रगुः, यो मलयमारुतः = दक्षिण पवनः, तस्य सौरभ्येण = सौगन्ध्येन, निःश्वासपवनं = प्राणवायुम्; जयध्वजमीनदर्पेण = जयध्वजः = विजयध्वजः एव मीनः = झषः तस्य दर्पेण = विलासेन लोचनयुगलम् नयनद्वयम्, चापयष्टिश्रिया = धनुर्लता तस्याः श्रिया कान्त्या भ्रूलते = कुटिलौ भ्रुवौ, प्रथमसुहृदः मदनस्य प्रमुखमित्रस्य सुधाकरस्य = शशिनः, अपनीतकलङ्कया = अपनीतः दूरीकृतः कलङ्कः लाञ्छनम् यस्याः सा तया, कान्त्या = अभिख्यया वदनम् आननम्, लीलामयूरस्य = क्रीडा-

---

कान्ति से दोनों स्तन बने। लतामण्डप की शोभा के सदृश दोनों हाथ, जयशंख की ग्रीवा के सदृश कण्ठ, मनोहर कर्णफूल के ऊपर रखी आम्र मंजरी की अरुणिमा के सदृश तथा पके विम्ब (कुँदरु) फल के समान लाल लाल अधरोष्ठ एवं पुष्प बाणों की शोभा से मुसकान की सृष्टि की। कोयल की मृदु वीण की मृदुलता से उसकी वाणी, प्रधान सेनानायक मलयानिल की सुगन्ध से श्वांस, जयध्वज में रखे मीन की आँखों की कान्ति से आँखें, धनुष के तुल्य तिर्यक अराल

समस्तमकरन्दकस्तूरिकासम्मितेन मलयजरसेन प्रक्षाल्य कर्पूरपरागेण सम्मृज्य निर्मितेव रराज। (५)

सा मूर्तिमतीव लक्ष्मीर्मालवेशकन्यका स्वेनैवाराध्यमानं सङ्कल्पितवरप्रदानायाविर्भूतं मूर्तिमन्तं मन्मथमिव तमालोक्य मन्दमारुतान्दोलिता लतेव मदनावेशवति चकम्पे। तदनु क्रीडाविश्रम्भान्निवृत्ता लज्जया कानि कान्यपि भावान्तराणि व्यधत्त। (६)

शिखिनः बर्हं = पिच्छम्, तस्य भङ्गया = रचनया, केशपाशं = कचकलापम् विधाय निर्माय, समस्ताभ्यां = सकलाभ्यां, मकरन्दकस्तूरिकाभ्याम् = पुष्पपरागमृगनाभिगन्धिभ्याम्, सम्मितेन = मिश्रितेन, मलयजरसेन = चन्दनजलेन, प्रक्षाल्य स्वच्छीकृत्य, कर्पूरपरागेण = घनसारक्षोदेन, सम्मृज्य = संशोध्य, (मदनेन, कामदेवेन) निर्मिता = रचिता, इव, रराज = शुशुभे, शोभितवती ॥ ५ ॥

सा··· ···· ··· ··· ··· ···· ··· ··· ···व्यधत्त ॥ ६ ॥

प्रसङ्गः—राजवाहने वीक्षिते सति अवन्तिसुन्दर्याः मनोदशा वर्ण्यते कविना—

व्याख्या—सा = पूर्वोक्ता, मालवेशकन्यका = मानसारसुता, मूर्तिमती = सशरीरा, लक्ष्मीः = श्रीः, इव, स्वेनैव = निजेनैव हस्तेन आराध्यमानं = समर्च्यमानम्, संकल्पितवरप्रदानाय = अभिलषितमनोरथपूरणाय, आविर्भूतं = प्रकटितम्, मूर्तिमन्तं = शरीरिणम्, मन्मथं = मनोजम्, इव, तम् = राजवाहनम्, आलोक्य = निरीक्ष्य, मन्दमारुतान्दोलिता = मन्थरपवनेन कम्पिता, लता = वल्लरी, इव, मदनावेशवती = मदनस्य = मन्मथस्य आवेशः प्रवेगः अस्ति अस्यामिति मन्मथवेगवती, चकम्पे = कम्पिताऽभवत्। तदनु = कामोद्दीपनानन्तरम्, क्रीडाविश्रम्भात् = क्रीडायां लीलायाम्, विश्रामः = आस्था, तस्मात् निवृत्ता =

भौंहे, चन्द्रमा के तुल्य आनन तथा क्रीडा-मयूर के पंखों के तुल्य केशपाश का विधान करके कामदेव ने अवन्तिसुन्दरी के सम्पूर्ण शरीर को कस्तूरी, कर्पूर, चन्दन आदि से मिश्रित जल से स्वच्छ करके सजाया था ॥ ५ ॥

मूर्तिमती लक्ष्मी जैसी मालवेश कन्या अपनी आराधना से प्रसन्न होकर वर देने के लिए प्रकट हुए कामदेव की भाँति सुन्दर राजवाहन को देखकर मन्द

ललनाजनं सृजता विधात्रा नूनमेषा घुणाक्षरन्यायेन निर्मिता। नो चेदब्जभू-रेवंविधो निर्माणनिपुणो यदि स्यात्तर्हि तत्समानलावण्यामन्यां तरुणीं किं न करोति' इति सविस्मयानुरागं विलोकयतस्तस्य समक्षं स्थातुं लज्जिता सती किञ्चित्सखीजनान्तरितगात्रा तन्नयननाभिमुखैः किञ्चिदाकुञ्चितभ्रूलतैरपाङ्गवी-

---

पराङ्मुखी, लज्जया=व्रीडया, कानि कानि अपि, नामविधानि, भाव्यन्तराणि = प्रेमभावान् = रतिसंकेतान्; व्यधत्त = व्यक्तीकर्त्तुमारब्धा ॥ ६ ॥

ललनाजनं··· ···· ··· ··· ···, ··· ··· अतिष्ठत् ॥ ७ ॥

प्रसङ्गः—अवन्तिसुन्दरीराजवाहनयोः मिथः समवलोकनं कविना वर्ण्यते—

व्याख्या—ललनाजनं = नारीजनम्, सृजता = रचयता, विधात्रा = वेधसा, नूनम् = निश्चयेन, एषा = मालवेशकन्यका, घुणाक्षरन्यायेन = संयोगतः, निर्मिता = सृष्टा! नो चेत् = अन्यथा अब्जभूः = पद्मयोनिः ब्रह्मा, एवं विधः = इत्थं-प्रकारः, निर्माणनिपुणः = सृष्टिकुशलः, यदि = चेत्, स्यात्, तर्हि = तदा, तत्स-मानलावण्यं = तत्तुल्यसुन्दरीम्, अन्यत् अपराम, तरुणीम् = युवतीम्, किं=कस्मात्, न = नहि, करोति = सृजति!' इति = एवम्, सविस्मयानुरागं = विस्मयेन सहितः सविस्मयः सविस्मयः अनुरागः यस्मिन् तत् यथा स्यात्तथा विस्मयानुरागा-भ्याम् सहितम् विलोकयतः = पश्यतः, तस्य = राजवाहनस्य, समक्षम् = पुरः, स्थातुं = स्थितिं कर्त्तुम्, लज्जिता = ह्रीमती, सती, किञ्चित् = ईषत् सखीजना-न्तरितगात्रा = सखीजनैः आलिसमूहैः अन्तरितं व्यवहितं गात्रं देहम् यस्याः सा तथाभूता, तन्नयनाभिमुखैः तस्य = राजवाहनस्य नयनयोः = नेत्रयोः अभिमुखैः = सम्मुखवृत्तिभिः, किञ्चिदाकुञ्चितैः = ईषत् संकोचितैः, अञ्चितभ्रूलतैः = अञ्चिते = शोभते, भ्रूलते यैस्ते तैः तथाभूतैः अपाङ्गवीक्षितैः = कटाक्षपातावलोकनैः,

---

पवनान्दोलित लता सी काँप उठी! फिर लज्जित होकर क्रीड़ा बन्द करके समया-नुकूल अनुभाव प्रकट करने लगी ॥ ६ ॥

अवन्तिसुन्दरी के अनुपम सौन्दर्य को देखकर राजवाहन कह उठा—"नारी की सृष्टि करने वाले विधाता ने निश्चित ही घुणाक्षर न्याय से इसकी रचना की है। नहीं तो, ऐसी ही और सुन्दरियों का निर्माण क्यों न करते! इस प्रकार आश्चर्य

क्षितैरात्मनःकुरङ्गस्यानायमानलावण्यं राजवाहनं विलोकयन्त्यतिष्ठत् । (७)

सोऽपि तस्यास्तदोत्पादितभावरसानां सामग्र्या लब्धवलस्येव विषमशरस्य शरव्यायमाणमानसो बभूव । (८)

सा मनसीत्थमचिन्तयत्—'अनन्यसाधारणसौन्दर्येणानेन कस्यां पुरि भाग्यवतीनां तरुणीनां लोचनोत्सवः क्रियते । पुत्ररत्नेनामुना पुरन्ध्रीणां पुत्रवतीनां

आत्मनः = निजस्य, कुरङ्गस्य = कुरङ्गभूतस्य, आनायमानलावण्यं आनायः = जालम्, तदिवाचरतीति आनायमानं लावण्यं सौन्दर्यं यस्य सः तम्, राजवाहनं राजहंससूनुम्, विलोकयन्ती = पश्यन्ती, अतिष्ठत = स्थिता वर्तते ॥ ७ ॥

सोऽपि··· ···· ···· ···· ··· ··· ···· ···· बभूव ॥ ८ ॥

प्रसङ्गः—अवन्तिसुन्दर्याः दर्शनस्य राजवाहनेप्र भावः कविना वर्ण्यते—

व्याख्या—सोऽपि = राजवानहनोऽपि, तस्याः = मालवेशकन्यकायाः, तदा = तस्मिन्नवसरे, उत्पादितभावरसानां = उत्पादिताः जनिताः ये भावरसाः शृङ्गाररसाः, तेषां = शृङ्गाररसाभिलाषाणाम्, सामग्र्या = पूर्णतया साधनेन वा, लब्धवलस्य = प्राप्तसामर्थ्यस्य इव, विषमशरस्य = विषमाः अयुग्मसंख्याकाः पञ्च शराः यस्य सः तस्य कामस्य, शरव्यायमाणमानसः = शरव्यं = लक्ष्यम्. तदिवाचरन् शरव्यायमाणं मानसं मनो यस्य सः तथोक्तः, बभूव = अजायत्, अभूत् ॥ ८ ॥

सा···· ··· ···· ··· ···· ··· ··· ··· ज्ञातव्य इति ॥ ९॥

प्रसङ्गः—अवन्तिसुन्दरी राजवाहनं निरीक्ष्य तस्य सम्बन्धं चिन्तयति—

व्याख्या—सा = अवन्तिसुन्दरी, मनसि = मानसे, इत्थं = एवम् वक्ष्यमाणप्रकारेण, अचिन्तयत्=अविचारयत् अनेन=पुरोवर्तमानेन, अनन्यसाधारणसौन्दर्येण= अद्वितीयलावण्येन, कस्यां, पुरि = नगर्याम्, भाग्यवतीनां = सौभाग्ययुतानाम्, तरुणीनां = युवतीनाम्, लोचनोत्सवः = नयनानन्दः, क्रियते = दीयते, अमुना = पुरः

एवं प्रेमपूर्वक देखनेवाले राजवाहन के समक्ष लज्जा का अनुभव करती हुई अवन्तिसुन्दरी सखियों की ओट लेकर कटाक्षादि से उसे देखती हुई बैठी रही । राजवाहन भी उसके हाव-भावों के द्वारा काम की भावना से भर उठा ॥ ८ ॥

अवन्ति सुन्दरी ने अपने मन में सोचा—ये अद्वितीय सुन्दर पुरुष कहाँ के

सीमन्तिनीनां का नाम सीमन्तमौक्तिकीक्रियते। कास्य देवी। किमत्रागमनकारणमस्य। मन्मथो मामपहसितनिजलावण्यमेनं विलोकयन्तीमसूयेवातिमात्रं मथ्नन्निजनाम सान्वयं करोति। किं करोमि। कथमयं ज्ञातव्य' इति। (९)

ततो बालचन्द्रिका तयोरन्तरङ्गवृत्तिं भावविवेकैर्ज्ञात्वा कान्तासमाजसन्निधौ

दृश्यमानेन, पुत्ररत्नेन = सुतश्रेष्ठेन, पुरन्ध्रीणां साध्वीनाम्, पुत्रवतीनां = सुतवतीनाम्, सीमन्तिनीनां = स्त्रीणाम्, का नाम = प्रख्याता, सीमन्तमौक्तिकीक्रियते = शिरोभूषणी क्रियते। अस्य = पुरोवर्तमानस्य का = किन्नामधेया, देवी = प्रियतमा पत्नी! अत्र = उपवने, अस्य = पुरुषस्य, आगमनकारणं = आगमनस्य प्रयोजनम् किम्?। मन्मथः = कामः, अपहसितनिजलावण्यं = अपहसितं = उपहासविषयीकृतम्, निजं = स्वीयम्, लावण्यं = सौन्दर्यम्, येन सः तं तथोक्तम्, एनं = राजकुमारम्, विलोकयन्तीं = पश्यन्तीम्, मां = मालवेशतनयाम्, असूयया = ईर्ष्यया, इव, अतिमात्रम् = अत्यधिकम्, मथ्नन् = उत्पीडयन्, निजनाम = मन्मथः इति स्वकीयाभिधानम्, सान्वयं = चरितार्थम्, करोति = विदधाति। किं = कथम्, करोमि = आचरामि, ? अयं = पुरो विद्यमानः पुरुषविशेषः, कथं = केनप्रकारेण ज्ञातव्यः = ज्ञातुं योग्यः, इति = एवं चिन्तितवती॥ ९॥

विशेषः—अत्र शृङ्गाररसस्य चर्वणा भवति।

ततो··· ··· ··· ··· ··· ···· ··· ···पूज्यताम्॥ १०॥

प्रसङ्गः—बालचन्द्रिका समुत्सुकमानसामवन्तिसुन्दरीं राजवाहनस्य परिचयं वदति—

व्याख्या—ततः = तदनन्तरम्, बालचन्द्रिका = पद्मोद्भवस्य पत्नी, तयोः = अवन्तिसुन्दरीराजवाहनयोः, अन्तरङ्गवृत्तिं = मानसव्यापारम्, परस्परं प्रेमजननम्, भावविवेकैः = भावमनोविकाराणां, विवेकैः = चिह्नैः, ज्ञात्वा = विज्ञाय,

---

रहने वाले हैं। इनकी परम भाग्यवती माता का क्या नाम है! इनकी पत्नी कौन होगी? यहाँ किस लिए आये हैं? इन्हें देखने के बाद मन्मथ मुझे मथ रहा है! क्या करूँ? इनका परिचय कैसे मिले!॥ ९॥

बालचन्द्रिका राजवाहन और अवन्ति सुन्दरी के परस्पर अनुरागाङ्कुरण को

राजनन्दनोदन्तस्य सम्यगाख्यानमनुचितमिति लोकसाधारणैर्वाक्यैरभाषत— 'भर्तृदारिके, अयं सकलकलाप्रवीणो देवतासान्निध्यकरण आहवनिपुणो भूसुरकुमारो मणिमन्त्रौषधिज्ञः परिचर्यार्हो भवत्या पूज्यताम्' इति। (१०)

तदाकर्ण्य निजमनोरथमनुवदन्त्या बालचन्द्रिकया सन्तुष्टान्तरङ्गा तरङ्गावली मन्दानिलेनेव सङ्कल्पजेनाकुलीकृत राजकन्या जितमारं कुमार समुचिता-

---

कान्तासमाजसन्निधौ = स्त्रीसमुदाये, राजनन्दनोदन्तस्य = राजवाहनवृत्तस्य, सम्यगाख्यानम् = विशेषेण निर्वचनम्, अनुचितम् = अशोभनम्, इति विचिन्त्य, लोकसाधारणैः = सामान्यैः, वाक्यैः = कथनैः, अभाषत = उक्तवती—'भर्तृदारिके ! राजपुत्रि !, अयं = एषः पुरो विद्यमानः, सकलकलाप्रवीणः = गीतादिललितकलासु कुशलः, देवतासान्निध्यकरणः = देवानां सान्निध्यं साक्षात्कारं करोतीति देवतासान्निध्यकरणः = देवसाक्षात्कारकर्त्ता, आहवनिपुणः = युद्धदक्षः, भूसुरकुमारः = ब्राह्मणकुमारः, मणिमंत्रौषधिज्ञः = मणिश्च मन्त्रश्च ओषधिश्च तान् जानातीति मणिमंत्रौषधिज्ञः = मणिमन्त्रादिज्ञाता, परिचर्यार्हः = सेवायोग्यः, भवत्या = श्रीमत्या, पूज्यताम् = सत्क्रियताम् इति। ॥ १० ॥

तदाकर्ण्य··· ···· ··· ··· ···· ··· उत्पादयिष्यामि ॥ ११ ॥

प्रसङ्गः—अवन्तिसुन्दर्या कृतः राजवाहनसत्कारः तदनु राजवाहनमनोभावः वर्ण्यते कविना—

व्याख्या—तत् = बालचन्द्रिकयोक्तम्, आकर्ण्य = श्रुत्वा, निजमनोरथं = स्वकीयमनोकामम्, अनुवदन्त्या = अनुसृत्य कथयन्त्या, बालचन्द्रिकया = पुष्पोद्भवस्त्रिया, सन्तुष्टान्तरङ्गा — सन्तुष्टं = हृष्टम्, अन्तरङ्गं = अन्तःकरणम् यस्याः सा मन्दानिलेन = मन्थरपवनेन, तरङ्गावली = वीचिमाला, इव, संकल्प-

---

जान कर नारी समाज में अधिक कहना उचित न समझ कर सामान्य ढंग से बोली—'राजकुमारी ! ये सकल कला प्रवीण, देवदर्शी, युद्ध कुशल, मन्त्रतन्त्रज्ञ ब्राह्मणकुमार अत्यन्त पूज्य हैं ! इनका स्वागत करो ! ॥ १० ॥

बालचन्द्रिका का मनोनुकूल कथन सुनकर सन्तुष्ट हुई राजकुमारी ने राजकुमार राजवाहन को समुचित आसन पर बिठाकर गन्ध कुसुमाक्षतादि से पूजन

सीनं विधाय सखीहस्तेन शस्तेन गन्धकुसुमाक्षतघनसारताम्बूलादिनानाजातिवस्तु-निचयेन पूजां तस्मै कारयामास। राजवाहनोऽप्येवमचिन्तयत्—'नूनमेषा पूर्वजन्मनि मे जाया यज्ञवती। नो चेदेतस्यामेवंविधोऽनुरागो मन्मनसि च जायेत। शापावसानसमये तपोनिधिदत्तं जातिस्मरत्वमावयोः समानमेव। तथापि काल-जनितविशेषसूचकवाक्यैरस्या ज्ञानमुत्पादयिष्यामि' इति। (११)

जेन = मनोजेन, आकुलीकृता = विकलीकृता, राजकन्या = राजकुमारी, अवन्ति-सुन्दरी, जितमारं = जितः पराजितः मारः कामदेवः येन सः तम्, कुमारं =राज-वाहनम्, समुचितासनासीनं = योग्यासनोपविष्टम्, विधाय = कृत्वा, शस्तेन =मनो-हरेण, गन्धकुसुमेति० =गन्धश्च कुसुमञ्च अक्षतञ्च घनसारश्च ताम्बूलञ्च तानि आदीनि यस्य स चासौ नानाजातिवस्तुनिचयः तेन, सखीहस्तेन = आलिकरेण, सहचरी-दत्तेन, तस्मै = कुमाराय, पूजां = सपर्याम्, कारयामास = कृतवती। राज-वाहनोऽपि = राजहंसकुमारोऽपि, एवम् = वक्ष्यमाणरीत्या, अचिन्तयत् = अशो-चत् = 'नूनं = निश्चयेन, एषा = अवन्तिसुन्दरी, पूर्वंजन्मनि = जन्मान्तरे, मे=मम राजवाहनस्य, जाया = पत्नी, यज्ञवती = यज्ञवतीनाम्नी स्यात्, नो चेत् = अन्यथा, एतस्यां = अस्याम्, कुमार्याम्, एवंविधः = दर्शितप्रकारः, अनुरागः = प्रेम, मम = राजवाहनस्य, मनसि = मानसे, न =नहि, जायेत = उत्पद्येत ! शापावसान-समये = अभिशापान्तकाले, तपोनिधिदत्तं = तापसेन विहितम्, जातिस्मरत्वं = जन्मान्तरस्मृतिः, आवयोः = अवन्तिसुन्दरीराजवाहनयोः, समानम् = सदृशम्, एव, तथापि = पुनरपि, कालजनितः = समयेन उत्पादितः यो विशेषः = विस्मृतिः तस्य सूचकानि व्यञ्जकानि यानि वाक्यानि वचनानि, तैः तथोक्तैः अस्याः अवन्ति-सुन्दर्याः, ज्ञानं = स्मृतिम्, उत्पादयिष्यामि = जनयिष्यामि ॥ ११ ॥

किया। राजवाहन भी मन में सोचने लगा— 'यह निश्चय ही मेरी पूर्वजन्म की पत्नी यज्ञवती है। अन्यथा इसके प्रति मेरा ऐसा प्रेम न उमड़ता ! श्राप समाप्त होने के बाद हम दोनों की पूर्वजन्म के विषय में स्मृति समान ही होनी चाहिए। फिर भी पूर्वजन्म की याद दिलानेवाले वाक्यों से इसका संस्कार जगाऊँ॥ ११ ॥

तस्मिन्नेव समये कोऽपि मनोरमो राजहंसः केलीविधित्सया तदुपकण्ठमगमत्। समुत्सुकया राजकन्यया मरालग्रहणे नियुक्तां बालचन्द्रिकामवलोक्य समुचितो वाक्यावसर इति सम्भाषणनिपुणो राजवाहनः सलीलमलपत्—'सखि, पुरा शाम्बो नाम कश्चिन्महीवल्लभो मनोवल्लभया सह विहारवाञ्छया कमलाकरमवाप्य तत्र कोकनदकदम्बसमीपे निद्राधीनमानसं राजहंसं शनैर्गृहीत्वा बिसगुणेन तस्य चरणयुगलं निगडयित्वा कान्तामुखं सानुरागं विलोकयन्मन्दस्मित-

---

तस्मिन्नेव ... ...गम्यताम् ॥ १२ ॥

प्रसङ्गः—राजवाहनः अविन्तसुन्दरीं पूर्वजन्मवृत्तान्तं श्रावयन्नाह—

व्याख्या—तस्मिन्नेव = सवितर्के एव, समये = अवसरे, कोऽपि = कश्चित्, अपि, मनोरमः = रमणीयः, राजहंसः = हंसविशेषः, केलीविधित्सया = क्रीडाचिकीर्षया, तदुपकण्ठं = अवन्तिसुन्दर्याः समीपम्, अगमत् = आगतः। समुत्सुकया = उत्कण्ठितया, राजकन्यया = राजपुत्र्या, मरालग्रहणे = हंसप्राप्तौ, नियुक्तां = प्रयत्नशीलाम्, बालचन्द्रिकां = स्वसखीं पुष्पोद्भवपत्नीम्, अवलोक्य = प्रेक्ष्य, समुचितः = अनुकूलः, वाक्यांवसरः = वार्तासमयः, इति = इत्थं विचार्य, सम्भाषणनिपुणः = संलापपटुः, राजवाहनः = राजहंसतनयः, सलीलं = लीलया सहितम्, अलपत् = अवदत् = 'सखि = भामिनि !, पुरा = पूर्वजन्मनि, शम्बः नाम = शाम्बाभिधः, कश्चित् कोऽपि, महीवल्लभः = राजा, मनोवल्लभया = प्रियपत्न्या-सह = साकम्, विहारवाञ्छया = केलिकामनया, कमलाकरं = सरोजवनम्, अवाप्य = प्राप्य, तत्र = कमलाकरे, कोकनदकदम्बसमीपं = रक्तकमलानां कदम्बस्य = समूहस्य समीपे = निकटे, निद्राधीनमानसं = निद्रया वशीभूतं हृदयम्, राजहंसं = मरालम्, शनैः = मन्दम्, गृहीत्वा = आदाय, बिसगुणेन = कमलतन्तुना, तस्य =

उसी समय एक सुन्दर राजहंस क्रीडा करते-करते अवन्तिसुन्दरी के पास आ पहुँचा। हंस प्राप्ति के लिए उत्सुक राजकुमारी के द्वारा बालचन्द्रिका को उसे पकड़ने के लिए नियुक्त देखकर सम्भाषणनिपुण राजवाहन ने कहा—'सखी, प्राचीन समय में 'शाम्ब' नामक एक राजा अपनी प्रिया के साथ विहार की इच्छा से एक सरोवर के तट पर गये। वहाँ उन्होंने कमल समूह के समीप निद्रित

विकसितैककपोलमण्डलस्तामभाषत—'इन्दुमुखि, मया बद्धो मरालः शान्तो मुनिवदास्ते। स्वेच्छयानेन गम्यताम्' इति। (१२)

सोऽपि राजहंसः शाम्बमशपत्—'महीपाल, यदस्मिन्नम्बुजखण्डेऽनुष्ठानपरायणतया परमानन्देन तिष्ठन्तं नैष्ठिकं मामकारणं राज्यगर्वेणावमानितवानसि तदेतत्पाप्मना रमणीविरहसन्तापमनुभव' इति। विषण्णवदनः शाम्बो जीविते-

---

राजहंसस्य, चरणयुगलं = पादद्वयम्, निगडयित्वा = आबध्य, कान्तामुखं = प्रियाननम्, सानुरागं = साह्लादम्, विलोकयन् = पश्यन्, मन्दस्मितेन = ईषद्धासेन, विकसितं = प्रफुल्लितं एकं कपोलमण्डलं = गण्डस्थलं यस्य सः तथोक्तः, ताम् = स्वप्रियाम्, अभाषत = अवदत्—इन्दुमुखि = चन्द्रवदने !, मया = शाम्ब नाम्ना महीवल्लभेन, बद्धः = निगडितः, मरालः = राजहंसः, मुनिवत् = मुनिसदृशः शान्तः = अव्याकुलः, आस्ते = तिष्ठति। अनेन = राजहंसेन स्वेच्छया = स्वमनोऽनुकूलम्, गम्यताम् = व्रज्यतामिति, एवम् अकथयम् ॥ १२ ॥

सोऽपि··· ···· ···· ··· ···· ···· ····लभस्व इति ॥ १३ ॥

प्रसंगः—राजवाहनः अवन्तिसुन्दरीं हंसवृत्तातं श्रावयन्नाह—

व्याख्या—सोऽपि राजहंसः = मरालः, शाम्बं = राजानम्, अशपत् = शशाप—'महीपाल ! = राजन् !, यत्, अस्मिन् अम्बुजखण्डे = कमलकासारे, अनुष्ठानपरायणतया = अनुष्ठाने = ध्यानादिसाधने, परायणतया = प्रवृत्ततया, परमानन्देन = परमसुखेन, तिष्ठन्तं = विराजमानम्, नैष्ठिकं = नियमवन्तम्, मां = मुनिम्, अकारणम् = निष्प्रयोजनम् यथा स्यात्तथा, राज्यगर्वेण = राज्यमदेन, अवमानितवान् = तिरस्कृतवान्, असि, तत् = तस्मात्, एतत्पाप्मना = अनेन पापेन, रमणीविरहसन्तापं = पत्नीवियोगदुःखम्, अनुभव = लभस्व, इति शशाप। विषण्णवदनः = म्लानाननः, शाम्बः = महीवल्लभः, जीवितेश्वरीविरहं =

एक राजहंस को पकड़ कर कमल तन्तुओं से उसके पैरों को बाँध कर हँसते हुए अपनी पत्नी से कहा—'चन्द्रानने ! मेरे द्वारा बाँधे जाने पर यह हंस मुनि के समान शान्त हो गया है ? अच्छा, इसे छोड़ देता हूँ ! अब यह जहाँ मन हो वहाँ जाय ॥ १२ ॥

श्वरीविरहसहिष्णुर्भूमौ दण्डवत्प्रणम्य सविनयमभाषत—'महाभाग, यद ज्ञानेनाकरवम् तत्क्षमस्व' इति। स तापसः करुणाकृष्टचेतास्तमवदत्—'राजन् इह जन्मनि भवतः शापफलाभावो भवतु। मद्वचनस्यामोघतया भाविनि जनने शरीरान्तरं गतायाः अस्याः सरसिजाक्ष्या रसेन रमणो भूत्वा मुहूर्तद्वयं मच्चरणयुगलबन्धकारितया मासद्वयं श्रृङ्खलानिगडितचरणो रमणीवियोगविषादमनुभूय पश्चादनेककालं वल्लभया सह राज्यसुखं लभस्व' इति। (१३)

प्रेयसीविश्लेषम्, असहिष्णुः = सोढुं अशक्नुवन्, भूमौ = धरित्र्याम्, दण्डवत् = दण्डेन तुल्यम्, प्रणम्य = नमस्कृत्य, सविनयं = विनयेन सहितं यथा स्यात्तथा, अभाषत = अवदत्— 'महाभाग ! = महात्मन् !, यदज्ञानेन = यत् अनवबोधेन अकरवम् = अकार्षम्, तत् क्षमस्व = क्षम्यताम्, इति। सः = हंसरूपधारी, तापसः = मुनिः, करुणाकृष्टचेताः = दयार्द्रहृदयः, तं = शाम्बम्, अवदत् = अभाषत— 'राजन् ! = भूप !, इह = अस्मिन्, जन्मनि = जीवने, भवतः = तव, शापफलाभावः = अभिशापफलस्य अभावः, भवतु = स्यात्। मद्वचनस्य = मत्कथनस्य, अमोघतया = अव्यर्थतया, भाविनि = भविष्यति, जनने = जन्मनि, शरीरान्तरं = अपरं देहम्, गतायाः = प्राप्तायाः, अस्याः सरसिजाक्ष्याः = कमलनयनायाः प्रियायाः, रसेन = प्रेम्णा, रमणः = प्रियः, भूत्वा, मुहूर्तद्वयं = होराद्वयं, मच्चरणयुगलबन्धनकारितया = मच्चरणयुगलस्य बन्धनं कर्तुं शीलं यस्य तस्य भाववत्ता तया तथोक्तया, मासद्वयं = द्वौ मासौ, श्रृङ्खलानिगडितचरणः = श्रृङ्खलया निगडेन निगडितौ बद्धौ चरणौ पादौ यस्य सः तथोक्तः, रमणीवियोगविषादं = प्रियाविरहवेदनाम्, अनुभूय = प्राप्त्वा, पश्चात् = तदनु, अनेककालं = बहुसमयपर्यंतम्, वल्लभया = प्राण प्रियया, सह = साकम्, राज्यसुखम् = नृपत्वानन्दम्, लभस्व = अनुभव ॥ १३ ॥

उस राजहंस ने राजा शाम्ब को शाप दिया—हे राजन् ! तुमने कमलखण्ड के नीचे शान्तिपूर्वक अनुष्ठानरत मुझको अपने राज्यमद में चूर्ण होकर अकारण ही कष्ट पहुँचाया है। अतः इस पाप के परिणामस्वरूप तुम पीड़ा का अनुभव करके फिर चिरकाल तक प्रिया के साथ राज्य सुख भोगोगे ॥ १३ ॥

तदनु जातिस्मरत्वमपि तयोरन्वगृह्णात् । 'तस्मान्मरालबन्धनं न करणीयं त्वया' इति । सापि भर्तृदारिका तद्वचनाकर्णनाभिज्ञातस्वपुरातनजननवृत्तान्ता नूनमयं मत्प्राणवल्लभः' इति मनसि जानती रागपल्लवितमानसा समन्दहासमवोचत्--'सौम्य, पुरा शाम्बो यज्ञवतीसन्देशपरिपालनाय तथाविधं हंसबन्धनमकार्षीत् । तथा हि लोके पण्डिता अपि दाक्षिण्येनाकार्यं कुर्वन्ति' इति । कन्या-

---

तदनु... ... ... बभूवतुः ॥ १४ ॥

प्रसङ्गः—राजवाहनेन श्रावितं पूर्वजन्मवृत्तान्तं समाकर्ण्य कृतविश्वासाभूदवन्तिसुन्दरी, पुनः तयोः मिथः व्यापारश्च वर्ण्यते महाकविना दण्डिनाः—

व्याख्या—तदनु = तत्पश्चात्, तयोः = पतिपत्न्योः, द्वयोः, जातिस्मरत्वं = पूर्वजननवृत्तान्तस्मृतिम्, अपि, अन्वगृह्णात् = अनुज्ञातवान् । तस्मात् = कारणात्, त्वया = भवत्या, मरालबन्धनम् = राजहंसबन्धनम्, न = नहि, करणीयं = कार्यम्, इति । भर्तृदारिका = नृपकन्यका, सापि = अवन्तिसुन्दरी अपि, तद्वचनस्य = राजवाहनभाषितस्य, आकर्णनेन = श्रवणेन, अभिज्ञातः = स्मरणीभूतः, स्वपुरातनजननस्य = निजपूर्वजन्मनः; वृत्तान्तः = वृत्तं यया सा तथोक्ता, नूनं = निश्चयेन, अयं = एषः, मत्प्राणवल्लभः = मम पतिः, इति = एवम्, मनसि = चेतसि, जानती = अवबुध्यती, रागपल्लवितमानसा —रागेण = प्रेम्णा पल्लवितं = प्रफुल्लितं, मानसं = हृदयं यस्याः सा तथोक्ता, समन्दहासं = मन्दहासेन सहितम् यथा स्यात्तथा, अवोचत् = अवदत्, 'सौम्य ! = भद्र !, पुरा = पूर्वस्मिन् समये, शाम्बः = भूपः, यज्ञवतीसन्देशपरिपालनाय यज्ञवत्याः = स्वकीयराजमहिष्याः सन्देशस्य = निवेदनस्य, परिपालनाय = परिरक्षणाय, तथाविधं = पूर्वप्रकारकम्, हंसबन्धनं = मरालबन्धनम्, अकार्षीत् = कृतवान् । तथाहि = यतः, लोके =

फिर उस मुनि ने कहा--'तुम दोनों को समान रूप से पूर्वजन्म की स्मृति बनी रहेगी !, अतः इस राजहंस को मत बाँधो ! उस राजकुमारी को भी अपने पूर्वजन्म की स्मृति हो आयी । उसने, मन में सोचकर कि ये निश्चित ही मेरे प्रिय पति हैं, मुस्कराकर कहा—'सौम्य ! उस समय शाम्ब ने अपनी प्रिया यज्ञवती का सन्देश पालन करने के विचार से हंस को उस प्रकार से बाँधा था ! इससे जान

कुमारावेवमन्योन्यपुरातनजननानामधेये परिचिते परस्परज्ञानाय साभिज्ञमुक्त्वा मनोजरागपूर्णमानसौ बभूवतुः। (१४)

तस्मिन्नवसरे मालवेन्द्रमहिषी परिजनपरिवृता दुहितृकेलीविलोकनाय तं देशमवाप। बालचन्द्रिका तु तां दूरतो विलोक्य ससम्भ्रमं रहस्यनिर्भेदभिया हस्त-

---

जगति, पण्डिताः = विवेकिनः, अपि, दाक्षिण्येन = स्त्रीणामाग्रहेण अन्यानुरोधेन वा, अकार्यं = अनुचितम्, कुर्वन्ति = सम्पादयन्ति, आचरन्ति वा। एवं = इत्थम्, कन्याकुमारौ = अवन्तिसुन्दरीराजवाहनौ, अन्योन्यपुराजननानामधेये = अन्योन्यस्य = परस्परस्य, पुरातनं = पूर्वतनम्, जननं = जन्म, नामधेयं = नाम चेति तथोक्ते, परस्परपूर्वजन्मनामनी, परिचिते = विज्ञाते, परस्परज्ञानाय = अन्योन्यं प्रतिबोधनाय, साभिज्ञं = अभिज्ञानेन स्मरण प्रमाणेन सहितम्. उक्त्वा = व्याहृत्य, मनोजरागपूर्णमानसौ, मनोजेन = कामेन रागेण रत्या च, पूर्णं = व्याप्तम्, मानसं हृदयम् ययोस्तौ तथोक्तौ, बभूवतुः = अभूताम् ॥ १४ ॥

तस्मिन्नवसरे··· ··· ···· ··· ···· ·· ··· ··· ···अगात्॥ १५ ॥

प्रसङ्ग—अवन्तिसुन्दर्याः मातुरागमनम् तन्निदेशात् तस्याः राजवाहनं विहाय गृहं प्रति प्रस्थानञ्च वर्ण्यते—

व्याख्या—तस्मिन्, अवसरे = काले, मालवेन्द्रमहिषी = मालवपतेः अग्रमहिषी, पत्नी वा, परिजनपरिवृता = सेवकैः सहिता, दुहितृकेलीविलोकनाय = दुहितुः सुतायाः अवन्तिसुन्दर्याः वा, केली = क्रीडा तस्याः विलोकनाय = दर्शनाय, तं = ताभ्यामधिष्ठितम्, देशं = स्थानम् उपवनमित्यर्थः, अवाप = आगतवती। बालचन्द्रिका = पुष्पोद्भवस्त्री, तु, तां = महाराज्ञीम्, दूरतः = विप्रकृष्टतः, विलोक्य = प्रेक्ष्य, ससम्भ्रमं = सम्भ्रमेण सहितम्, रहस्यनिर्भेदभिया रहस्यस्य = गोपनीयस्य, निर्भेदः = प्रकटनम्, तस्य भिया = भयेन, हस्तसंज्ञया = करसंकेतेन,

---

पड़ता है कि विद्वान् भी इस संसार में आग्रह के वशीभूत होकर अनुचित कार्य कर बैठते हैं। इस प्रकार राजकुमार और राजकुमारी दोनों अपने पूर्व जन्म के स्मरण से परस्पर रागानुरक्त हो गए ॥ १४ ॥

उसी समय मालव नरेश की पत्नी परिजनों के साथ पुत्री का खेल देखने के लिए वहाँ आ पहुँची। बालचन्द्रिका महारानी को दूर से ही देख कर, रहस्य

संज्ञया पुष्पोद्भवसेव्यमानं राजवाहनं वृक्षवाटिकान्तरितगात्रमकरोत्। सा मानसारमहिषी सखीसमेताया दुहितुर्नानाविधां विहारलीलामनुभवन्ती क्षणं स्थित्वा दुहित्रा समेता निजागारगमनायोद्युक्ता बभूव। मातरमनुगच्छन्ती अवन्तिसुन्दरी राजहंसकुलतिलक, विहारवाञ्छया केलिवने मदन्तिकमागतं भवन्तमकाण्डे एव विसृज्य मया समुचितमिति जनन्यनुगमनं क्रियते—तदनेन भवन्मनोरागोऽन्यथा

पुष्पोद्भवसेव्यमानं = पुष्पोद्भवेन संसेवितम्, राजवाहनं = राजहंसतनयम्, वृक्षवाटिकान्तरितगात्रम् = वृक्षवाटिकायां = गृहोपवने, अन्तरितं = गोपितम्, गात्रं = देहम् यस्य सः तं तथाविधम्, अकरोत् = कृतवती। सा, मानसारमहिषी = मालवपतिपत्नी, सखीसमेतायाः = सहचरीसहितायाः, दुहितुः कन्यकायाः, नानाविधां = अनेक प्रकारम्, विहारलीलां = विलासक्रीडाम्, अनुभवन्ती = पश्यन्ती, क्षणं = मुहूर्तम्, स्थित्वा = स्थितिं कृत्वा, दुहित्रा = पुत्र्या, समेता = सहिता, निजागारगमनाय = स्वभवनगमनाय, उद्युक्ता = उद्यता, बभूव = अभूत्। मातरं = जननीम्, अनुगच्छन्ती = अनुव्रजन्ती, अवन्तिसुन्दरी = मालवेशकन्यका, राजहंस कुलतिलक = राजहंस नाम्नः भूपतेः, कुले = वंशे, तिलकः = श्रेष्ठः, तिलकः = भूषणमिव वा, विहारवाञ्छया = विहर्तुं कामनया, केलिवने = क्रीडोपवने, मदन्तिकं = मन्निकटम्, आगतं = उपस्थितम्, भवन्तं = त्वाम्, अकाण्डे = अनवसरे, एव, विसृज्य = हित्वा, जनन्यनुगमनं = मातुः अनुसरणम्, समुचितम् = युक्तम्, इति हेतोः, मया = अवन्तिसुन्दर्या, मातुरनुगमनं क्रियते। तद् अनेन = मत्कृतेन कार्येण, भवन्मनोरागः = त्वन्मानसानुरक्तिः, अन्यथा = विपरीतः मा

खुल जाने के भय से पुष्पोद्भव से सेवित राजकुमार राजवाहन को हाथ का संकेत देकर वृक्ष की ओट में छिप जाने को कह दिया। वह मानसार की पत्नी महारानी सखियों के साथ कुछ समय तक पुत्री की विहार लीला देख कर उसके सहित घर जाने को उद्यत हो गई। अपनी माता के पीछे-पीछे चलती हुई अवन्तिसुन्दरी—'हे राजहंसकुलतिलक! विहार की इच्छा से केलिवन में मेरे पास आए हुए आपको बीच में ही छोड़ कर औचित्य के विचार से माता का अनुगमन कर रही हूँ, अतः मेरे इस व्यवहार से आपका प्रेम अन्यथा नहीं होना चाहिए, ऐसा कह

मा भूत्' इति मरालमिव कुमारमुद्दिश्य समुचितालापकलापं वदन्ती पुनः पुनः परिवृत्तदीननयना वदनं विलोकयन्ती निजमन्दिरमगात् । (१५)

तत्र हृदयवल्लभकथाप्रसङ्गे बालचन्द्रिकाकथिततदन्वयानामधेया मन्मथबाणपतनव्याकुलमानसा विरहवेदनया दिने दिने बहुलपक्षशशिकलेव क्षामक्षामाहारा-

---

भूत् । इति = इत्थम्, मरालमिव = हंसमिव, कुमारं = राजवाहनम्, उद्दिश्य = अभिलक्ष्य, समुचितालापकलापं = आलापस्य = संभाषणस्य, कलापः = समूहः, समुचितश्चासौ आलापकलापः समुचितालापकलापः तं तथोक्तम्, वदन्ती = कथयन्ती, पुनः-पुनः = मुहुः-मुहुः, परिवृत्तदीननयना = परिवृत्ते विवृत्ते दीननयने विषण्णनेत्रे यस्याः सा तथोक्ता, वदनं = राजवाहनस्य आननम्, विलोकयन्ती = पश्यन्ती, निजमन्दिरं = स्वभवनम्, अगात् = गतवती ॥ १५ ॥

विशेष––अत्र विप्रलम्भश्रृङ्गारः आस्वाद्यते ।

तत्र··· ···· ··· ··· ··· ··· ··· ··· ··· ···· ····बभूव ॥ १६ ॥

प्रसङ्गः––राजवाहनेन वियुक्तायाः अवन्तिसुन्दर्याः विरहवेदनाजन्यस्थितिं वर्णयन्नाह कविः––

व्याख्या––तत्र = निजगृहे, हृदयवल्लभकथाप्रसंगे = हृदयवल्लभस्य = दयितस्य राजवाहनस्य कथाप्रसंगे = वृत्तविषये, बालचन्द्रिकेति = बालचन्द्रिकया = पुष्पोद्भवपत्न्या, कथिते = व्याहृते, तस्य = राजवाहनस्य, अन्वयनामधेये = कुलनाम्नी यस्यै सा तथोक्ता, मन्मथेति = मन्मथस्य = कामस्य, बाणपतनेन = शरप्रहारेण, व्याकुलं = विकलम्, मानसं = हृदयं यस्याः सा तथोक्ता, विरहवेदनया = वियोगव्यथया, दिने-दिने = प्रतिदिनम्, बहुलपक्षशशिकलेव = बहुलपक्षे = कृष्णपक्षे या शशिकला = इन्दुलेखा सा इव = यथा क्षामक्षामा =

कर, हंस सदृश राजकुमार को उद्देश्य करके अवसरानुसार बातें करती हुई बार-बार मुड़कर राजवाहन को देखती हुई दुःखी मन से अपने घर चली गई ॥ १५ ॥

अवन्तिसुन्दरी घर जाने के बाद, प्रियतम के कथाप्रसंग में बालचन्द्रिका के द्वारा राजवाहन का नाम-गोत्र आदि सुनती कामदेव के बाण से विकल होती, भोजन आदि समस्त व्यापार छोड़कर, विरह वेदना के कारण दिनोंदिन कृष्णपक्ष

दिसकलं व्यापारं परिहृत्य रहस्यमन्दिरे मलयजरसक्षालितपल्लवकुसुमकल्पित-तल्पलतावर्तिततनुलता बभूव। (१६)

तत्र तथाविधावस्थामनुभवन्तीं मन्मथानलसन्तप्तां सुकुमारीं कुमारीं निरीक्ष्य खिन्नो वयस्यगणः काञ्चनकलशसञ्चितानि हरिचन्दनोशीरघनसारमिलितानि तद-भिषेककल्पितानि सलिलानि बिसतन्तुमयानि वासांसि च नलिनीदलमयानि तालवृन्तानि च सन्तापहरणानि बहूनि संपाद्य तस्याः शरीरमशिशिरयत्। तदपि

अति दुर्बला, आहारादिसकलव्यापारं = आहारः भोजनं आदिः यस्य सकलव्यापारस्य तम्, परिहृत्य = त्यक्त्वा, रहस्यमन्दिरे = एकान्तभवने, मलयजरसेन = चन्दनजलेन, क्षालितैः = आर्द्रैः, पल्लवैः = किसलयैः, कुसुमैश्च = पुष्पैश्च, कल्पितं = विनिर्मितम्, यत्तल्पं = शय्या तत्र आवर्तिनी = लुठन्ती, तनुलता = देहयष्टिः यस्याः सा तथोक्ता, बभूव = जाता ॥ १६ ॥

विशेषः—अत्र वियोग शृङ्गारः आस्वाद्यः रसः।

तत्र ... ...विहन्यते ॥ १७ ॥

प्रसङ्गः—विरहकातरा अवन्तिसुन्दरी सखीनामुपचारश्च कत्रिना वर्ण्यते—

व्याख्या—तत्र = रहस्यमन्दिरे, तथाविधावस्थां = विरहव्याकुलस्थितिम्, अनुभवन्तीं = गच्छन्तीम्, मन्मथानलसन्तप्तां = कामाग्निना दह्यमानाम्, सुकुमारीं कोमलाम्, कुमारीं = राजपुत्रीम्, निरीक्ष्य = प्रेक्ष्य, खिन्नः = दुःखी, वयस्यागणः = सखीसमुदायः काञ्चनकलशसंचितानि = सुवर्णस्य कुम्भ एकत्रितानि, हरिचन्दनञ्च उशीरञ्च घनसारश्चेति हरिचन्दनोशीरघनसाराः तैः मिलितानि = युक्तानि, तदभिषेककल्पितानि तस्याः = अवन्तिसुन्दर्याः अभिषेकाय कल्पितानि = रचितानि, सलिलानि = जलानि, बिसतन्तुमयानि = कमलसूत्रप्रचुराणि, वासांसि = वस्त्राणि

की चन्द्रकला की भाँति क्षीण होती हुई एक मात्र कुसुम शय्या पर पड़ी रहने लगी ॥ १६ ॥

काम ज्वर से सन्तप्त राजकुमारी की दशा देख कर उसकी सखियाँ व्याकुल हो उठीं। और स्वर्ण कलश में संचित कपूर चन्दन आदि मिले जल, कमलसूत्र से निर्मित वस्त्र एवं कमलिनी पत्र के पङ्खे की हवा आदि संतापहारी साधनों से

शीतलोपचरणं सलिलमिव तप्ततैले तदङ्गदहनमेव समन्तादाविश्चकार । किंकर्तव्यतामूढां विषण्णां बालचन्द्रिकामीषदुन्मीलितेन कटाक्षवीक्षितेन बाष्पकणाकुलेन विरहानलोष्णनिःश्वासग्लपिताधरया नताङ्ग्या शनैः शनैः सगद्गदं व्यालपि—'प्रियसखि' कामः कुसुमायुधः पञ्चबाण इति नूनमसत्यमुच्यते । इयमहमयोमयैरसंख्यैरिषुभिरनेन हन्ये । सखि, चन्द्रमसं वडवानलादतितापकरं

च, नलिनीदलमयानि = नलिन्याः कमलिन्याः, दलानि = पत्राणि, तन्निर्मितानि तालवृन्तानि च, सन्तापहरणानि = मन्मथज्वरविनाशकानि, बहूनि = वस्तूनि, सम्पाद्य = सुनियाज्य, तस्याः = अवन्तिसुन्दर्याः, शरीरं = गात्रम्, अशिशिरयत् = शीतलीचकार । तदपि, सखीभिः सम्पादितमपि शीतलोपचरणम्, तप्ततैले = अत्युष्णस्नेहे, सलिलं = जलमिव, समन्तात् = सर्वतः, तदङ्गदहनमेव तस्याः = अवन्तिसुन्दर्याः, अङ्गे = शरीरे, दहनमेव = ज्वलनमेव, आविश्चकार = कारयामास । किंकर्त्तव्यविमूढां = किं करणीयमत्रेति निश्चेतुमक्षमा, विषण्णां = खिन्नाम्, बालचन्द्रिकां = पद्मोद्भवप्रियाम्, ईषदुन्मीलितेन = किञ्चिद्विकसितेन, बाष्पकणाकुलेन = उष्णाश्रुविन्दुभिः व्याप्तेन, कटाक्षवीक्षितेन = तिर्यग्विलोकनेन, विरहानलेति विरहानलस्य = वियोगाग्नेः, उष्णनिःश्वासेन = उष्णमुखपवनेन, ग्लपितः = म्लानः अधरः यस्याः सा तया तथोक्तया, नताङ्ग्या = विनतशरीरया अवन्तिसुन्दर्याः, शनैः-शनैः = मन्दं मन्दम्, सगद्गदम् = सावरुद्धकण्ठम्, व्यलापि= अभाषि, 'प्रियसखि ! = प्रिय वयस्ये, कामः = मनोजः, कुसुमायुधः पुष्पसायकः, पञ्चबाणः (तस्य) पञ्चसंख्याका एव बाणाः सन्ति, इति = इदम्, नून = ध्रुवम्, असत्यं = अनृतम्, उच्यते = कथ्यते, जनैः, इति । इयं = सम्मुखस्था, अहं = अवन्ति

उसका ताप कम करने का प्रयत्न करने लगीं । फिर भी, राजकुमारी के लिए वह शीतोपचार खौलते तेल में जल विन्दु जैसा ही सिद्ध होकर रह गया । राजकुमारी ने किंकर्त्तव्यविमूढ़ हुए विषण्णानना बालचन्द्रिका को थोड़ा खुले कटाक्षों से देख कर निश्वास लेकर गद्‌गदवाणी में धीरे-धीरे कहा—'हे सखि !, कामदेव को, जो लोग कुसुमायुध और पञ्चबाण कहते हैं, लगता है वह निश्चित ही असत्य है । मुझे तो यह काम अपने असंख्य लौहवत् कठोर बाणों से मार रहा है । सखि !,

मन्ये । यदस्मिन्नन्तःप्रविशति शुष्यति पारावारः, सति निर्गते तदैव वर्धते । दोषाकरस्य दुष्कर्म किं वर्ण्यते मया । यदनेन निजसोदर्याः पद्मालयायाः गेहभूतमपि कमलं विहन्यते । (१७)

विरहानलसंतप्तहृदयस्पर्शेन नूनमुष्णीकृतः स्वल्पो भवति मलयानिलः । नव-

---

सुन्दरी, अयोमयैः = लौहविनिर्मितैः, असंख्यैः = संख्यातुमयोग्यैः, इषुभिः = शरैः, अनेन = कामेन, हन्ये = हतास्मि । सखि = वयस्ये, चन्द्रमसं = शशांकम्, बडवानलात् = समुद्रमध्यवर्तिपावकात्, अतितापकरं = अधिकसंतापदायकम्, मन्ये = अनुभवामि । यत् = यतः, अन्तःप्रविशति = अस्तंगते, अस्मिन् = शशांके, पारावारः = सिन्धुः, शुष्यति = शुष्कतां याति, निर्गते = उदिते, सति, तदैव = तत्क्षणमेव, पारावारः वर्धते = वृद्धिं याति । दोषाकरस्य-दोषस्य = अवगुणस्य, आकरः = निधिः, यद्वा दोषाम् = रात्रिम् करोतीति दोषाकरः, तस्य दोषाकरस्य = चन्द्रमसः, दुष्कर्म = दुष्कार्यम्, मया = अवन्तिसुन्दर्या, किं वर्ण्यते ? यदनेन = चन्द्रमसा, निजसोदर्याः = स्वभगिन्याः, पद्मालयायाः = लक्ष्म्याः, गेहभूतम् = निवासभूतम्, अपि, कमलं = सरसिजम्, विहन्यते = मुकुलीक्रियते । लक्ष्मीचन्द्रमसोः उत्पत्तिः समुद्रादेवेति पौराणिकप्रसिद्धिः । लक्ष्मी कौस्तुभमणिः··· श्लोकः प्रमाणम् ॥ १७ ॥

विशेषः—वियोगश्रृङ्गारः । श्लेषानुप्रासादयोऽलंकाराश्च ।

विरहानल० ··· ··· ···· ··· ··· ···· ··· ···किं करोमि ॥ १८ ॥

प्रसङ्गः—अवन्तिसुन्दरी स्वविरहदशामुपवर्णयति ।

व्याख्या—विरहानलेन = वियोगाग्निना, सन्तप्तस्य = प्रतप्तस्य, हृदयस्य =

चन्द्रमा वडवानल से भी अधिक संतापदायक लग रहा है । तभी तो उसके प्रवेश करने से समुद्र सूखने और निकल जाने से बढ़ने लगता है । इस दोषाकर, (रात्रिकर, दोषों का कोश) चन्द्रमा के दुष्कर्म का वर्णन कहाँ तक करूँ ! यह तो अपनी भगिनी लक्ष्मी के भी निवासगृह कमल को नष्ट (संकुचित) कर देता है ॥ १७ ॥

पल्लवकल्पितं तल्पमिदमनङ्गाग्निशिखापटलमिव सन्तापं तनोस्तनोति। हरिचन्दनमपि पुरा निजयष्टिसंश्लेषवदुरगवदनलिप्तोल्वणगरलसंकलितमिव तापयति शरीरम्। तस्मादलमलमायासेन शीतलोपचारे। लावण्यजितमारो राजकुमार एवागदंकारो मन्मथज्वरापहरणे। सोऽपि लब्धुमशक्यो मया। किं करोमि' इति। (१८)

उरसः, संस्पर्शेन = संपर्केण, नूनं = ध्रुवम्, उष्णीकृतः = तप्तीकृतः, मलयानिलः = दक्षिणदिग्वातः, स्वल्पीभवति = संकुचितो भवति। नवपल्लवकल्पितं = किसलयेन विरचितम्, इदम् = एतत्, तल्पम् = पर्यंकम्, अनङ्गाग्निशिखापटलमिव = कामाग्निशिखासमूहमिव, तनोः = शरीरस्य, सन्तापं = दाहम्, तनोति = करोति। निजयष्टिसंश्लेषेति निजयष्ट्याः = स्वाश्रयशाखायाः संश्लेषवतः = संसर्गिणः, उरगस्य = सर्पस्य, रदनेन = दन्तेन, लिप्तं = युक्तम्, यदुल्वणं = भयानकम्, गरलं = विषम्, तेन संकलितम्, इव = यथा, हरिचन्दनं = मलयचन्दनम्, अपि, शरीरं = गात्रम्, तापयति = ज्वालयति। तस्मात् = तत्कारणात्, शीतलोपचारे = शिशिरकरणोपाये, आयासेन = परिश्रमेण, अलम् = व्यर्थम्, एव, युष्माभिः निवर्त्यतामिति सारः। लावण्यजितमारः लावण्येन = सौंदर्येण, जितः = तिरस्कृतः, मारः = कामदेवः, येन सः, राजकुमारः = राजवाहनः, एव, मन्मथज्वरापहरणे = कामज्वरापनयने, अगदंकारः = न गदं अगदं तत् करोतीति, अगदंकारः = वैद्यः चिकित्सको वा, सोऽपि = राजकुमारोऽपि, मया = अवन्तिसुन्दर्या, लब्धुं = प्राप्तुम्, अशक्य = न शक्यः दुष्प्राप्यः इति। अतः किं = कथम्, करोमि = आचरामि। केनोपायेन विरहपीडाशमनं करोमि? इति ॥ १८ ॥

मेर विरहानल से संस्पृष्ट होकर मलयानिल निश्चित ही प्रभावहीन हो जाता है! किशलयों से रचित यह शय्या शरीर में कामाग्नि के ज्वाला समूह सी कष्ट देती है!, मलय चन्दन भी मानों साँपों के संपर्क से विषाक्त होने के कारण शरीर को सताप दे रहा है! इस लिए शीतोपचार में श्रम करना व्यर्थ है! मेरे कामज्वर को राजकुमार ही दूर कर सकते हैं! परन्तु वे अप्राप्य हैं। करूँ तो क्या करूँ! ॥ १८ ॥

बालचन्द्रिका मनोजज्वरावस्थापरमकाष्ठां गतां कोमलाङ्गीं तां राजवाहन-लावण्याधीनमानसामनन्यशरणामवेक्ष्यात्मन्यचिन्तयत्—

'कुमारः सत्वरमानेतव्यो मया। नो चेदेनां स्मरणीयां गतिं नेष्यति मीन-केतनः। तत्रोद्याने कुमारयोरन्योन्यावलोकनवेलायामसमसायकः समं मुक्तसायको-ऽभूत्। तस्मात्कुमारानयनं सुकरम्' इति। ततोऽवन्तिसुन्दरीरक्षणाय समयोचित-

---

बालचन्द्रिका··· ···· ···· ···· ··· ··· ···· ····पपाठ ॥ १९ ॥

प्रसङ्गः—अवन्तिसुन्दर्याः उद्दामां विरहावस्थां विलोक्य बालचन्द्रिकया उपायः वर्ण्यते।

व्याख्या—बालचन्द्रिका = पुष्पोद्भवस्त्री, मनोजेति = परमा चासौ काष्ठा परमकाष्ठा, मनोजज्वरावस्थायाः परमकाष्ठा = आधिक्यम्, तां, गतां = प्राप्ताम्, कोमलाङ्गी = पेशलावयवाम्, तां = अवन्तिसुन्दरीम्, राजवाहनेति राजवाहन-स्य = राजहंसपुत्रस्य, लावण्ये = सौंदर्ये, अधीनं = वशीभूतम्, मानसं = हृदयम्, यस्याः सा ताम् तथोक्ताम्, अनन्यशरणां = नास्ति अन्यः अपरः शरणं यस्याः सा तां तथोक्ताम्, अवेक्ष्य = विलोक्य, आत्मनि = मनसि, अचिन्तयत् = अशोचत्, कुमारः = राजवाहनः, सत्वरं = शीघ्रम्, मया = बालचन्द्रिकया, आनेतव्यः = प्रापयितव्यः। नो चेत् = अन्यथा, मीनकेतनः = कामः, एनां = अवन्तिसुन्दरीम्, स्मरणीयां = स्मृतिशेषाम्, गतिम् = दशाम्, नेष्यति = प्राप-यिष्यति। तत्र = तस्मिन्, उद्याने = उपवने, कुमारयोः = अवन्तिसुन्दरी-राजहंसयोः, अन्योन्यस्य = परस्परस्य, अवलोकनवेलायां = दर्शनावसरे, असमसायकः = कामदेवः, समं = सहैव, (द्वयोः उपरि) मुक्तसायकः = प्रक्षिप्तशरः, अभूत् = अभवत्। तस्मात् = तस्मात् हेतोः, कुमारानयनं = राजवाहनस्य प्रापणम्, सुकरम् = समीचीनम् इति। ततः = तदनन्तरम्,

---

बालचन्द्रिका ने काम-ज्वर की पराकाष्ठा पर पहुँची और एक मात्र राज-कुमार राजवाहन की ही अभिलाषिणी कोमलाङ्गी राजकुमारी को देखकर अपने मन में सोचा—'मुझे राजकुमार को शीघ्र ही लाना चाहिए। अन्यथा कामदेव इसके प्राण ले लेगा। क्रीडोद्यान में परस्पर दर्शन के समय इन दोनों के हृदय में

करणीयचतुरं सखीगणं नियुज्य राजकुमारमन्दिरमवाप। पुष्पवाणवाणतूणीरायमानमानसोऽनङ्गतप्तावयवसंपर्कपरिम्लानपल्लवशयनमधिष्ठितो राजवाहनः प्राणेश्वरीमुद्दिश्य सह पुष्पोद्भवेन संलपन्नागतां प्रियवयस्यामालोक्य पादमूलमन्वेषणीया लतेव बालचन्द्रिकागतेति संतुष्टमना निटिलतटमण्डनीभवदम्बुजकोरकाकृतिलसदञ्जलिपुटाम् 'इतो निषीद' इति निर्दिष्टसमुचितासनासीना-

---

अवन्तिसुन्दरीरक्षणाय = अवन्तिसुन्दर्याः कल्याणाय, समयोचितकरणीयचतुरं समयं = तस्मिन् अवसरे, यदुचितं करणीयं समाचरणं तत्र चतुरम् = कुशलम्, सखीगणं = सहचरीसमूहम्, नियुज्य = संस्थाप्य, राजकुमारमन्दिरं = राजवाहननिवासगृहम्, अवाप = गतवती। पुष्पवाणतूणीरायमानमानसः पुष्पवाणस्य = कुसुमसायकस्य, ये वाणाः = शराः तेषां तूणीरवदाचरन् मानसं मनो यस्य सः, अनङ्गेति अनङ्गेन = कामेन, तप्तस्य = संज्वरितस्य, अवयवस्य = अङ्गस्य, संपर्केण = संस्पर्शेन, परिम्लानं = ग्लपितम्, यत् पल्लवशयनं = किसलयतल्पम् तत् जयोक्तम्, अधिष्ठितः = उपविष्टः, राजवाहनः = राजकुमारः, प्राणेश्वरीं = प्रियतमामवन्तिसुन्दरीम्, उद्दिश्य = अभिलक्ष्य, पुष्पोद्भवेन = निजमित्रेण, सह = साकम्, संलपन् = वार्तां कुर्वन्, आगतां = प्राप्ताम्, प्रियवयस्याम् = प्रियसखीम्, वालचन्द्रिकाम्, आलोक्य = दृष्ट्वा. अन्वेषणीया = अन्वेष्टव्या, लता = वल्लरी, इव, पादमूलं = निजचरणसमीपम्, आगता = प्राप्ता, वालचन्द्रिका, इति, सन्तुष्टमनाः = तुष्टमानसः, निटिलतटेति = निटिलतटस्य = ललाट देशस्य, मण्डनीभवत् = आभूषणीभवत् यत् अम्बुजकोरकम् = कमलकुड्मलम् तस्य आकृतिः इव लसत् = शोभायमानम्, अञ्जलिपुटम् =

समान रूप से काम जगा था। अतः कुमार का लाना आसान है! ऐसा सोचकर वह अवन्तिसुन्दरी की देखभाल में सखियों को नियुक्त करके राजकुमार के भवन में चली गई! कामदेव के बाणों के तरकसभूत हृदयवाला राजवाहन अपने संस्पर्श से मुरझाये हुए पल्लवों वाले पर्यङ्कपर बैठा हुआ पुष्पोद्भव से अवन्तिसुन्दरी के सम्बन्ध में बातें करता सहसा उपस्थित हुई बालचन्द्रिका को देख कर बोला— 'मित्र,! वांछित जड़ी की भाँति बालचन्द्रिका स्वयं ही प्राप्त हो गई। फिर,

मवन्तिसुन्दरीप्रेषितं सकर्पूरं ताम्बूलं विनयेन ददतीं तां कान्तावृत्तान्तमपृच्छत्। तया सविनयमभाणि—'देव, क्रीडावने भवदवलोकनकालमारभ्य मन्मथमथ्यमाना पुष्पतल्पादिषु तापशमनमलभमाना वामनेनेवोन्नततरुफलमलभ्यं त्वदुरः स्थलालिङ्गनसौख्यं स्मरान्धतया लिप्सुः सा स्वयमेव पत्रिकामालिख्य 'वल्लभायै नामर्पय' इति मां नियुक्तवती'। राजकुमारः पत्रिकां तामादाय पपाठ— (१९)

अञ्जलिमुकुलम्, यस्याः सा तां तथोक्ताम्, प्रणमन्तीम् बालचन्द्रिकाम्, इतः = अत्र स्थाने, निषीद = उपविश, इति, निर्दिष्टसमुचितासनासीनाम् = निर्दिष्टे = संकेतिते सुमुचिते = योग्ये, आसने = स्थाने आसीनां = उपविष्टाम्, अवन्तिसुन्दरी प्रेषितं = अवन्तिसुन्दर्या प्रहितम्, सकर्पूरं = कर्पूरेण सहितम्, ताम्बूलम्, विनयेन = नम्रतया, (राजवाहनाय) ददतीं = समर्पयन्तीम्, तां = बालचन्द्रिकाम्, कान्तावृत्तान्तम् = अवन्तिसुन्दर्याः समाचारम्, अपृच्छत् = पृष्टवान्। तया = बालचन्द्रिकया, सविनयं = विनयेनसहितं यथा स्यात्तथा, अभाणि = अवादि – 'देव ! = महाराज !, क्रीडावने = विहारोद्याने, भवदवलोकनकालं = भवतोऽवलोकनं भवदवलोकनम् स कालो यस्य स तं तथोक्तम्, आरभ्य, मन्मथमथ्यमाना = कामेन सन्तप्यमाना, पुष्पतल्पादिषु = कुसुमशयनादिषु, तापशमनं = संज्वरशान्तिम्, अलभमाना = अप्राप्नुवती, अलभ्यं = अप्राप्यम्. उन्नततरुफलं = विशालस्य वृक्षस्य फलम्, वामनेन = खर्वकायेन, इव = यथा प्राप्तुमिष्यते, तद्वत् स्मरान्धतया = कामान्धतया, अप्राप्यं, त्वदुरःस्थलालिङ्गनसौख्यं, तव = राजवाहनस्य, उरःस्थलस्य = वक्षःस्थलस्य यदालिङ्गनं तस्य सौख्यं = आनन्दम्, लिप्सुः = लब्धुमिच्छुः, सा = तव कान्ता, स्वयमेव = आत्मनैव, पत्रिकां = पत्रम्, आलिख्य = विलिख्य, वल्लभाय = दयिताय, एनां = पत्रिकाम्, अर्पय = प्रापय,

---

प्रणाम करती हुई बालचन्द्रिका को अपने पास बिठाकर उसके द्वारा दिये जाते हुए प्रिया से प्रेषित पान का बीड़ा लेकर अपनी प्रियसा का वृत्तान्त पूछा। बालचन्द्रिका ने विनयपूर्वक कहा—देव !, क्रीड़ोद्यान में आपको देखने के समय से ही कामज्वर से संतप्त कुसुमशय्या पर भी दाह का अनुभव करती हुई, आप की प्रेयसी ने, वामन के द्वारा अलभ्य दूर स्थित फल की भाँति आपके हृदयालिङ्गन

'सुभग कुसुमसुकुमारं जगदनवद्यं विलोक्य ते रूपम्।
मम मानसमभिलषति त्वं चित्तं कुरु तथा मृदुलम्॥" (२०)

इति पठित्वा सादरमभाषत—'सखि, छायावन्मामनुवर्तमानस्य पुष्पोद्भवस्य वल्लभा त्वमेव तस्या मृगीदृशो बहिश्चराः प्राणा इव वर्तसे। त्वच्चातुर्यमस्यां

इति, मां = स्वकीयां सहचरीम्, नियुक्तवती = न्ययुङ्क्त। राजकुमारः = राजवाहनः, तां = बालचन्द्रिकया दीयमानाम्, पत्रिकाम् = पत्रम्, आदाय = गृहीत्वा, पपाठ = पठितुमारब्धवान्॥ १९॥

सुभग... ... ... मृदुलम्॥ २०॥

प्रसङ्गः—राजवाहनः अवन्ति सुन्दर्याः पत्रिकां पठति—

व्याख्या—सुभग = सुन्दर, जगदनवद्यं जगति = लोके अनवद्यं = अनिन्द्यम्, कुसुमसुकुमारं = कुसुमं = प्रसूनम् तदिव सुकुमारं = कोमलम्, ते = तव; रूपं स्वरूपम् सौंदर्यम्, विलोक्य = प्रेक्ष्य, मम = अवन्तिसुन्दर्याः, मानसं = मनः, अभिलषति = कामयते, त्वामिति शेषः। अत एव त्वं = भवान्, चित्तं = स्वकीयं हृदयम् तथा = स्वरूपवत्, मृदुलं = मसृणम्, कुरु = विधेहि। अर्थात् मां लब्धुं यत्नं कुरु॥ २०॥

इति.... .... आचर॥ २१॥

प्रसङ्गः—पत्रिकां पठित्वा राजवाहनः बालचन्द्रिकां वदति—

व्याख्या—इति = पूर्वोक्तां पत्रिकाम्, पठित्वा, सादरं = आदरेण सहितम् यथा स्यात् तथा, अभाषत = अवदत्, सखि = सहचरी, छायावत् = प्रतिविम्बवत्, मां = राजवाहनम्, अनुवर्तमानस्य = अनुसरतः, पुष्पोद्भवस्य = मन्मित्रस्य, वल्लभा = प्रियतमा, त्वमेव = भवती एव, तस्याः = अवन्तिसुन्दर्याः, मृगीदृशः

को चाहती हुई स्वयं ही पत्र लिखकर आप को देने के लिए मुझे भेजा है। राजवाहन उस पत्र को लेकर पढ़ने लगा॥ १९॥

'हे प्रिय, ! संसार में अनिन्द्य कुसुम सुकुमार आपके सौन्दर्य को देख कर मेरा हृदय आपको पाने की कामना करने लगा है! अतः आप स्वरूप के सदृश अपने हृदय को भी कोमल बनावें॥ २०॥

क्रियालतायामालवालमभूत्। यत्तवाभीष्टं येन प्रियामनोरथः फलिष्यति तदखिलं करिष्यामि। नताङ्ग्या मन्मनःकाठिन्यमाख्यातम्। यदा केलिवने कुरङ्गलोचना लोचनपथमवर्तत तदैषापहृतमदीयमानसा सा स्वमन्दिरमगात्। सा चेतसो माधुर्यकाठिन्ये स्वयमेव जानाति। दुष्करः कन्यान्तःपुरप्रवेशः। तदनुरूपमुपायमुपपाद्य

= मृगलोचनायाः, वहिश्चराः = गात्राद् वहिः संचरणशीलाः, प्राणाः = जीवितम्, इव वर्तसे = असि। अस्याः = अवन्ति सुन्दर्याः, क्रियालतायां क्रिया = मत्प्रयोजनम्, सैव लता = वल्ली तस्याम्, त्वच्चातुर्यम् = तव चतुरता, आलवालं = मण्डलाकारजलसेकभूमिः, अभूत् = अभवत्। यत् तव = भवंत्याः, अभीष्टं = वाञ्छितम्, येन च = उपायेन, प्रियमनोरथः = प्रियायाः मनोकामः, फलिष्यति = सफलीभविष्यति, तत्, अखिलं = समस्तम् (कार्यं) करिष्यामि = विधास्यामि। नताङ्ग्या = सुन्दर्या, मन्मनः = मम मनसः, काठिन्यं = कठोरता, आख्यातं = कथितम्। यदा = यस्मिन् काले, केलीवने = क्रीडोद्याने, कुरङ्गलोचना = हरिणनेत्री, लोचनापथं = नयनमार्गम्, अवर्त्तत = आगता, तदा = तस्मिन् समये, एव, अपहृतमदीयमानसा अपहृतं = चोरितम् मदीयं = मम मानसं = हृदयम् यया सा तथोक्ता, एषा सा = अवन्तिसुन्दरी, स्वमन्दिरं = निजगृहम्, अगात् = गतवती, सा = अवन्तिसुन्दरी, स्वचेतसः = निजमानसस्य, माधुर्यकाठिन्ये = माधुर्यं काठिन्यञ्च, मृदुताकर्कशत्वे, स्वयमेव जानाति। कन्यान्तःपुरप्रवेशः—कन्यायाः अन्तःपुरे गमनम्, दुष्करः = कठिनः। तदनुरूपं—तस्य = प्रवेशस्य, अनुरूपं =

पत्र पढ़कर राजकुमार ने आदरपूर्वक कहा—'हे सखि !, छाया की तरह मेरा अनुगमन करने वाले पुष्पोद्भव की प्रेयसी तुम्हीं उस मृगनयनी के बहिर्भूत प्राण हो ! तुम्हारा चातुर्य उसकी क्रियारूपिणी लता के लिए थल ही है। जो तुम्हारी इच्छा हो, जिससे प्रिया का मनोरथ सिद्ध हो, वह उपाय बतलाओ। वह सब मैं करूँगा ! उस कृशोदरी ने मेरे हृदय को कठोर कहा है ! किन्तु केलीवन में जैसे ही मेरी नजरों में आयी, वैसे ही मेरे मन को चुराकर घर चली गई। अतः हृदय की कठोरता और कोमलता वही जानती है ! कन्याओं के अंतःपुर में प्रवेश कठिन है। अतः उसके अनुकूल उपाय करके कल अथवा परसों उस नताङ्गी से

श्वः परश्वो वा नताङ्गीं संगमिष्यामि। मदुदन्तमेवमाख्याय शिरीषकुसुमसुकुमारायाः यथा शरीरबाधा न जायेत तथाविधमुपायमाचर' इति। (२१)

बालचन्द्रिकापि तस्य प्रेमगर्भितं वचनमाकर्ण्य संतुष्टा कन्यापुरमगच्छत्। राजवाहनोऽपि यत्र हृदयवल्लभावलोकनसुखमलभत तदुद्यानं विरहविनोदाय पुष्पोद्भवसमन्वितो जगाम। तत्र चकोरलोचनावचितपल्लवकुसुमनिकुरम्बं महीरुह-

---

योग्यम्; उपायं = विधिम्, उपपाद्य = विधाय, श्वः = आगामिनि दिवसे, परश्वः तत्परदिने वा, नताङ्गीम् = कृशोदरीम्, संगमिष्यामि = संमिलिष्यामि। मदुदन्तं = मम समाचारम्, एवं मत्कथनानुसारम्, आख्याय = कथयित्वा, शिरीषकुसुमसुकुमारायाः—शिरीषस्य = पुष्पविशेषवृक्षस्य यत् कुसुमं = प्रसूनम् तद्वत् सुमाकुरायाः = कोमलायाः अवन्तिसुन्दर्याः, यथा = येन प्रकारेण, शरीरबाधा = संज्वरः, न जायेत = न उत्पद्येत, तथाविधं = तादृशमेव, उपायम् = उद्यमम्, आचर = कुरु॥ २१॥

बालचन्द्रिकापि... ... ... परिबभ्राम॥ २२॥

प्रसङ्गः—बालचन्द्रिकायाः प्रत्यावर्तनं राजवाहनस्य क्रियाकलापश्च कविना वर्ण्यते—

व्याख्या—बालचन्द्रिकाऽपि = पुष्पोद्भवस्त्री अपि, तस्य = राजवाहनस्य, प्रेमगर्भितं = प्रणयश्लथम्, वचनं = वाक्यम्, आकर्ण्य = श्रुत्वा, संतुष्टा = प्रीता सती, कन्यान्तःपुरम् = कन्यानिवासगृहम्, अगच्छत् = गतवती। राजवाहनोऽपि = राजकुमारोऽपि, यत्र = उपवने, हृदयवल्लभावलोकनसुखम् = प्राणेश्वरीदर्शनानन्दम्, अलभत् = प्राप्तवान्, तदुद्यानं = तदुपवनम्, विरहविनोदाय = विरहस्य वियोगस्य विनोदाय दूरीकरणाय, पुष्पोद्भवसमन्वितः = पुष्पोद्भवेन सहितः,

---

मिलूँगा! इस प्रकार मेरा समाचार सुनाकर, शिरीषकोमला उसके शरीर को जिस प्रकार कष्ट न हो, वही उपाय करना॥ २१॥

बालचन्द्रिका भी राजकुमार का प्रेमगर्भित संदेश लेकर संतुष्टहृदय कन्या के अंतःपुर में वापस चली आयी। और राजवाहन पुष्पोद्भव के साथ जिस क्रीडोद्यान में प्रिया से भेंट हुई थी वहीं विरहविनोदार्थ चला गया। वहाँ जाकर,

समूहं शरदिन्दुमुख्या मन्मथसमाराधनस्थानं च नताङ्गीपदपङ्क्तिचिह्नितं शीतल-सैकततलं च सुदतीभुक्तमुक्तं माधवीलतामण्डपान्तरपल्लवतल्पं च विलोकयं-ल्ललनातिलकविलोकनवेलाजनितशेषाणि स्मारंस्मारं मन्दमारुतकम्पितानि-नवचूतपल्लवानि मदनाग्निशिखा इव चकितो दर्शंदर्शं मनोजकर्णेजपानामिव

जगाम = अगच्छत् । तत्र = आक्रीडे, चकोरेति – चकोरस्य इव दीर्घे आयते लोचने नयने यस्याः सा, तया, अवचितानि = छिन्नानि, पल्लवानां = किशलया-नाम्, कुसुमानां = पुष्पाणाम् च निकुरम्बाणि = समूहाः यस्य सः तं तथाविधम्, महीरुहसमूहं = वृक्षव्रातम्, शरदिन्दुमुख्याः = शरच्चन्द्रवदनायाः मन्मथसमाराधन-स्थानं = कामपूजनदेशम्, च, नताङ्गीपदपङ्क्तिचिह्नितं = नताङ्ग्याः सुन्दर्याः, पदपङ्क्त्या = चरणचिह्नेन चिह्नितम् = लाञ्छितम्, शीतलसैकततलं शिशिर-बालुकामयभूभागम्, च, सुदतीभुक्तमुक्तम् = सुदत्या शोभनदन्तया आदौ भुक्तं आस्वादितम्, पश्चाच्च, मुक्तं = त्यक्तम्, माधवीति० माधवीलतायाः = वासन्त्याः मण्डपस्य निकुञ्जस्य, अन्तरे = मध्ये, यत् पल्लवतल्पं = किसलयशयनम्, तच्च, विलोकयन् = पश्यन्, ललनेति = ललनातिलकस्य = नारीभूषणस्य, (अवन्ति सुन्दर्याः) विलोकनवेलायां = दर्शनसमये, जनितः = उत्पादितः, शेषः अवशिष्टांशः येषां तानि तथाभूतानि वाक्यानि, स्मारं-स्मारं = पुनः पुनः स्मृत्वा, मन्दमारुत-कम्पितानि = मन्थरपवनेन चालितानि, नवचूतपल्लवानि = नूतनाम्रकिसलयानि, मदनाग्निशिखा = कामाग्निज्वाला, इव, चकितः = विस्मितः, यथा स्यात्तथा, दर्शं दर्शम्, मुहुः दृष्ट्वा, मनोजकर्णेजपानां मनोजस्य = कामस्य कर्णेजपाः दुर्मन्त्रिणः तेषाम् मदनोद्दीपकानामिव, कोकिलकीरमधुकराणां, पिकशुकभ्रमराणाम्,

---

चकोर लोचना राजकुमारी ने जिस वृक्ष से फूल चुने थे उसे, जहाँ मन्मथपूजन किया था उसे, जहाँ उसके पैरों के चिह्न बने हुए थे उस शीतल सैकततल को, तथा जहाँ उसने शयन किया था उस माधवीकुञ्ज में बने पल्लव शयन को देखता हुआ राजवाहन अवन्तिसुन्दरी के मिलन के समय के हाव-भावों का स्मरण करता हुआ मंद पवन से आंदोलित आम्रपल्लवों को कामाग्नि की लपटों जैसा मानकर साश्चर्य देखता हुआ, कामदेव के कुमंत्री कोकिल, कीर और भ्रमरों का

कोकिलकीरमधुकराणां क्वणितानि श्रावंश्रावं मारविकारेण क्वचिदप्यवस्थातुमसहिष्णुः परिबभ्राम। (२२)

तस्मिन्नवसरे धरणीसुर एकः सूक्ष्मचित्रनिवसनं स्फुरन्मणिकुण्डलमण्डितो मुण्डितमस्तकमानवसमेतश्चतुरवेशमनोरमो यदृच्छया समागतः समन्ततोऽभ्युल्लसत्तेजोमण्डलं राजवाहनमाशीर्वादपूर्वकं ददर्श। राजवाहनः सादरम्-को भवान्,

---

क्वणितानि = रुतानि, श्रावं-श्रावं = श्रुत्वा-श्रुत्वा, मारविकारेण = मदनोद्दीपनतया, क्वचिदपि = कुत्रापि, अवस्थातुं = स्थितिं प्राप्तुम्, असहिष्णुः = असहनशीलः, परिबभ्राम = इतस्ततः पर्यटनं चकार ॥ २२ ॥

तस्मिन्नवसरे.... ... ...विससर्ज ॥ २३ ॥

प्रसङ्गः—ऐन्द्रजालिकस्य सहसातत्रागमनं तेन च सह पुष्पोद्भवराजवाहनयोः वार्ता वर्ण्यते।

व्याख्या—तस्मिन्नवसरे = तस्मिन् समये परिभ्रमणवेलायाम्, एकः = कश्चित्, धरणीसुरः = ब्राह्मणः, यदृच्छया = स्वेच्छया, सहसा सूक्ष्मचित्रनिवसनः = सूक्ष्मं = श्लक्ष्णं चित्रं = नानावर्णकञ्च निवसनं वस्त्रं यस्य सः तादृशः, स्फुरन्मणिकुण्डलमण्डितः = मणेः कुण्डलं मणिकुण्डलम्, स्फुरत् चञ्चत् मणिकुण्डलं यस्य सः तेन मण्डितः विभूषितः, मुण्डितमस्तकमानवसमेतः = मुण्डितं = परिवारितं, मस्तकं शिरः यस्य तादृशेन अन्येन मानवेन = नरेण समेतः = युक्तः, चतुरवेषमनोरमः = चतुरवेषेण मनोरमः सुन्दरः, समागतः = प्राप्तः, समन्ततः = परितः, अभ्युल्लसत् = अभि समन्तात् उल्लसत् प्रस्फुरत्, तेजोमण्डलं तेजसां = दीप्तीनाम्, मण्डलं = परिवेषः यस्य सः तं तादृशम् राजवाहनं = राजकुमारम्, आशीर्वादपूर्वकं = आशीर्वादेन सहितं यथा स्यात् तथा, ददर्श = अपश्यत्। राजवाहनः, तं = समुपस्थितम् पुरुषम्, सादरं = आदरेण सहितं यथा स्यात् तथा

स्वर सुनता हुआ कामाकुल होने की वजह से कहीं भी ठहरने में अक्षम होकर इधर-उधर घूमने लगा ॥ २२ ॥

उसी समय सुन्दर एवं महीन वस्त्र पहने, कानों में मणिकुण्डल धारण किए, साथ में एक मुण्डित केश मनुष्य लिए हुए एक व्यक्ति ने सहसा उपस्थित होकर,

कस्यां विद्यायां निपुणः' इति तं पप्रच्छ। स च 'विद्येश्वरनामधेयोऽहमैन्द्रजालिकविद्याकोविदो विविधदेशेषु राजमनोरञ्जनाय भ्रमन्नुज्जयिनीमद्यागतोऽस्मि' इति शशंस। पुनरपि राजवाहनं सम्यगालोक्य 'अस्यां लीलावनौ पाण्डुरतानिमित्तं किम्' इति साभिप्रायं विहस्यापृच्छत्। पुष्पोद्भवश्च निजकार्यकरणं तर्कयन्नेनमादरेण बभाषे—'ननु सतां सख्यस्याभाषणपूर्वतया चिरं रुचिरभाषणो भवान-

---

पप्रच्छ = पृष्टवान् = 'भवान् = त्वम्, कः, कस्यां, विद्यायां = कलायाम्, निपुणः = दक्षः,। स च = पुरुषश्च, अहं, विद्येश्वरनामधेयः = विद्येश्वर नामकः ऐन्द्रजालिकविद्याकोविदः = ऐन्द्रजालिकविद्यायां कोविदः = पण्डितः, विविधदेशेषु = नानाप्रान्तेषु, राजमनोरञ्जनाय = राज्ञां मनोविनोदय, भ्रमन् = अटन् उज्जयिनीम् = अवन्तीम्, अद्य = अस्मिन्काले आगतः = प्राप्तः अस्मि, इति = एवम्, शशंस = कथयामास। पुनरपि = भूयोऽपि, राजवाहनं = राजकुमारम्, सम्यक् = सुष्ठुतया, आलोक्य = दृष्ट्वा, साभिप्रायं = अभिप्रायेण सहितम्, विहस्य = हसित्वा, अपृच्छत् = पप्रच्छ = 'अस्यां = एतस्याम्, लीलावनौ = क्रीडाभूमौ, पाण्डुतानिमित्तं = मुखस्य पीतिमायाः कारणम्, किन् ? इति। पुष्पोद्भवश्च = राजवाहनसखा च, निजकार्यंकरणं = स्वकीयकार्यसम्पादकम्, (पुरुषमैन्द्रजालिकम्) तर्कयन् = भावयन्, एनं = ऐन्द्रजालिकम्, आदरेण = सत्कारेण, बभाषे = उक्तवान् = 'ननु, सतां = महात्मनाम्, सख्यस्य = मित्रतायाः, आभाषणपूर्वतया = आभाषणं आलापः पूर्वं यस्मिन् तस्य भावः तत्ता तया आभाषणपूर्वतया, चिरं = चिरकालम्, रुचिरभाषणः = रुचिरं प्रियं भाषणं = वचनम् यस्य सः तथोक्तः

तेजस्वीमुखमण्डल वाले राजवाहन को आशीर्वाद दिया। राजवाहन ने उस व्यक्ति से सादर पूछा—'आप कौन हैं ? और किस विद्या के विशेषज्ञ हैं।' उस व्यक्ति ने कहा—'मैं विद्येश्वर नामक जादूगर हूँ। विविध देशों में राजाओं के मनोरञ्जनार्थ घूमता हुआ इस समय उज्जयिनी में आया हूँ। फिर राजवाहन की ओर देख कर हँसते हुए पूछा—इस क्रीडावन में आपके मुखमण्डल के पीलेपन का क्या कारण है ? पुष्पोद्भव ने अपने कार्य में सहायता मिलने की इच्छा से प्रेरित होकर उस व्यक्ति से कहा—'सज्जनों की मित्रता बात चीत में ही हो जाती है।

स्माकं प्रियवयस्यो जातः। सुहृदामकथ्यं च किमस्ति ? केलिवनेऽस्मिन्वसन्तमहोत्सवायागताया मालवेन्द्रसुताया राजनन्दनस्यास्य चाकस्मिकदर्शनेऽन्योन्यानुरगातिरेकः समजायत। सततसंभोगसिद्धयपायाभावेनासावीदृशीमवस्थामनुभवति' इति। विद्येश्वरो लज्जाभिरामं राजकुमारमुखमभिवीक्ष्य विरचितमन्दहासो व्याजहार—'देव, भवदनुचरे मयि तिष्ठति तव कार्यमसाध्यं किमस्ति। अहमि-

---

भवान् = त्वम्, अस्माकम् = आवयोः, प्रियवयस्यः = परमसुहृत्, जातः = अभूत्। सुहृदां = मित्राणाम्, अकथ्यम् = गुह्यम्, किमस्ति ? = न किमपीत्यर्थः अस्मिन् केलीवने = क्रीडोद्याने, वसन्तमहोत्सवाय = कुसुमाकरोत्सवनिमित्तम्, आगतायाः = प्राप्तायाः, मालवेन्द्रसुतायाः = मानसारतनुजायाः, अस्य = एतस्य, राजनन्दनस्य = राजपुत्रस्य च, आकस्मिकदर्शने = सहसासाक्षात्करणे, अन्योन्यानुरागातिरेकः = परस्परं प्रेमातिशयः, समजायत = उत्पन्नोऽभवत्। परन्तु संगमसुखमद्यापि न प्राप्तम्। सततेति सततं = अनवरतम्, यः सम्भोगः तस्य सिद्धेः उपायः तस्य अभावेन = अवाप्त्या, असौ = राजनन्दनः, ईदृशीम् = पाण्डुरतामयीम्, अवस्थां = दशाम्, अनुभवति = गच्छति। विद्येश्वरः = ऐन्द्रजालिकः, लज्जाभिरामं = व्रीडयासुन्दरम्, राजकुमारमुखं = राजवाहनस्य आननम्, अभिवीक्ष्य = पूर्णतया निरीक्ष्य, विरचितमन्दहासः = विरचितः कृतः मन्दः मधुरः हासः स्मितं येन सः तादृशः, व्याजहार = प्रोक्तवान्—'देव! = स्वामिन्! भवदनुचरे = तव सेवके, मयि = विद्येश्वरे, तिष्ठति = वर्तमाने, सति, असाध्यं = दुष्करम्, तव = भवतः, कार्यं = कर्त्तव्यम्, किमस्ति = न किमपीत्यर्थः। अहं =

इस सिद्धांत के आधार पर आप निश्चित ही हमारे मित्र हैं! फिर मित्र से किसी बात को क्या छिपाना ? इस केलिवन में वसंतोत्सव मनाने के लिए आयी हुई मानसार की कन्या और इस राजकुमार में अकस्मात् प्रेम हो गया! किन्तु, उसके साथ स्थायी परिणय कैसे हो, इसका कोई उपाय न देख कर इस समय इनका मुख पीला और शरीर क्षीण हो रहा है!' पुष्पोद्भव की बात सुनकर विद्येश्वर ने राजवाहन के लज्जाभिराम मुख की ओर देखकर थोड़ा मुस्कराते हुए कहा—'देव, आपके सेवक मेरे रहते कौन सा कार्य असाध्य है! मैं जादू के बल

न्द्रजालविद्यया मालवेन्द्रं मोहयन् पौरजनसमक्षमेव तत्तनयापरिणयं रचयित्वा कन्यान्तःपुरप्रवेशं कारयिष्यामीति वृत्तान्त एष राजकन्यकायै सखीमुखेन पूर्वमेव कथयितव्यः' इति । संतुष्टमना महीपतिरनिमित्तं मित्रं प्रकटीकृत-कृत्रिमक्रियापाटवं विप्रलम्भकृत्रिमप्रेमसहजसौहार्दवेदिनं तं विद्येश्वरं सबहुमानं विससर्ज (२३)

अथ राजवाहनो विद्येश्वरस्य क्रियापाटवेन फलितमिव मनोरथं मन्यमानः

विद्येश्वरः इन्द्रजालविद्यया = मायिकविद्यया, मालवेन्द्रं = मानसारम्, मोहयन् = वशीकुर्वन्, पौरजनसमक्षमेव = पुरवासिनां सम्मुखे एव, तत्तनयापरिणयं = अवन्ति-सुन्दर्याः विवाहम्, रचयित्वा = कारयित्वा, कन्यान्तःपुरप्रवेशं = कन्यानिवास-स्थाने उपस्थितिम्, कारयिष्यामि = संपादयिष्यामि, इति । एषः = मयोक्तः, वृत्तान्तः = उदन्तः, राजकन्यकायै = अवन्तिसुन्दर्यै, सखीमुखेन = वयस्या द्वारा, पूर्वमेव = प्रागेव, कथयितव्यः = सूचनीयः प्रेष्यः ! सन्तुष्टमनाः = प्रसन्नहृदयः, महीपतिः = राजवाहनः, अनिमित्तं = निष्कारणम्, मित्रम् = वयस्यम्, प्रकटी-कृतेति प्रकटीकृतं = प्रकाशीकृतम्, कित्रिमक्रियायां = ऐन्द्रजाले, पाटवं = कौशलम् येन सः तं तथोक्तम्, विप्रलम्भेति विप्रलम्भः = प्रतारणम्, कृत्रिमप्रेम = कपटानुरागः सहजसौहार्दं = स्वाभाविकमैत्रीम्, तानि वेत्तीति सः तम् तथोक्तम्, तं = विद्येश्वरम् सबहुमानं = ससम्मानम्, विससर्ज = गन्तुमनुमोदितवान् ॥ २३ ॥

अथ····· ··· ··· ··· ···· ··· ··· ···समचरन् ॥ २४ ॥

प्रसङ्गः—विद्येश्वरे गते सति सपुष्पोद्भवस्य राजवाहनस्य गृहगमनं ततश्च ऐन्द्रजालिकेन मायिकविद्या प्रदर्शनादिकं कविना वर्ण्यते—

व्याख्या—अथ = तदनन्तरम्, राजवाहनः = राजहंससुतः, विद्येश्वरस्य =

से मानसार को मोहित करके नागरिकों के समक्ष ही उसकी कन्या का परिणय आप से कराकर कन्या अंतःपुर में प्रवेश करा दूँगा । किन्तु इस समाचार को सखी द्वारा राजकुमारी को पहले ही कहला दीजिए । यह सुनकर राजवाहन को अत्यन्त संतुष्टि मिली । फिर उसने अपने इस सहज मित्र जादूगर को आदरपूर्वक विदा कर दिया ॥ २३ ॥

पुष्पोद्भवेन सह स्वमन्दिरमुपेत्य सादरं बालचन्द्रिकामुखेन निजवल्लभायै महीसुरक्रियमाणं संगमोपायं वेदयित्वा कौतुकाकृष्टहृदयः 'कथमिमां क्षपां क्षपयामि' इत्यतिष्ठत्। परेद्युः प्रभाते विद्येश्वरो रसभावरीतिगतिचतुरस्तादृशेन महता निजपरिजनेन सह राजभवनद्वारान्तिकमुपेत्य दौवारिकनिवेदितनिजवृत्तान्तः सहसोपगम्य सप्रणामम् 'ऐन्द्रजालिकः समागतः' इति द्वास्थैर्विज्ञापितेन तद्दर्शन-

---

मायिकस्य, क्रियापाटवेन = कर्मचातुर्येण, मनोरथं = मनोकामम्, फलित = प्राप्तम्, इव, मन्यमानः = जानन्, पुष्पोद्भवेन, सह = साकम्, स्वमन्दिरं = निजनिवासगृहम्, उपेत्य = आगत्य, सादरं = आदरेण सहितं, यथा स्यात्तथा, बालचन्द्रिकामुखेन = पुष्पोद्भवपत्नीद्वारा, निजवल्लभायै = स्वकान्तायै, महीसुरक्रियमाणं = ब्राह्मणेन विधीयमानम्, संगमोपायं = समागमविधिम्, वेदयित्वा = ज्ञापयित्वा, कौतुकाकृष्टहृदयः = कौतुकेन = कौतूहलेन आकृष्टं = आकर्षितम् हृदयं = मानसम् यस्य सः, तादृशः, इमां = प्रस्तुताम् क्षपां = रजनीम्, कथं = केन प्रकारेण, क्षपयामि = यापयामि, इति = एवम्, चिन्तयन्, अतिष्ठत् = स्थितवान्। परेद्यु = अपरदिवसे, प्रभाते = प्रातरवेलायाम्, विद्येश्वरः = ऐन्द्रजालिकः ब्राह्मणः, रसभावरीतिगतिचतुरः = रसाः श्रृङ्गारादयः भावाः = चेष्टादयः, रीतिगतयः = इन्द्रजालक्रियाः, तासु चतुरः = कुशलः, तादृशेन = तत्तद्गुणयुक्तेन, महता = विपुलेन, निजपरिजनेन = स्ववर्गेण, सह = साकम्, राजभवनद्वारान्तिकं = राज्ञः भूपस्य, भवनं = गृहम्, तस्य द्वारम् = प्रवेशस्थानम्, तदन्तिकं = तत्समीपम्, उपेत्य = आगत्य, दौवारिकेति = दौवारिकेन = द्वाःस्थेन, निवेदितः = विज्ञापितः, निजवृत्तान्तः = स्वकीयपरिचयः येन सः तथोक्तः, सहसा = त्वरित्, उपगम्य = उपस्थितोभूय, सप्रणामम् = प्रणामपूर्वकम्, यथा स्यात्तथा, 'ऐन्द्रजालिकः =

उसके बाद विद्येश्वर के क्रिया-कौशल से मेरा मनोरथ पूर्ण हो जायगा ऐसा सोचकर, पुष्पोद्भव के साथ राजवाहन अपने निवास स्थान पर लौट गया। फिर बालचन्द्रिका के द्वारा अवन्ति सुन्दरी के लिए विद्येश्वर के उपाय को भेज कर 'यह रात कैसे कटे' यह कहते हुए आराम करने लगा। दूसरे दिन सबेरे विद्येश्वर राजा मानसार के राजमहल के द्वार पर पहुँच कर द्वारपाल से राजा के पास

कुतूहलाविष्टेन समुत्सुकावरोधसहितेन मालवेन्द्रेण समाहूयमानो विद्येश्वरः कक्षान्तरं प्रविश्य सविनयमाशिषं दत्त्वा तदनुज्ञातः परिजनताड्यमानेषु वाद्येषु नदत्सु गायकीषु मदनेकलकोकिलामञ्जुलध्वनिषु, समधिकरागरञ्जितसामाजिक मनोवृत्तिषु पिच्छिकाभ्रमणेषु, सपरिवारं परिवृत्तं भ्रामयन्मुकुलितनयनः क्षण-

---

मायिकः, समागतः = प्राप्तः, इति द्वाःस्थेन = द्वारपालेन, विज्ञापितेन = निवेदितेन, तद्दर्शनकुतूहलाविष्टेन— तस्य = ऐंद्रजालिकस्य दर्शने = विलोकने यत् कुतूहलं कौतुकम् तेन आविष्टः = व्याप्तः तेन तथोक्तेन, समुत्सुकावरोधसहितेन = उत्कण्ठितान्तःपुरवर्गसहितेन, मालवेन्द्रेण – मानसारेण, समाहूयमानः = आकार्यमाणः, विद्येश्वरः = ऐंद्रजालिकः, कक्षान्तरं = मन्दिरान्तरम् प्रविश्य = गत्वा, सविनयं = विनयेन सहितं यथा स्यात्तथा, आशिषं = आशीर्वादम्, दत्वा = उक्त्वा, तदनुज्ञातः = तेन मानसारेण अनुज्ञातः आदिष्टः, परिजनताड्यमानेषु = परिजनैः स्वजनैः ताड्यमानेषु = वाद्यमानेषु, वाद्येषु = मृदङ्गादिषु, नदत्सु = रसितेषु, मदकलेति मदकलानां = मदोन्मत्तानाम्, कोकिलानां = पिकानाम्, इव, मञ्जुलः श्रुतिमधुरः, ध्वनिः स्वरः यासां तासु, तथाविधासु, गायकीषु = गायनकर्तृषु, समधिकेति = समधिकेन = साधिक्येन, रागेण = प्रेम्णा, रञ्जिता = समाकृष्टा, सामाजिकानां = सभ्यानाम्, मनोवृत्तिः = चित्तव्यापारः, यैः तेषु, पिच्छिकाभ्रमणेषु = पिच्छिका मायिकानां साधनीभूता मयूरादिपुच्छगुच्छाः तेषां भ्रमणेषु विघूर्णितेषु, सपरिवारम् = सप्रजावर्गम्, राजानं = मानसारम्, भ्रामयन् = भ्रान्तं कुर्वन्, मुकुलितनयनः = मुद्रितनेत्रः, क्षणं = मुहूर्तमात्रम्, अतिष्ठत् =

संदेश भिजवा दिया कि दरवाजे पर एक जादूगर आया है। यह सुनकर राजा के अंतःपुर की रानियाँ उसका खेल देखने के लिए उत्सुक हो उठीं। राजा ने रानियों की उत्सुकता देख कर द्वारपालों के द्वारा विद्येश्वर को बुलवाया। विद्येश्वर राजाज्ञा सुनकर चल पड़ा और कक्षांतर में प्रवेश करके विनम्रतापूर्वक राजा को आशीर्वाद दिया! राजा ने खेल दिखाने की आज्ञा दे दी। राजा से अनुज्ञात विद्येश्वर ने परिजनों को नगाड़े आदि बजाने के लिए कहा! बाजों की ध्वनि सुनकर राजभवन के द्वार पर भारी भीड़ जुट आयी। अब, विद्येश्वर ने अपना

मतिष्ठत्। तदनु विषमं विषमुल्बणं वमन्त फणालंकरणा रत्नराजिनीराजितराजमन्दिराभोगा भोगिनो भयं जनयन्तो निश्चेरुः। गृध्राश्च बहवस्तुण्डैरहिपतीनादाय दिवि समचरन्। (२४)

ततोऽग्रजन्मा नरसिंहस्य हिरण्यकशिपोर्दैत्येश्वरस्य विदारणमभिनीय महाश्चर्यान्वितं राजानमभाषत—राजन्, अवसानसमये भवता शुभसूचकं द्रष्टुमु-

स्थिति, कृतवान्। तदनु = तदनन्तरम्, विषमं = भयंकरम्, उल्वणं = उत्कटम्, विषं = कालकूटम्, वमन्तः = उद्गिरन्तः, फणालंकरणा = फणाः फटाः अलंकरणं = आभूषणं येषां ते तथोक्ताः, रत्नराजीति०—रत्नानां = मणीनाम्, राजिभिः श्रेणिभिः, नीराजितः = प्रकाशितः चमत्कृतः, राजमन्दिरस्य = नृपनिवासस्य, आभोगः = सकलः प्रदेशः यैस्ते तथोक्ताः, भोगिनः = पन्नगाः, भयं = साध्वसम्, जनयन्तः = उत्पादयन्तः, निश्चेरुः = निःसृत्य भ्रमितुमारब्धवन्तः। बहवः = अनेके, गृध्राः = पक्षिविशेषाः, च, तुण्डैः = मुखैः, अहिपतीन् = भुजंगमान्, आदाय = गृहीत्वा, दिवि अन्तरिक्षम्, समचरत् = उड्डयनं अकुर्वन् ॥ २४ ॥

ततोऽग्रजन्मा··· ··· ···· ··· ··· ···श्रावयामास ॥ २५ ॥

प्रसङ्गः—इन्द्रजालम्, ऐन्द्रजालिककृतोपायेन च राजवाहनावन्तिसुन्दर्योः विवाहः कविना वर्ण्यते—

व्याख्या—ततः = तत् पश्चात्, अग्रजन्मा = विप्रः विद्येश्वरः, नरसिंहस्य = नृसिंहावतारधारिणः विष्णोः, दैत्येश्वरस्य = राक्षसराजस्य, हिरण्कशिपोः प्रह्लादजनकस्य, विदारणं = नखैः च्छेदनम्, अभिनीय = प्रदर्श्य, महाश्चर्यान्वितं = अतिविस्मययुक्तम्, राजानं = मानसारम्, अभाषत् = अकथयत्—'राजन्! = भूप!,

खेल दिखाना प्रारम्भ किया और उसने सर्वप्रथम अपनी जादू की छड़ी घुमाकर सबको मोहित कर दिया। फिर स्वयं आंख मूद कर कुछ देर के लिए बैठ गया। उसके बाद भारी संख्या में भयानक सर्प निकल पड़े। पुनः गृध्र निकले और उन सर्पों को पकड़-पकड़ कर आकाश में उड़ने लगे ॥ २४ ॥

उसके बाद जादूगर ब्राह्मण ने, भगवान् नृसिंह द्वारा दैत्यराज हिरण्यकशिपु के वक्षविदारण का दृश्य दिखलाकर आश्चर्यचकित राजा मानसार से कहा—

चितम् । ततः कल्याणपरम्परावाप्तये भवदात्मजाकारायास्तरुण्या निखिललक्षणोपेतस्य राजनन्दनस्य विवाहः कार्यः' इति । तदवलोकनकुतूहलेन महीपालेनानुज्ञातः सः संकल्पितार्थसिद्धिसंभावनसम्फुल्लवदनः सकलमोहजनकमञ्जनं लोचनयोर्निक्षिप्य परितो व्यलोकयत् । सर्वेषु 'तदैन्द्रजालिकमेव कर्म' इति साद्भुतं

अवसानसमये = क्रीडान्तकाले, भवता = त्वया, शुभसूचकं = मङ्गलज्ञापकम्, द्रष्टुं = विलोकयितुम्, उचितम् = समीचीनम्, ततः = तस्मात्, कल्याणपरम्परावाप्तये = मङ्गलपरम्पराप्राप्तये, भवदात्मजाकारायाः—भवतः = तव आत्मजायाः = सुतायाः, आकार इव आकारः स्वरूपं यस्याः सा तस्याः तथोक्तायाः, तरुण्याः = युवत्याः, निखिललक्षणोपेतस्य = समस्तसद्गुणयुक्तस्य, राजनन्दनस्य = राजकुमारस्य, विवाहः = पाणिग्रहणसंस्कारः; कार्यः = सम्पाद्यः, इति, अस्माभिः इति आक्षेप्यः । तदवलोकनकुतूहलेन—तस्य अवलोकनं = विलोकनम्, तेन यत् कुतूहलम् = कौतुकम् यस्य सः तेन तादृशेन, महीपालेन = भूभृता, मानसारेण, अनुज्ञातः = अनुमोदितः, सः = मायिकः, संकल्पितार्थस्य = अभीष्टार्थस्य, सिद्धेः = पूर्तेः, सम्भावनेन = सम्भावनया, सम्फुल्लं = प्रसन्नम्, वदनं = मुखम् यस्य सः विद्येश्वरः, सकलमोहजनकं = सकलानां = निखिलानाम्, मोहजनकं=भ्रमकारकम्, अञ्जनं = कज्जलम्, लोचनयोः = नयनयोः, निक्षिप्य = संयोज्य, परितः = चतुर्दिक्षु, व्यलोकयत् = विलोकितवान् । तदैन्द्रजालिकं = तत् = कार्यम्, ऐन्द्रजालिकम् मायिकम्, एव, इति, सर्वेषु = सकलेषु दर्शकेषु, साद्भुतम् = अद्भुतेन आश्चर्येण सहितं यथा स्यात्तथा, पश्यत्सु = विलोकयत्सु, रागपल्लवितहृदयेन,

---

'राजन्! खेल के अंत में आपका माङ्गलिक दृश्य देखना उचित है । अतः कल्याण परम्परा की प्राप्ति के लिए आपकी कन्या जैसी एक तरुणी का विवाह समस्त लक्षण सम्पन्न राजकुमार से हो ऐसा खेल दिखाना चाहता हूँ । राजा यह खेल देखने के लिए उत्कण्ठित हो उठा । फिर राजाज्ञा प्राप्त कर विद्येश्वर अपने संकल्प की सिद्धि समझकर प्रसन्न होकर आखों में मोहकारी जादू का अञ्जन लगा कर सबको देखने लगा! सभी लोग, 'यह जादू का खेल ही है' ऐसा सोचकर देखते रहे! उधर परम चतुर विद्येश्वर ने पूर्वसूचनानुसार सुसज्जित होकर

पश्यत्सु रागपल्लवितहृदयेन राजवाहनेन पूर्वसङ्केतसमागतामनेकभूषणभूषिताङ्गीमवन्तिसुन्दरीं वैवाहिकमन्त्रतन्त्रनैपुण्येनाग्निं साक्षीकृत्य संयोजयाँमास। क्रियावसाने सति 'इन्द्रजालपुरुषाः, सर्वे गच्छन्तु भवन्तः' इति द्विजन्मनोच्चैरुच्यमाने सर्वे मायामानवा यथायथमन्तर्भावं गताः। राजवाहनोऽपि पूर्वकल्पितेन गूढोपायचातुर्येणेन्द्रजालिकपुरुषवत्कन्यान्तःपुरं विवेश। मालवेन्द्रोऽपि तदद्भुतं मन्यमा-

रागेण = प्रेम्णा, पल्लवितं = विकसितं, हृदयं = मानसम् यस्य सः तेन तादृशेन राजवाहनेन = राजकुमारेण, पूर्वसंकेतसमागतेति०---पूर्वेण = प्राक्प्रदत्तेन, संकेतेन = सूचनिकया, समागतां = उपस्थिताम्, अनेकभूषणैः = वहुभिः अलङ्कारैः भूषितानि = अलङ्कृतानि अङ्गानि = अवयवा यस्याः सा तां तादृशीम्, अवन्तिसुन्दरीम् = मानसारकन्यकाम्, वैवाहिकेति०---वैवाहिकाः = विवाहसम्बन्धिनः ये मन्त्रतन्त्रादयः तेषु यत्नैपुण्यं = दाक्ष्यम्, तेन, तथोक्तेन, यथाविधिम्, अग्निं = पावकम्, साक्षीकृत्य = साक्षिणं मत्वा, संयोजयामास = सुष्ठुतया योजितवान्। क्रियावसाने = वैवाहिकक्रियायाः अवसाने = समाप्तौ सति, इन्द्रजालपुरुषाः = मायापुरुषाः, सर्वे = समस्ताः, भवन्तः = यूयम्, गच्छन्तु = स्वस्वस्थानम् यान्तु, इति = एवम्, द्विजन्मना = मायिकेनाग्रजन्मना, उच्चैः = तारस्वरेण, उच्यमाने = भाषमाणे, सर्वे = सकलाः, मायामानवाः = मायया रचिताः पुरुषाः, यथायथम् = क्रमशः, अन्तर्भावम् = तिरोभावम्, गताः = प्राप्ताः। राजवाहनोऽपि = राजनन्दनोऽपि, पूर्वकल्पितेन = प्राङ्निर्धारितेन, गूढोपायचातुर्येण = गुप्तसाधनपाटवेन, ऐन्द्रजालिक पुरुषवत् = मायिकमानववत्, कन्यान्तःपुरं--- कन्यायाः = कुमार्याः अन्तःपुरं = अवरोधम्, विवेश = प्रविवेश। मालवेन्द्रोऽपि = मानसारोऽपि, तदद्भुतं = तत् ऐन्द्रजालिकेन दर्शितम् कर्म अद्भुतं = आश्चर्यमयम्, मन्यमानः = जानन्, तस्मै

उपस्थित हुई। राजकुमारी अवन्तिन्दरी एव प्रसन्न हृदय राजकुमार राजवाहन का परिणय संस्कार अग्नि के साक्षित्व में मंत्रतंत्रोच्चारणपूर्वक करा दिया! वैवाहिक क्रिया समाप्त होने के बाद उसने जोर से कहा---'हे ऐन्द्रजालिकपात्र! अब आप लोग जांय! इसके बाद क्षणमात्र में वे सभी मायावी मानव धीरे-धीरे अदृश्य हो गए। पूर्वनिश्चित गुप्त वेश धारण कर के राजवाहन भी कन्यान्तःपुर

नस्तस्मै वाडवाय प्रचुरतरं धनं दत्त्वा विद्येश्वरम् 'इदानीं साधय' इति विसृज्य स्वयमन्तर्मन्दिरं जगाम । ततोऽवन्तिसुन्दरी प्रियसहचरीवरपरिवारा बल्लभोपेता सुन्दरं मन्दिरं ययौ । एवं दैवमानुषबलेन मनोरथसाफल्यमुपेतो राजवाहनः सरसमधुरचेष्टाभिः शनैःशनैर्हरिणलोचनाया लज्जामपनयन् सुरतरागमुपनयन् रहो विश्रम्भमुपजनयन् संलापे तदनुलापपीयूषपानलोलश्चित्रचित्रं चित्तहारिणं

वाडवाय = विद्येश्वरब्राह्मणाय, प्रचुरतरं = प्रभूततरम्, धनं = द्रव्यम्, दत्त्वा = प्रदाय, विद्येश्वरं = ऐन्द्रजालिकम्, इदानीम् = साम्प्रतम्, साधय = याहि, इति = इत्थमुक्त्वा, विसृज्य = विहाय, स्वयम् = स्वतः, अन्तर्मन्दिरम् = अन्तःपुरम्, जगाम = विवेश । ततः = तदनन्तरम्, अवन्तिसुन्दरी = मालवेशकन्यका, प्रियसहचरीवरपरिवारा = प्रियसखीसंयुक्ता, वल्लभोपेता = पतिसनाथा, सुन्दरं = रमणीयम्, मन्दिरं = निवासभवनम्, ययौ = गतवती । एवं उपरिकथितप्रकारेण, दैवमानुषबलेन = भाग्यपुरुषप्रयत्नयोः बलेन = सामर्थ्येन, मनोरथसाफल्यं = मनोकामस्य पूर्तिम्, उपेतः = प्राप्तः, राजवाहनः = राजहंससुतः, सरसमधुरचेष्टाभिः = सरसाः रसान्विताः मधुराः याः चेष्टाः भङ्ग्यः, ताभिः, शनैः शनैः = क्रमशः, हरिणलोचनायाः = मृगनयन्याः, लज्जां=व्रीडाम्, अपनयन् = दूरीकुर्वन्, सुरतरागं मैथुनेऽनुरक्तिम्, उपनयन् = जनयन्, रहः = एकान्ते, विश्रम्भम् = विश्वासम्, उपजनयन् = संवर्धयन्, संलापे = मिथः वार्त्तालापे, तदनुलापेति = तस्याः = अवन्तिसुन्दर्याः, अनुलापे = मुहुः भाषणे, यत् पीयूषं = अमृतम्, तस्य पाने, लोलः = चञ्चलः, राजवाहनः, चित्रचित्रं = विस्मयकारकम्, चित्तहारिणं = मनो-

---

में चला गया । मानसार ने भी उस ऐन्द्रजालिक ब्राह्मण की प्रशंसा करके प्रचुर धन देकर जाने की आज्ञा दी तथा स्वयं भी अंतःपुर में चले गए । तत्पश्चात् अवन्तिसुन्दरी भी अपनी सखियों से युक्त पति के साथ अंतःपुर में आ गयी । इस प्रकार भाग्य एवं प्रयत्न के द्वारा अपनी मनोकामना पूर्ण करके राजवाहन उस अवन्तिसुन्दरी के लज्जा एवं भय आदि को धीरे-धीरे दूर करता हुआ वार्तालाप के प्रसंग में चौदहों भुवनों की आश्चर्यकारिणी कथाएँ कहने लगा ! क्योंकि

चतुर्दशभुवनवृत्तान्तं श्रावयामास। (२५)

इति श्रीदण्डिनः कृतौ दशकुमारचरितेऽवन्तिसुन्दरीपरिणयो नाम पञ्चम उच्छ्वासः।

इति पूर्वपीठिका

हारिणम्, चतुर्दशभुवनवृत्तान्तं = चतुर्दशानां भुवनानाम् = लोकानाम् (भूः भुवः इत्येतेषाम्) वृत्तान्तं = आख्यानम्, श्रावयामास = कथयामास, अश्रावयत् ॥२५॥

इति त्रिपाठियमुनेश 'चातकेन' कृतायां महाकविदण्डिविरचित दशकुमारचरितस्य पूर्वपीठिकायाः प्रदीपिकाख्यव्याख्यायां पञ्चम उच्छ्वासः।

नववधू का मनोविनोद कथा-कहानियों से ही होता है ॥ २५ ॥ इति ॥

हमारे महत्त्वपूर्ण छात्रोपयोगी प्रकाशन

१. मध्यमव्यायोग-सम्पा०—डॉ० त्रिलोकी नाथ द्विवेदी

२. सांख्यकारिका—(अन्वय, गौड़पादभाष्य, हिन्दीव्याख्या सहित)
सम्पा०—डॉ० वैद्यनाथ पाण्डेय

३. किरातार्जुनीयम् (संस्कृत हिन्दी व्याख्या विस्तृत समन्वितम्)
डॉ० अमलधारी सिंह — प्रथम सर्ग
द्वितीय सर्ग ,-२०

४. वेदान्तसार—दीपिका तथा मयूख सं० हि० टीका सहित
पं० रामगोविन्द शुक्ल ४-००

५. रघुवंशमहाकाव्यम्—१ से ७ सर्ग तथा १३—१४सर्ग पं० जितेन्द्राचार्य
(अलग-अलग विस्तृत भूमिका के साथ उपलब्ध प्रत्येक सर्ग) २-५०

६. कठोपनिषद—मूल, पदच्छेद, अन्वय, शांकर भाष्य, हिन्दी, शब्दार्थ, संस्कृत, हिन्दी, अंग्रेजी, अनुवाद तथा विशेष टिप्पणियाँ सहित
डॉ० रामरंग शर्मा तथा मालती शर्मा — प्रथम अध्याय ३-००
सम्पूर्ण ५-००

७. तर्कसंग्रह (गुटका)—पदकृत्य, हिन्दी टीका तथा प्रश्न पत्र सहित
पं० रामगोविन्द शुक्ल २-००

८. तर्कसंग्रह (मूल)—पं० रामगोविन्द शुक्ल ०-७५

९. संस्कृत निबन्ध कलिका—डॉ० रामजी उपाध्याय एवं राधा बल्लभ त्रिपाठी ४-००

१०. कुमारसम्भव—१—२ सर्ग—प० जितेन्द्राचार्य ४-००

११. पातंजलयोगसूत्र—(भोजदेवकृत राजमार्तण्डवृत्ति समेतम्)
संस्कृत-हिन्दी व्याख्या सहित-डॉ० रामशंकर भट्टाचार्य एवं डॉ० अमलधारी सिंह—विद्यार्थी संस्करण १५-०० पुस्तकालय संस्करण २०-००

१२. चन्द्रालोक—पंचम मयूख—डॉ० वैजनाथ पाण्डेय ५-००

१३. सांख्यतत्व प्रदीप—डॉ० अमलधारी सिंह ६-००

भारतीय विद्या प्रकाशन

वाराणसी — दिल्ली